Complete

Dharmapravrityanukramanika

3/14

धर्मप्रवृत्यनुक्रमणिका

14 La

403

१

१

२

२

९९ अथगोमूत्रलक्षणं
९९ अथप्रत्याम्नाय
४ ९९ अथसप्तगोत्राणि
९९ अथएकोत्तरशतकुलानि
९९ अथअश्वलक्षणं
९९ अथदशादाननियमः
१०१ अथधान्यपरिमाणं
१०१ अथसुवर्णपरिमाणं
१०१ अथमेषादिकालनिर्णय
१०१ अथतिथिनिर्णयः
१०१ अथप्रतिपदादितिथिनामादिदेवता
१०१ अथसंवत्सरप्रतिपन्निर्णयः

१०१ अथद्वितीया
१०२ अथतृतीया
१०२ अथचतुर्थी
१०२ अथपंचमी
१०२ अथषष्ठी
१०२ अथसप्तमी
१०२ अथाष्टमी
१०२ अथनवमी
१०२ अथदशमी
१०२ अथएकादशी
१०२ अथद्वादशी
१०२ अथत्रयोदशी
१०२ अथचतुर्दशी

१०२ अथपौर्णिमा
१०३ अथगौरीतृतीया
१०३ अथरामनवमी
१०३ अथतत्तन्मासात्रेतायुगादि
१०३ अथपरशुरामजयंती
१०३ अथनृसिंहजयंती
१०४ अथनागपंचमी
१०४ अथजन्माष्टमी
१०५ अथपारणं
१०५ अथगणेशचतुर्थी
१०५ अथसंकष्टचतुर्थी
१०६ अथऋषिपंचमी
१०६ अथदूर्वाष्टमी

१०५ अथज्येष्ठाष्टमी
१०६ अथवामनजयंती
१०६ अथकेवलश्रवणद्वादशी
१०७ अथअनंतचतुर्दशी
१०७ अथवृहद्गौरीतृतीयं
१०७ अथकपिलाषष्ठी
१०७ अथआश्विनप्रतिपन्निर्णयः
१०८ अथनवरात्रविधि
१०८ अथनवमी
१०९ अथविजयदशमी
११० अथदीपावली
१११ अथशिवरात्री
१११ अथशिवरात्रि।

१११ अथमासशिवरात्री
१११ अथमहाशिवरात्री
१११ अथप्रदोषलक्षणमाह
१११ होलिकानिर्णयः
१११ अथस्थालीपाककार्यं
११२ अथसर्वस्वलक्षणं
११२ अथदर्श ४

९१ अथमृताहविषयंपरित्यज्य
९१ अथश्राद्धेरजस्वलापत्नी
९१ अथभार्याकर्तृत्वेतद्विषयं
९१ अथअन्नश्राद्धं
९१ अथआमश्राद्धं
९१ अथहिरण्यश्राद्धं
९१ अथएकस्मिन्दिनेश्राद्धद्वय
९२ अथअशक्तविषये
९२ अथसहगमनश्राद्धे
९२ अथएकस्मिन्दिनेश्राद्धद्वयंनिषिद्धं
९२ अथश्राद्धमहिमा
९२ अथसूतकेश्राद्धे
९२ अथमृताहमासोनज्ञायते

९३ अथब्राह्मणाभावे
९३ अथद्रव्याभावे
९३ अथश्राद्धकाले
९३ अथअपराह्णवृत्याश्राद्धं
९३ अथपिंडरहितश्राद्धं
९४ अथश्राद्धनियमः
९४ अथकलशविशेषः
९४ अथअपरपक्षः
९४ अथसंन्यासिश्राद्धं
९५ अथश्राद्धेब्राह्मणसंख्या
९५ अथपितापुत्रनिमंत्रण
९५ अथश्राद्धदेशः
९५ अथपुनःश्राद्धविधिः
९५ अथवमननिर्णयः

९९ अथश्राद्धदिनेतिक्रांतेश्राद्धं
९९ अथजीवत्पितामहविषय
९९ अथश्राद्धसिद्धिवैश्वदेवं
९९ अथअग्नौकरणाभावविधिः
९९ अथआहिताग्निवैश्वदेवं
९९ अथदौहित्रश्राद्धं
९९ अथपुत्राभावेपत्नी
नावबहुविषय ९९
९९ अथआशौचविधिः
९९ अथदेशांतरस्थ
९९ क्षपणं
९९ अथदेशांतरगतेबहुकाले
९९ अथद्वादशाहूर्ध्वमनेककर्तृ
७० अथानुगमनं

७० अथसापत्न्यामातृविषये
७० अथपुनर्दहने
७० अथसपिंडीकरणं
७१ अथपक्षिण्यादिलक्षणं
७१ अथपक्षिण्यादिलक्षणं
७१ अथआतुरस्नानं
७१ अथरजस्वलामरणं
७१ अथगर्भिणीमरणं
७२ अथपर्वता
७२ अथदुर्मरणं
७२ अथअशक्तिशुद्धिः
७२ अथआश्विनिक्षेप
अथपुत्रादिलक्षणस्नानं
९३ अथश्राद्धविधिरभिधीयते

७३ अथनखे
७३ त्याशनिवि
७३ धविषयं
७३ अथ
क्ष्मानोः
७३ अथक्षणं
७४ अथप्रथम
उमत्त
७४ अथपाद्यं
७४ अथआव
मनं
७४ अथआ
७४
अथअर्घ्य

इतिश्री धर्मप्रवृत्तौ अनुक्रमणिकासमाप्तः

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥ देवींसरस्वतींव्यासंततोजयमुदीरयेत्॥१॥गणनाथं
१ गुरूंश्चापिधर्मसंरक्षणायवै॥धर्मप्रवृत्तिःक्रियतेकलौनारायणेनहि॥२॥विदुषांकर्मनिष्ठानांसमतिर्धर्मवर्धनी॥आलोक्यध
र्मशास्त्राणिमन्वादिभिःकृतानिवै॥३॥आश्वलायनसूत्रंतुवृत्तिंनारायणीतथा॥सारमेवसमुद्धृत्यस्मृतीनांवचनान्यथा॥
सिद्धांतानिसमूलानिसमादायाथवैविहि॥वचनानिसतांचैवसंमतानिमनीषिणां॥५॥ग्रंथेऽस्मिन्तानिलिख्यंतेधर्मशुद्धि
निसद्धिके॥शौचादिकाःप्रवक्ष्यामिक्रियाश्चानुक्रमेणतु॥६॥तिथीनामपिसर्वासांनिर्णयानपसंशयान्॥ योगीश्वरः॥ यस्मिन्
देशेमृगःकृष्णस्तस्मिन्धर्मान्निबोधत॥धर्मसंरक्षणार्थायतस्मिन्देशेवसेद्द्विजः॥७॥उषःकालेसमुत्थायचिंतयेदात्मनो
हितं॥स्मृत्वानारायणंदेवंस्तोत्राण्यपिचसंजपेत्॥८॥अथाचकाशिकाखंडे॥रजनीप्रांतयामार्धंब्राह्मःसमयउच्यते॥स्वहि
तंचिंतयेत्प्राज्ञस्तस्मिंश्चोत्थायसर्वदा॥९॥गजास्यंस्मरेद्दैवंतथाईशंसहाम्बया॥श्रीधरश्रीसमेतंचब्रह्माणंपद्मलोद्भवं॥१०॥
इंद्रादीन्सकलान्देवान्वसिष्ठादिमुनीनपि॥गंगाद्याःसरितःसर्वाःश्रीशैलाद्यखिलान्गिरीन्॥११॥क्षीरोदादिसमुद्रांश्चमान
सादिसरांसिच॥वनानिनंदनादीनिधेनुःकामदुघादयः॥१२॥कल्पवृक्षांश्चवृक्षांश्चधातून्कांचनमुख्यकान्॥दिव्यस्त्रीश्च
उर्वशीमुख्यागरुडादीन्पतत्रिणः॥१३॥नागानंतशेषप्रमुखाश्चगजानैरावतादिकान्॥अश्वानुच्चैःश्रवान्मुख्यान्कौ
स्तुभादीन्मणींस्मरन्॥१४॥स्मरेदरुंधतीमुख्याःपतिव्रत्यस्तुतावधूः॥नैमिषादीन्यरण्यानिपुरीःकाशीपुरीमुखाः॥१५
विश्वेशादीनिलिंगानिदेवान्वाकूप्रभृतिर्ममतिः॥गायत्रीप्रभृतिमंत्रान्योगिनःसनकादिकान्॥१६॥प्रणवादिमहाबीजनार १

दादींश्चवैष्णवान्॥शिवभक्तांश्चबाणादीन्प्रह्लादादीन्दृढव्रतान्॥१७॥वनानिखांडवादीनिहरींद्रादिपतीन्॥जननीच
रणौस्मृत्वासर्ववर्तीर्थोत्तमोत्तमं॥पितरंचगुरूंश्चापिहृदिध्यात्वाप्रसन्नधीः॥१९॥अथमौनविधिः॥प्रभातेमैथुनेचैवप्रस्रावेदंतधा
वने॥स्नानेभोजनकालेचषट्सुमौनंविधीयते॥२०॥दशहस्तंपरित्यज्यमूत्रंकुर्याज्जलाशये॥शतहस्तंपुरीषंतुनदीतीरेचतु
र्गुणं॥२१॥याज्ञवल्क्यः॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः॥कुर्यान्मूत्रपुरीषेचरात्रौचेद्दक्षिणामुखः॥२२॥ब्रह्मचारीवि
षयइतिकेचित्एकविषयपीतिकेचित्॥तत्रवसिष्ठः॥२३॥कृत्वायज्ञोपवीतंतुपृष्ठतःकंठलंबितं॥विण्मूत्रेतुगृहीकुर्याद्यद्वाक
र्णेसमाहितः॥२४॥मूत्रेतुदक्षिणेकर्णेपुरीषेवामकर्णयोः॥धारयेद्यज्ञसूत्रंतुमैथुनेत्वुपवीतिवत्॥२५॥अंतर्धायतृणैर्भू
मिंशिरःप्रावृत्यवाससा॥वाचंनियम्ययत्नेनष्ठीवनोच्छ्वासवर्जितः॥२६॥कृत्वासमौपादपृष्ठौमलमूत्रंसमुत्सृजेत्॥
अथन्यथाकृतेयस्तुमलंप्राश्यतिसद्द्विजः॥२७॥फालकृष्टेजलेचित्यांवल्मीकेगिरिमस्तके॥देवालयेनदीतीरेदर्भपुष्पेषु
शाड्वले॥२८॥सच्छायासुवृक्षेषुमार्गगोष्ठांबुभस्मसु॥अग्नौचगच्छंस्तिष्ठंश्चविण्मूत्रंनचोत्सृजेत्॥२९॥वाय्वग्न्यर्क
गोसोमांश्चसंध्याबुद्धीद्विजन्मनः॥पश्यन्नभिमुखश्चैतान्विण्मूत्रंनवोत्सृजेत्॥३०॥मनुः॥अरण्येऽनुदकेरात्रौचौ
रव्याघ्रकुलेपथि॥कृत्वामूत्रपुरीषेचद्रव्यहस्तोनदुष्यति॥३१॥काष्ठादिनापधानस्थममेध्यंनिमज्जीतच॥कंदमूलफलंगा
रैर्नामध्यंनिमज्जीतवै॥३२॥मूत्रंकृत्वाविनाशौचंकृच्छ्रबध्वाद्द्विजाधमः॥कच्छाधितांमूत्रयुक्तसमूढोनरकंव्रजेत्॥३३॥इ
तिमूत्रपुरीषोत्सर्जनविधिः॥ अथशौचविधिः॥तीर्थेशौचंनकुर्वीतकुर्वीतोद्धृतवारिणा॥रत्निमात्रंजलंत्यक्त्वाकुर्या

शौचमनुध्यते॥३५॥स्मृत्यर्थसारे॥ ॥शौचंतु द्विविधं प्रोक्तं बाह्यमभ्यंतरं यथा॥मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धस
२ स्तथांतरं॥३६॥गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः॥गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥३७॥स्मृतिः॥
मृच्छुभ्रवर्णा विप्रस्य क्षत्रस्य रक्तमृत्तिका॥वैश्यस्य पीतवर्णा तु शूद्रस्य कृष्णमृत्तिका॥३८॥स्मृत्यर्थसारे
अंतर्जले देवगृहे वाल्मीके मूषकस्थले॥कृतशौचावशेषाच न ग्राह्याः पंचमृत्तिका॥३९॥मार्गे खरश्मशान
स्थापांसुला मलिनास्त्यजेत॥कीटांगारास्थिरहिता माहेरे छर्करान्विता॥४०॥अंतर्जलं गता ग्राह्या हर
तो मणिवंधनात्॥आरण्यके [illegible] लेवगामिते बाहुरप्यविदुषि॥४१॥ ॥स्मृति॥आहरेन्मृत्तिकां विप्रः कू
लात्सरितकूलयो॥४॥शुद्धदेशेतु संवीक्ष्य शर्करात्रम विवर्जिता॥४२॥अभावेमृदरुक्ता या यस्मिन्देशे
लुपा भवेत्॥तथाशौच प्रकुर्वीत द्विजो मृत्तिकयापिच॥४३॥अर्धप्रसृतिमात्रंतु प्रथमा या मृत्तिका स्मृता
॥द्वितीयातु तृतीयातु तदर्धार्धं प्रकीर्तिता॥४४॥अर्धद्राव मल कमात्रा चा मूत्र शौचेतु मृत्तिका॥एका
लिंगेकरे तिस्रः उभयोर्मृद्द्वयं स्मृतं॥पंचापाने दशैकस्मिन्नुभयोः सप्तमृत्तिका॥एकाशौचेतुमृत्ति
का॥एकालिंगेकरेतिस्रः उभयोर्मृद्द्वयंस्मृतं॥पंचापाने दशैकस्मिन्नुभयोः सप्तमृत्तिका॥एतच्छौचं गृहस्थस्य द्विगुणं ब्र
ह्मचारिणः॥४६॥वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणं॥यद्दिवा विहितं शौचं तत्तदर्धं निशि कीर्तितं॥४७॥तदर्धमातुरे प्रोक्तं आ
तुरस्यार्धमध्वनि॥स्त्रीशूद्रोदरसक्तानां बालानां चोपनीतिनां॥गंधलेपक्षयकरं शौचं प्रोक्तं महर्षिभिः॥४८॥शौचे च
यत्नः सदा कुर्याच्छौचमूलो द्विजः स्मृतः॥शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रि २

धर्मप्रश्नोत्तरप्रारंभः॥छ॥

गुणं स्मृतं ॥ पद्भ्यां तु शोधयेत्तीरं नान्यथा शुचितामियात् ॥ पादस्पृष्टे पादतले तिस्रस्तिस्रश्च मृत्तिका ॥५२॥ एकैकादाम्रदा पादौ ह
स्तौ प्रक्षालयेत्ततः ॥ वामं प्रक्षालयेत्पादं शूद्रादेश्च कथंचन ॥५३॥ शौचादौ तु वामपादे पश्चाद्दक्षिणमेव च ॥ यतिश्च द्विसृजेत्स्नात्वा
मूत्रं वाथ मलं यदि ॥५४॥ आजंघात्क्षालयेन्मूत्रे द्विराचम्याकटिं मले ॥ इति शौचविधिः ॥ अथ गंडूषविधिः ॥ चतुरष्टद्विषट्
द्ध्यष्टंगंडूषैः शुध्यते क्रमात् ॥ मूत्रे पुरीषे भक्त्यंते रेतःप्रस्रवणे पि च ॥ पुरतः सर्वदेवाश्च दक्षिणे पितरस्तथा ॥ ऋषयः पृष्टतः सर्वे
वामे गंडूषमुत्सृजेत् ॥५६॥ प्राङ्मुखो युदङ्मुखो वापि द्विराचम्य ततः परं तत्काष्ठेन कुर्वीत वाग्यतो दंतधावनं ५७ स्मृतिः
मुखे पर्युषिते यस्माद्भवेदशुचिवान्नरः ततः कुर्यात्प्रयत्नेन शुध्यर्थं दंतधावनं ५८ तथा चार्यः मंत्रं वाथ मलं विशोयः स्नाता
विसृजेद्यदि आजंघौ मूत्रके पादौ वाजानु शोधयेन्मले ५९ खदिरश्च कदंबश्च करंजश्च वटस्तथा तित्रिणी वेणुपृष्ठश्च आम्र
निंबौ तथैव च अपामार्गश्च बिल्वश्च ह्यर्कश्चौदुंबरस्तथा ॥ एते प्रशस्ताः कथिता दंतधावनकर्मसु ६१ समिधा क्षीरवृक्षस्य प्र
माणं द्वादशांगुलं कनिष्ठिकाग्रवत्स्थूलं पूर्वार्धं नत्रिसूक्षितं ६२ अथ निषिद्धवृक्षाः स्मृतिसारसमुच्चये गुवाकताल
हिंताल केतकी च महावराः खर्जुरनारिकेलाश्च सप्तैते तृणराजकाः ६३ तृणराजसमोपेतो यः कुर्याद्दंतधावनं नरश्चां
डालयोनिः स्याद्यावद्गंगां न पश्यति ॥६४॥ अथ वर्ज तिथयः स्मृतिसारसमुच्चये अभ्यंगे चोदधिस्नाने मैथुने दंतधा
वने जाते च निधने चैव तिथितात्कालकी स्मृता ६५ प्रतिपत्पर्वषष्ठीषु नवमीद्वादशीषु च दंतानां काष्ठसंयोगः प्रयत्ने
न विवर्जयेत् ६७ स्मृतिः अर्कवारे व्यतीपाते संक्रांत्या जन्मवासरे वर्जयेद्दंतकाष्ठं तु नंदादिषु च पर्वसु ६८ तृपाप

३

र्णैः सदा कुर्याद्दमां चैकादशीं विना तयोरपि च कर्त्तव्यं जंबुनिंबाम्रपल्लवैः ६९ एकादश्यां तृणैः पर्णैः कर्त्तव्यं दंतधावनं स्ना
त्वा देवार्चनं कृत्वा व्रतसंकल्पमाचरेत् ७० अदिते च सहस्रांशो यः कुर्याद्दंतधावनं सवित्रा भक्षितस्तेन पितृ चंद्रास्य धातकः ७१
स्मृत्यर्थसारे अंगारवालुकाभिश्च भस्मांगुलनखैरपि इष्टिकालोष्टपाषाणैर्न कुर्याद्दंतधावनं ७२ अभावे दंतकाष्ठानां
निषिद्धायां तिथावपि अपां द्वादशगंडूषैर्मुखशुद्धिर्भविष्यति ॥७३ मूत्रे पुरीषे भुक्तांते मुखप्रस्रवणे पिव चतुरष्टषट्द्वा
दशगंडूषमिति मुच्यते ७४ इति दंतधावनविधिः अथ स्नानविधिः विष्णुः उत्तमं तु नदीस्नानं तटागे मध्यमं स्मृतं कूपस्नानं तु सा
मान्यं भांडस्नानं वृथा भवेत् ७५ नदीषु देवखातेषु प्रातः स्नायाद्दिने दिने तदभावे तटाके वा कूपे वा स्नानमाचरेत् ७६ विष्णुः
जले निमज्य बध्नीयाच्छिखामाचम्य वै ततः पुनराचम्य संकल्पमपां स्नानं समाचरेत् ७७ सप्तहा। प्रातरस्नायाद्द्विजः शूद्र
त्वमाप्नुयात् तस्मात्स्नानं कर्त्तव्यं रविवारे सदैव हि ७८ मनुः अत्यंतमलिनः कायो नवछिद्रसमन्वितः स्रवत्येव दिवारात्रौ प्रा
तःस्नानं विशोधनं ७९ नदीं गंतुमशक्तश्चेद्गृहे वा स्नानमाचरेत् स्वयं चैवाथ शिष्यैश्च पुत्रैश्चोद्धृतवारिणा ८० परान्नारः
न स्नायाच्छूद्रहस्तेन वा तथा उद्धृताभिरभिस्नायादाहृताभिर्द्विजातिभिः ॥ ८२ स्मृत्यर्थसारे जानुमात्रे जले तिष्ठेन्ना
चा मज्जिन दुष्यति उपविष्टः समाचामे जानुमात्रादधो जले ८३ द्विराचम्य निमज्ज्याथ पुनरेव द्विराचरेत् मंत्रेणैव त्रि
खां बध्वा प्राणानायम्य वै ततः ८४ यमः कराभ्यां धारयेद्दर्भान्शिखाबंधं विधाय च प्राणायामं ततः कुर्यात्संकल्पं च
समुच्चरेत् ८५ विष्णुः नाभिमात्रे जले स्थित्वा कृत्वा शौचादिधा द्विजः। निरुध्य कर्णनासास्तु त्रिवारं मज्जनं चरेत् ॥वि

३

श्वामित्रः॥ नाभिमात्रेजले तिष्ठेसमन्वाद्दशपंचवा॥ त्रिवारं चापि चाप्लुत्य स्नानमेवं विधीयते ८७ स्नात्वाय देहप्रक्षाल्य पुनस्ना
त्वाद्विराचमेत्॥ आपोहिष्ठादिनवभिर्वारुणैर्मार्जयेत्तथा ८८ सांगुष्ठयज्ञसूत्रेण त्रिःप्रदक्षिणमाचरेत्॥ याःप्रवत इतिजप्त्वे
तिमंमेगंगइत्यृचा ८९ स्मृतिः संकल्पं सूक्तपठनं मार्जनं चाघमर्षणं देवादितर्पणंचैव पंचांगंस्नानमाचरेत् ९० व
सिष्ठः स्रोतसोभिमुखंस्नायान्मार्जनं चाघमर्षणं॥ अन्यत्रार्कमुखोरात्रौ प्राङ्मुखोभिमुखोपिवा ९१ स्रोतसोऽभिमुखोम
ज्जेद्यत्रापःप्रवहंतिच॥ स्थावरेषुचसर्वेषु आदित्याभिमुखस्तथा॥ ९२॥ यायासमुद्रगानद्यास्तासुस्नानंतुसन्मुखंसर्वेषांद्विशाखि
नामेवृविनावाजसनेयिनां॥ ९३ प्रयोगपारिजातसारवल्यां॥ गोमयस्नान आचम्यगोमयंवामेहस्तेधृत्वाविभज्यच॥ त्रेधात
त्प्रणवेनैवसंप्रोक्षेद्भूर्भुवस्वरों ९४ सर्वदिक्षुक्षिपेत्किंचित्गोमयंप्रणवेनतु॥ मानस्तोकमिमंमंत्रमुक्तातदभिमंत्रयेत्॥ ९५
गंधद्वारामनेनांगंमस्तकाद्यनुलेपयेत्॥ नदुत्तमंसुमुगधीनिहिरण्यशृंगमित्यृचा॥ ९६॥ प्रसंम्राजेबृहत्सूक्तेअवहैतेहेलइत्यृचे॥
याःप्रवतइत्येकांचजलमध्येपवेत्क्रमात्॥ सुमित्र्यानापइत्येवमपोयाम्यक्षिपेत्बहिः॥ नमोनारायणायेतिचतुरस्रंप्रकल्पयेत्॥
तीर्थंपुष्करसंज्ञतत्तत्रसंनिहितोहरिः॥ इदंविष्णुरनेनैवमंत्रेणादीत्यमीक्षयेत् सव्याहृतिकांगायत्रींजप्त्वास्नानंसमाचरेत्॥
द्विराचम्यजलेनैवधृत्वाचैवोर्ध्वपुंड्रकं॥१०० अंतश्चरसीत्याचम्यसमुद्रादूर्मिरित्यृचा आपोअस्मानृगायत्र्याशिरसा
घाभिषेचयेत्॥ ततःस्नात्वाद्विराचम्यह्यवयोयंतिदृढपेत्॥ ॐआपोहिष्ठेमंगंगसत्वन्नोअग्नइत्यृचाव्याहृतिभिस्सवाभिःकुर्यान्मा
र्जनमंजसा॥ आपोहिशाद्भिर्मंत्रैर्जलमालोड्यवैततः ऋतंचेत्यादिभिर्मंत्रैरघमर्षणकंचरेत् हंसःशुचिषदित्यकांपूते

पवित्रणेतिवसव्याहृतिकांगायत्रींत्रिर्जपेत्तथनिमज्जयेत् अथाचम्य ततोद्विद्वान्नामभिःकेशवादिभिः द्वादशाभिर्विमज्या
थऋतंचेतिवैजपेत् हंसःशुचिषदित्येकांत्रिर्जपन्मूर्ध्निसिंचयेत् त्वन्नोअग्नेत्तथावैवसत्वन्नोअग्नइत्यथ तरत्समंदीतिसूक्तंच
जपंस्नानंसमाचरेत् अकारादिहकारांताक्षरःसर्वाःस्तुताःपठन् विप्राश्चानुक्रमेणैवस्नानकालेतुसर्वदा आग्नाअग्नइहा
वसोअधिवासंतुवैततः अयंयज्ञोदेवयायेभवस्त्वमिधाइति अतीयामानि दृष्ट्वैव अग्नेरक्षाणोवैक्रमात् अग्निंदूतंचवैचाग्रे
बाधस्वइतितत्परं अपांमुदीयतद्विष्णोःयत्किंचेदंततःक्रमात् सरस्वतीवर्णतस्त्वजपेदेताऋचःस्वयं त्रिराप्लुत्यद्विराचम्य
गायत्र्यास्नानमाचरेत् शौनकः हस्ताभ्यांजलमादायसकृद्देवाभिमंत्रितं। मस्तकेनमुखेवाक्कोहृदयेपृष्ठदेशके अभिषिं
चेत्स्वमात्मानंगायत्र्यायोनिमुद्रया एकावृत्याजपेद्वाक्यावैल्लविद्याऋचंततः॥स्नात्वैकविधिरत्स्नात्वाद्विराचम्यततःपरं
प्राणायामंत्रयंकृत्वासंकल्प्यंतर्पयेदथा अक्षतोदकपूर्वेणपर्णेनदेवतीर्थेनतच्चतु ब्रह्मादितर्पणंकुर्यात्प्राङ्मुखश्चोपवीत्य
थ उदङ्मुखस्तोनिवीतितुयवसंमिश्रितोदकैः कृष्णद्वैपायनादींश्चतर्पयेद्देवतीर्थतः दक्षिणाभिमुखोभूत्वाप्राचीनावी
त्यतःपरं तर्पयेत्पितृतीर्थेनतिलैःसोमपितृनथ यन्मयादूषितंतोयंशारीरमलशोधनात् तस्मात्पापस्यशुध्यर्थंयक्ष्मा
णंतर्पयाम्यहं असंस्काराश्चयेकेचिज्जलाशाःपितरोमम तेषामाप्यायनार्थायदीयतेसलिलंमया हस्ताभ्यांचक्षिपेत्तो
यंयत्तीरेसलिलात्बहिः तृतीयंपीडयेद्वस्त्रंमंत्रतोदक्षिणेततः येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः तेगृह्णंतुमया
दत्तंवस्त्रनिःपीडनोदकं दर्भान्विसृज्यततीरेत्वुपवीतिद्विराचमेत् अक्लिन्नवस्त्रंसंप्रोक्ष्यशुचीव इतिमंत्रितः परिधायत ४
तोवस्त्रंशुक्लवस्त्रेणिमत्ततः स्नातादेहंनिमज्ज्यतद्विरोगान्यथवैद्विजः योगीश्वरः तस्माद्देहंनमज्जीतद्यबरेणकरेणवा॥

स्नानलेशेनसाम्यंचपुनस्नानेनशुध्यति तिस्रःकोट्यर्धकोटीच यावद्रोमाणिमानुजे वसंतिसर्वतीर्थानितस्मान्नपरिमार्जयेत् पिब
तिशिरसोदेवाःपिबंतिपितरोमुखात् मध्याच्चयक्षगंधर्वाः अधस्तात्सर्वजंततःस्करापनि~~तस्मान्नपरिमार्जयेत्~~ पिबंतिशिरसोदे
~~वाःपिबंतिपितरोमुखात्मध्याच्चयक्षगंधर्वाःअधस्तात्सर्वजंतवः~~ समंततोयंस्पृष्टतःकेशाद्बिंदवः नतस्नानंनिष्फलंविंद्यात्पुनस्नानेन
शुध्यति ५० अथवस्त्रविधिः कल्पश्रुतिस्मृतिप्रमाणेनग्राह्यवस्त्रंचधारयेत् षट्कर्मनिरतोग्राह्यंवस्त्रंतत्तुनधारयेत् वसिष्ठः
अपवित्रपटोनग्नोनग्नश्चार्द्रपटस्मृतः नग्नश्चमलिनोद्वासीनग्नःकौपीनवानपि अंतःकच्छोबहिःकच्छोमुक्तकच्छस्तथैवच द्व्यंगु
लचतुरंगुलंचोत्तर्यंपट्टनिर्मितं काषायंकृष्णवस्त्रंचमलिनंकेशभूषितं छिन्नाग्रंचोपवस्त्रंचकुत्सितंधर्मतोविदुः हारीतः नग्नकाषा
यवासस्यनग्नःकौपीनकेवलः नग्नसंधितवस्त्रंचनग्नोविदशावस्त्रकः याज्ञवल्क्यः दग्धंजीर्णंचमलिनंमूषकोपहतंतथा खादितंगो
महिष्याद्यैस्तत्याज्यंसर्वथाद्विजैः नीलीरक्तंतुयद्वस्त्रंदूरतःपरिवर्जयेत् स्त्रीणांक्रीडार्थसंयोगेशयनीयेनदुष्यति पालनाद्विक्रया
च्चैवतद्वृत्तेरुपजीवनात् अपविप्रोभवेद्विप्रस्त्रिभिःकृच्छ्रैर्विशुध्यति नलरक्तंयदावस्त्रंविप्रःस्वांगेषुधारयेत् तंतुसंमतिसंख्याको
वसेद्धूमपुरेध्रुवं कंबलेपट्टसूत्रेचनीलिदोषोनविद्यते स्त्रियोवस्त्रंसहात्याज्यमन्यवस्त्रंविवर्जयेत्॥ अधूतकारंपूर्वैर्घुः धौत
मेवतथैवच त्रयमेतदसंबध्यःसर्वकर्मसुवर्जयेत् ईषधौतंस्त्रियाधौतंशूद्रधौतंतथैवच अधौतंतच्चविज्ञेयंशुष्कदक्षि
णापल्लवैः अम्भुनापीड्यवस्त्रंचसर्वथाद्विजसत्तमः खवद्धायाःशुष्कमुपरितद्वस्त्रंनचधारयेत् धौतंचतुर्गुणंकृत्यभूमाव
यंनपीडयेत् वामकोष्ठेतुनिक्षिप्यद्विराचम्यविशुध्यति प्रागग्रमुदगग्रंवाधौतवस्त्रंप्रसारयेत् प्रत्यक्दक्षिणयोःकृत्वापु

पुनःशौचं विधीयते एकवस्त्रो न भुंजीयान्न कुर्याद्देवतार्चनं न कुर्यात्पितृकर्माणि स्नानहोमजपादिकं ॥ खंडवस्त्रावृतश्चैव व
स्त्रार्धप्रावृतस्तथा ॥ वचनं तत्र न ग्राह्यं श्वानोच्छिष्टहविर्यथा ॥ चंद्रिकायां ॥ स्नानं दानं जपं होमं स्वाध्यायं पितृकर्म च ॥ नै
कवस्त्रो द्विजः कुर्यात्श्राद्धभोजनसत्क्रियाः ॥ वसिष्ठः ॥ अष्टहस्तं नवं श्वेतं सदशं नान्यधारितं ॥ आहतं तद्द्विजानीयात्स
र्वकर्मसु पावनं ॥ दक्षिणोत्तरयोः कट्योः कच्छं बध्नाति वै द्विजः ॥ नाभौ वा वा कुक्षौ वा पृष्ठे चैव यथाक्रमं ॥ अथार्द्रवस्त्रनिष्पीडनं ॥
स्नानं कृत्वार्द्रवस्त्रं तु त्यजेन्नद्यामधो द्विजः गृहे तु स्नानकं कृत्वा विसृजेदेतदूर्ध्वतः ॥ स्नानं कृत्वार्द्रवस्त्रं तु उत्तरीयकमूर्ध्वतः ॥
धृतवस्त्रमधः कुर्यादाचम्य च पुनर्द्वयं ॥ नोत्तरीयमधः कुर्यान्नोपर्यधरस्थमंबरं ॥ अज्ञानाद्यदि प्रकुर्वीत पुनस्स्नानेन शुध्यति ॥ धृ
त्वा वस्त्रं विधानेन करे वामे निधाय तत् ॥ आर्द्रवस्त्रं द्विराचम्य निष्पीड्य पुनराचमेत् ॥ तथा च स्मृतिः ॥ निष्पीड्य वस्त्रमाचम्य ततः
संध्यामुपासते ॥ मध्याह्ने तर्पणादूर्ध्वं वस्त्रनिःपीडनं भवेत् ॥ नद्यादिस्नानतो गेहे स्नानवस्त्रं सदा द्विजः ॥ स्वयमेव वा नि
पीड्य स्त्रियो हस्तेन दोषभाक् ॥ द्वादश्यां पंचदश्यां च संक्रांतौ श्राद्धवासरे ॥ वस्त्रं निःपीड्येन्नैव न च क्षालने योजयेत् ॥ अ
थ सप्तस्नानानि ॥ याज्ञवल्क्यः ॥ मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च ॥ वारुणं मानसं चैव सप्तस्नानान्यनुक्रमात् ॥ प्रा
तःस्नानाशक्तविषयमाह ॥ दक्षः ॥ प्रातःस्नाने त्वशक्तश्चेन्मार्जयेदार्द्रवाससा ॥ उत्तमांगादिपार्श्वौ द्वौ तत्स्नानं भवेत्स्नानकं द्विजः ॥ प्रा
तःकाले त्वशक्तश्चेत्संक्षिप्य स्नानमाचरेत् ॥ स्नानं चैव तु मध्याह्ने द्विजः कुर्यात्सविस्तरं ॥ अथ गृहस्नानं ॥ गृहे गृहमुखं विंद्या
दन्यत्राभिमुखं रवेः ॥ प्रवाहेऽभिमुखं कुर्यात्स्नानमेवं द्विजोत्तमः ॥ आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः ॥ अतः संतः प्र ५

शंसंतिस्नानमुष्णेनवारिणा॥अभ्यंगेचैवमांगल्येगृहेचैवतुसर्वदा॥शीतोदकेननस्नायान्नधार्यंगोपिचंदनं॥शीतास्वप्सुनिशिचोष्ण॥
शितास्वप्सुनिषिंचयेत्॥ताभिःस्नानंगृहेप्रोक्तंनकुर्याछिन्नवारिणा॥संक्रांतौग्रहणेचैवह्यमावास्यार्कपर्वसु॥गृहेवापिप्रकुर्वीत
स्नानंसीतोदकेनच॥संकल्पसूक्तपठणंमार्जनंचघमर्षणं॥देवादितर्पणंचैवगृहेपंचविवर्जयेत्॥गृहेस्नानेनकुर्वीततर्पणंमार्ज
नंतथा॥स्नानांतराचमनंकृत्वाद्विराचम्येनशुध्यति॥पादौप्रक्षाल्यपाणीचसमाचम्यगृहेद्विजः॥स्नात्वाशिखांचबध्नीयाद्विराच
म्यविशुध्यति॥गृहेस्नानंयदाकुर्यात्स्नानवस्त्रोर्धकंत्यजेत्॥अधोग्रपानसंपीड्यपाराशरवचोयथा॥स्नानंकृत्वाचार्द्रवस्त्रंमु
र्ध्वमुत्तरयोद्विजः॥आर्द्रवस्त्रमधस्ताच्चेत्तुनस्नानेनशुध्यति॥ अथसचैलस्नानं ॥ श्वानकुक्कटमार्जारंमध्यभांडंरजस्वलाः॥
स्पृष्ट्वादेवलकंचैवसचैलंस्नानमाचरेत्॥ देवलकलक्षणं॥ षण्मासेवात्रिमासेवापरार्थेदेवतालये॥सवैदेवलकोनामाह
व्यकव्येषुवर्जितः॥मातापितृविसृष्टानांक्रियानुत्सृज्ययाचकः॥स्पृष्ट्वादेवलकंचैवसचैलंस्नानमाचरेत्॥प्रत्यहंकुरुते
यस्तुदेवपूजापरस्यतु॥वित्तार्थीचाथवान्नार्थीसोपिदेवलकोभवेत्॥चितिंचचितिकाष्टंचश्वानंचांडालमेवच॥स्पृष्ट्वादेवल
कंचैवसवासाजलमाविशेत्॥ अथान्यत्रखनितकूपस्नानं ॥ अंत्यजैःखनिताःकूपास्तटाकादिस्तथैवच॥तेषुस्नात्वाचपीत्वा
चपंचगव्येनशुध्यति॥ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चैवान्यजातयः॥एभिस्तुखनिताःकूपाःस्नानंतत्रैवकारयेत्॥पंचपिंडान
उद्धृत्यनस्नायात्परवारिषु॥स्नायान्नद्यांदेवखातेह्रदेषुचसरस्सुच॥ अथनदीरजोदोषः॥ सिंहकर्कटयोर्मध्येसर्वानद्यो
रजस्वलाः॥तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगाः॥योगीश्वरः॥ रजोदुष्टेषुवैस्नानंवर्ज्यनद्यादिषुद्विजैः॥कदर्थितंर

जस्तासांसंध्योपास्तिंचतर्पणं ॥ गंगाचयमुनाचैवप्लक्षजाचसरस्वती ॥ रजसानाभिभूयंतेयेचान्येनदसंज्ञकाः ॥ अत्रविशेष
माहव्याघ्रपादः ॥ उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच ॥ चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते ॥ अभावेकूपवापीनांअं
नुपायभृत्तंव्रजेत् ॥ रजोदुष्टेपिपयसाग्रामभोगोनविद्यते ॥ अस्थिचर्मादियुक्तंतुखरश्वानादिदूषितं ॥ उद्धरेदुष्टकंसर्वं
शोधनंपरिमार्जनं ॥ धनुःसहस्राण्यष्टौतुगतिर्यासांनविद्यते ॥ नतानदीशब्दवहागर्त्तास्ताःपरिकीर्तिताः ॥ गर्तानांसर्वदावै
रजोदोषोनविद्यते ॥ तत्रस्नानंनकुर्वीतभार्गवस्यवचोयथा ॥ अथकुशविधिः ॥ स्मृत्यर्थसारे ॥ कुशाःकाशायवादूर्वाउशीरा
श्चसकुंदराः ॥ गोधूमाव्रीहयोमुंजादशदर्भाःप्रकीर्तिताः ॥ नभोमासस्यदर्शेतुशुभान्दर्भान्समाहरेत् ॥ आयातयामास्तद
र्भानियोज्याःस्युःपुनःपुनः ॥ विष्णु ॥ नभोमासचतुर्दश्यांदर्भास्तत्रसमाहरेत् ॥ आयातयामास्तेदर्भानियोज्याःस्युःपुनःपुनः ॥ कृ
ष्णपक्षेचतुर्दश्यामानितव्याःकुशाद्विजैः ॥ अकालिकास्तथाशुद्धाःअतऊर्ध्वंविगर्हिताः ॥ स्नात्वाशुचौदर्भदेशेशुचिर्भूत्वा
समाहितः ॥ प्राणानायम्यसंकल्प्यकुशोत्पाटनमाचरेत् ॥ प्रणवेनैवसंगृह्यचतुरादौप्रयत्नतः ॥ दिग्देवतानांमंत्रेणचतु
र्दिक्षुक्षिपेत्कुशान् ॥ विरंचिनासहोत्पन्नापरमेष्ठीनिसर्गजाः ॥ नुदपापानिसर्वाणिभवस्वस्तिकरोमम ॥ हुंफट्कारेणस
कृच्छित्वासमुद्धरेत् ॥ अछिन्नाग्राःअशुष्काग्राःपवित्रेतुहरिताःकुशाः ॥ अंगिरः ॥ अहन्यहनिकर्मार्थंकुशोत्पाटःप्रशस्य
ते ॥ नपूर्वेषुधृतकुशायोग्याश्चैवोत्तरेकुशाः ॥ मासिमासिधृतकुशामासिमास्येवचोदिताः ॥ नोत्तरोत्तरमासेषुधर्मव
द्भिरसंमताः ॥ प्राक्समाप्तभृतान्दर्भान्वर्जयेश्राधकर्मणि ॥ सद्यःसमाहृतादर्भास्ताःकुशास्तुश्राधकर्मणि ॥ कुशा

स्यात्पवित्रस्य प्रमाणकं ॥ स्नाने दाने जपे यज्ञे स्वाध्याये नित्यकर्मणि ॥ सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा ॥ उभयत्र स्थितैर
भैः समाचामति यो द्विजः ॥ सोमपानफलं तस्य भुक्त्वा यज्ञफलं लभेत् ॥ ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं त्यजेत् ॥ आचमेद्य
स्तु मोहात्मायया उच्छिष्टं तथैव सः ॥ ब्रह्मयज्ञे जपे होमे ब्रह्मग्रंथिर्विधीयते ॥ भोजने वर्तुलं प्रोक्तं एष धर्मो विधीयते ॥ सपवित्रः
सदर्भो वा कर्मांगाचमनं चरेत् ॥ नोच्छिष्टं तत्पवित्रं तु भुक्त्वोच्छिष्टं तु वर्जयेत् ॥ यथा वज्रं सुरेंद्रस्य शूलं हस्ते हरस्य च ॥ च
कायुधं यथा विष्णोरेवं विप्रकरे कुशः ॥ अथ सुवर्णादिपवित्राणि ॥ योगीश्वरः ॥ दार्भ्यं पवित्रं ताम्रं वा राजतं हेममेव वा ॥
विभृयाद्दक्षिणे पाणौ ॥ पवित्रं चोत्तरोत्तरं ॥ याज्ञवल्क्यः ॥ अनामिक्यां धृतं हेम तर्जन्यां रौप्यमेव च ॥ कनिष्ठिक्यां धृतं खड्गं ते
न पूतो भवेन्नरः ॥ तर्जन्यां बिभृयाद्रौप्यं स्वर्णं चोपकनिष्ठिकां ॥ गृहस्थः कर्णयोश्चैव शुभे रौप्यकुंडले ॥ उत्तरीयं योगप
ट्टं तर्जन्यां रौप्यमेव च ॥ कनिष्ठा समपवित्रा च न धार्यमिति कौशिकः ॥ पादुके चोत्तरीयं च तर्जन्यां रौप्यधारणं ॥ न धारयेत्स पि
ता यस्तु ज्येष्ठभ्राता तु जीवति ॥ न तस्य मौनं तर्जन्यां रजतस्य च धारणं ॥ पादुकाहरणं चैव योगपट्टं तथैव च ॥ न जीवति ततः कु
र्याद्भार्याश्राद्धं तथैव च ॥ अथ यज्ञोपवीतं भृगुः ॥ उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते ॥ एकमेव यतीनां स्यादिति धर्मो व्यवस्थि
तः ॥ मनुः ॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ॥ तृतीयमुत्तरीयार्थे वस्त्राभावे चतुर्थकं ॥ पाराशरः ॥ स्कंधादिनाभिप
र्यंतं ब्रह्मसूत्रं पवित्रकं ॥ न्यूने रोगप्रवृत्तिः स्यादधिकं धर्मनाशनं ॥ आयुष्कामः सदा कुर्यात् बह्वयज्ञोपवीतकं ॥ पंचभिः पुत्र
कामः स्याद्धर्मकामस्तथैव च ॥ पाराशरः ॥ दशाष्टौ वा गृहस्थस्य चत्वारि वनवासिनः ॥ एकैकमुपवीतं च यतीनां ब्रह्मचा
रिणः ॥ यज्ञोपवीतेनैकेन जपहोमादिकं कृतं ॥ तत्सर्वं विलयं याति पितॄणां नोपतिष्ठति ॥ पतिते त्रुटिते वापि ब्रह्मसू

त्रं यदा भवेत् ॥ नूतनं धारयेद्विप्रः स्नानं संकल्पपूर्वकं ॥ यज्ञोपवीतमेकैकं प्रतिमंत्रेण धारयेत् ॥ आचम्य प्रतिसंकल्प धारयेन्मनु
रब्रवीत् ॥ एकमंत्रैकसंकल्पं धृत्वा यज्ञोपवीतकं ॥ एकस्मिन् त्रुटिते सर्वं त्रुटितं नात्र संशयः ॥ यज्ञोपवीतमजिनं मौंजीं दंडं च धा
रयेत् ॥ नष्टे भ्रष्टे नवं धृत्वा नष्टं चेत्तज्जले क्षिपेत् ॥ सदोपवीतिय धार्यं वासः कलकर्मसु ॥ सह यज्ञोपवीतेन बध्नीयाच्छ्राद्धक
र्मणि ॥ मनुः ॥ कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ॥ शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकं ॥ स्कांदे ॥ उपवीतं क्रमे
ण स्यात्कार्पासं शाणमाविकं ॥ त्रिवृदूर्ध्ववृतं तच्च भवेदायुर्विवृद्धये ॥ उच्छिष्टं तोरणच्छिष्टं विक्रीतं विधवाकृतं ॥ भुक्तोत्तरे त
न धार्यं सप्ततंतून्न धारयेत् ॥ विधवारचितं सूत्रं मनाध्याये कृतं च यत् ॥ त्रिच्छिन्नमथ धौतं भुक्त्वा निर्मितमुत्सृजेत् ॥ संग्रहे
ऊर्ध्ववृतमधो वृत्तं पुनरूर्ध्ववृतं तथा ॥ एतद्यज्ञोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते ॥ तत्रामेत्राः कटाः कण्वाचरकावाजसनेयकाः ॥
कंठादुत्तीर्यसूत्रं तु कुर्युर्वै क्षालनं द्विजः ॥ अथ नित्यविधिः ॥ बहुवासा मृगाचैव येवान्ये यजुषा स्तथा ॥ कंठात्तीर्यसूत्रं तु पुनः
संस्कारमर्हति ॥ अभ्यंगे वाद्रधिस्नाने माता पित्रोर्मृतेहनि ॥ कंठादुत्तीर्यसूत्रं तु कुर्याद्वै क्षालनं द्विजः ॥ अथ तिलकविधिः ॥
ललाटे तिलकं कुर्यान्मृदा वापि च भस्मना ॥ तदभावे तु तोयेन चंदनेनापि वा द्विजः ॥ स्मृत्यर्थसारसमुच्चये ॥ ऊर्ध्वपुंड्रं द्विजाती
नामग्निहोत्रसमो विधिः ॥ श्राद्धकाले तु संप्राप्ते कर्ता भोक्ता तु संत्यजेत् ॥ ऊर्ध्वपुंड्रं मृदः सौम्यं ललाटे यस्य दृश्यते ॥ स चा
ण्डालोपि शुद्धात्मा पूज्य एव न संशयः ॥ ब्रह्मघ्नो वाथ गोघ्नो वा हेतुकः सर्वपापकृत् ॥ गोपीचंदनसंपर्कान्मुक्तो भवति तत्क्षणात् ॥
दशांगुलप्रमाणं स्यादुत्तमोत्तममुच्यते ॥ नवांगुलं मध्यमं स्यादष्टांगुलमतः परं ॥ सप्तषट्पंचभिः पुंड्रं मध्यमं त्रिविधं स्मृतं ॥
चतुस्त्रिद्व्यंगुलैः पुंड्रं कनिष्ठं त्रिविधं स्मृतं ॥ ऊर्ध्वपुंड्रं मृदा कुर्यात्तिर्यक् चैव तु भस्मना ॥ चंदनेनोभयं कुर्यादन्यथा नरकं

व्रजेत्॥ मध्यमांगुलिस्तर्जन्यां धारयेदूर्ध्वपुंड्रकं॥ भ्रगुभारम्ययत्नेन ब्राह्मणः सर्वकर्मसु॥ भागवतानामंगुलीनियमः॥ अंगुष्ठः पुष्टिदः
प्रोक्तो मध्यमायुष्करी भवेत्॥ अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशनी॥ दर्भपाणिर्न कुर्वीत भ्रूमध्यादि प्रदीपवत्॥ श्रीकामः पुष्टि
कामो वा यथेष्टं तिलकं चरेत्॥ स्नात्वा पुंड्रं मृदा कुर्यात्त्वामं कृत्वा तु भस्मना॥ अभ्यंगोत्सवकाले तु कस्तुरीचंदनादिना॥ जपो होम
स्तथा दानं स्वाध्यायं पितृतर्पणं॥ व्यर्थं भवति तत्सर्वं मूर्ध्वपुंड्रं विनाकृतं॥ ललाटे तिलकं धृत्वा कुर्युः शैवाश्च वैष्णवाः॥ तर्पणे श्रा
पिवे श्राद्धे त्वन्यथा निष्फलं भवेत्॥ भागवत्तविषयमेतत्॥ स्मार्त्तविषये तु विशेषः॥ स्वाध्यायजपहोमादि संध्यादानादिकं च यत्॥
ऊर्ध्वपुंड्रं विना कुर्यात्तत्सर्वं निष्फलं भवेत्॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा ब्राह्मणैः कर्मकर्तृभिः॥ वर्जयेत्तिलकं भाले श्राद्धे चैव तु तर्पणे॥ अ
भ्यंगे सूतके रात्रौ विवाहे पुत्रजन्मनि॥ मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनं॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा यं द्रकारमथापि वा॥ श्राद्धक
र्त्ता न कुर्वीत यावच्छ्राद्धविसर्जनं॥ ऊर्ध्वपुंड्रं सदा कुर्याच्छ्रौतस्मार्त्ते च कर्मणि॥ कर्त्ता वाप्यथवा भोक्ता न कुर्याच्छ्राद्धकर्मणि॥ ना
पिकायां गृहे स्त्रीरं पाषाणे गंधलेपनं॥ स्त्रांगी प्रतिजलं दृष्ट्वा शक्रस्यापि श्रियं हरेत्॥ शिलायां गंधलेपश्च मार्जारोच्छिष्टभो
जनं॥ छायायां स्नायेदक्षभाग्यभंगो न संशयः॥ शालंकः॥ धृत्वा येस्तर्पणे श्राद्धे मृदं वा भस्म चंदनं॥ व्यर्थं स्यात् कुरुते मोहा
त्स च गच्छेदधोगति॥ नैव तिर्यङ् मृदा कुर्यादूर्ध्वपुंड्रं च भस्मना॥ चंदनेनोभयं कुर्यादिति तन्मनुरब्रवीत्॥ त्रिपुंड्रस्करविप्रा
णां वर्त्तुलं नृपवैश्ययोः॥ अर्धचंद्रं तु शूद्राणामन्येषामूर्ध्वपुंड्रकं॥ अथ भस्मधारणं॥ ब्राह्मणानां नृपाणां च भस्म मिश्रं
च चंदनं॥ नेत्रयुग्मप्रमाणं तु त्रिपुंड्रं धारयेद्द्विजः॥ रत्नवल्यां॥ मध्यमानामिकांगुष्ठैर्ललाटे यत्त्रिपुंड्रकं॥ तत्त्रिपुंड्रं भवेच्छस्तं म
हापातकनाशनं॥ स्मृत्यर्थसारे॥ अस्तुर्विर्वाप्यनाचारो मनसा पापमाचरन्॥ शुचिरेव भवेन्नित्यं त्रिपुंड्रस्य च धारणात्॥ नार

भावे तु काशास्युः काशाः काशमयाः स्मृताः॥ काशाभावे गृहीतव्या अन्यदर्भा यथोचिताः॥ पितृकार्येषु सर्वेषु कुशाग्राह्याः समा
समाहिताः॥ दूर्वाश्लक्ष्णाः सदा ग्राह्याः सर्वेषु शुभकर्मसु॥ तथा च सूत्रे॥ अच्छिन्नाग्रावनंतर्गर्भौ प्रादेशमात्रौ कुशौ नानांतयोरिति॥
तथा च कारिकायां॥ अनंतर्गर्भिणौ यौ तु कुशौ प्रादेशसंमितौ॥ अनखच्छेदनौ साग्रौ तौ पवित्राभिधीयकौ॥ अथ निषिद्धान्
हरांरवः॥ ये तंतर्गर्भिता दर्भा ये च छिन्ना नखैस्तथा॥ कथितानग्निदर्भांश्च कुशान्यत्नेन वर्जयेत्॥ चितौ तु ये च ये दर्भा ये दर्भा
यज्ञभूमिषु॥ स्तरणासनपिंडेषु षट् दर्भान् परिवर्जयेत्॥ स्मृत्यर्थसारे॥ यैः कृतः पिंडनिर्वापः श्राद्धं वा पितृतर्पणं॥ विण्मूत्रादि
षु ये दर्भास्तेषां त्यागो विधीयते॥ प्रचेताः॥ अमायां तु न विछद्यात्कुशांश्च समिधा तथा॥ सर्वत्रावस्थिते सोमे हिंसहा ब्रह्महा
भवेत्॥ तथा च सोमोत्पत्तौ॥ वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतीन्॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ यमनि
षेधो व्यर्थच्छेदनं॥ कामागतच्छेदने नैव दोषः॥ तथा च जाबालिः॥ कुशं शाकं च पुष्पाणि वर्गार्थे च तृणादिकं॥ निषिधे पितृगृ
हीयाद्दमावास्याहनि द्विजः॥ मनुः॥ तत्र श्राद्धदिने कर्त्ता दिशां गच्छेत्तु दक्षिणां॥ दक्षिणाप्रवणान् दर्भान् समूलानाहरेच्छुचिः॥
पाराशरः॥ समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्॥ शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् व्रजत्यधः॥ अथ पवित्रलक्षणं स्मृ
त्यर्थसारे॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं॥ एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं॥ सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्र
थितं न वा॥ त्रिभिस्तु ग्रथितं कार्यं पौष्टिकं पंचभिस्तथा॥ द्वे दर्भौ दक्षिणे हस्ते सव्ये त्रीन्नासने सकृत्॥ हेमाद्रौ वित्रोषड
कः॥ पंचभिः पुष्टिके चैव चतुर्भिर्यज्ञकर्मणि॥ पितृयज्ञे त्रिभिर्दर्भैर्द्वौ दर्भौ नित्यकर्मणि॥ श्राद्धे ग्राह्यास्त्रयः साग्राः कु
शास्युः षोडशांगुलाः॥ द्विमूले एकतः कुर्यात्पवित्रं चाग्रमेततः॥ द्व्यंगुलं मूलवलयं ग्रंथिरेकांगुलं तथा॥ चतुरंगुलमग्रं

दः॥त्रिपुंड्रंपरमंपुण्यंब्रह्माविष्णुशिवात्मकं॥येजातारा़क्षसाःप्रेतायेचान्येक्षुद्रजंतवः॥त्रिपुंड्रंधारिणंदृष्ट्वापलायंतिनसंशयः॥
तस्मात्सर्वप्रयत्नेनत्रिपुंड्रंधारयेत्सुधीः॥विष्णुः॥यस्यपंक्तौद्विजोभुंक्तेशिवभक्तस्त्रिपुंड्रधृक्॥सतांपूतिंपुनात्येवसकलांचचतु
राननः॥भक्तिर्यस्यभवेद्यस्मिन्मृदवाप्यथभस्मनि॥तदेवधारयेद्विद्वान्नितिवैमुनयोविदुः॥नपादुकस्थोनादर्शेनजलेत्ववलोक
यन्॥नप्रावृतशिराःकुर्यात्तिलकंधर्मसाधनं॥अथसंध्याकालः॥उत्तमातारकोपेतामध्यमालुप्ततारका॥अधमासूर्यसंयुक्ता
प्रातःसंध्यात्रिधास्मृता॥अहोरात्रस्ययःसंधिःसूर्यनक्षत्रवर्जितः॥सातुसंध्यासमाख्यातामुनिभिस्तत्वदर्शिभिः॥संध्योत्तमात्रि
तीयंशोपंचधांशोदिनस्यतु॥मध्याह्निकीतदूर्ध्वंवापूर्वंवास्यादिहैवहि॥संध्याकालेतुसंप्राप्तेसंध्यांनैवमुपासते॥जीवमानोभवे
च्छूद्रोमृतःश्वाचैवजायते॥कालेतुवंदितासंध्यास्वर्गमोक्षप्रदायिनी॥अकालेवंदितासंध्यासैववंध्यावधूरिव॥कालस्यलोपेप्राय
श्चित्तं॥संध्याकालेत्वतिक्रांतेस्नात्वाचम्ययथाविधि॥जपेदष्टशतंदेवींततःसंध्यांसमाचरेत्॥जमदग्निः॥एकाहंसमतिक्रम्यप्रमा
दादकृतंयदि॥अहोरात्रोषितोभूत्वागायत्र्यायुतंजपेत्॥राष्ट्रभंगेनृपक्षोभेरोगार्तेसूतकेपिच॥संध्यावंदनविच्छित्तिर्नदोषाय
कदाचन॥देवाग्निद्विजविप्राणांकार्येमहतिसंस्थिते॥संध्याहीनेनदोषोस्तियतस्तत्कर्मसाधनात्॥अथसंध्यावंदनविधिः॥तत्रका
रिका॥अन्यच्चाहरहःकृत्यंसंध्योपासनमुच्यते॥ग्रामाद्बहिःपात्तीरेउपविश्यैवसेद्द्विजः॥आचम्यमार्जनादन्यत्स्मृत्युक्तंचकरोत्य
था॥स्वशाखाविधिनाचैवसंध्याकर्मसमाचरेत्॥शौचाचारेतथापानेस्पृष्टास्पृष्टेचचर्वणे॥पौराणाचमनंकुर्यान्नामभिःके
शवादिभिः॥संध्यायांकर्मकालेचस्मृत्तराचमनंभवेत्॥ब्रह्मयज्ञेतुवैकुर्याच्छ्रौतेराचमनंद्विजः॥गोकर्णाकृतहस्तेनमाष
मात्रंजलंपिबेत्॥तन्न्यूनमधिकंपीत्वासुरापानसमंभवेत्॥अंगुष्ठाग्रंसमाकुंच्यमध्यमामध्यपर्वणि॥गोकर्णंतद्विदि

यंसर्वेब्राग्वमनेषाहि॥स्मृत्यंतरे॥ संहतांगुलिहस्तेन गृहीत्वांबु वीक्षितं॥मुक्तांगुष्ठकनिष्ठाभ्यां त्रिःपिबेद्ब्रह्मतीर्थतः॥शीत
लेनिर्मलेचांबुमधुरंक्षारवर्जितं॥ग्राह्यमाचमनेस्नानेदैवेपित्रेचकर्मणि॥ अथपुराणाचमनं॥ केशवादित्रिभिःपीत्वाद्वाभ्यां
प्रक्षालयेत्करौ॥गंडोष्ठौसम्मृजेद्वाभ्यांशिरस्येकंपाणिपादयोः॥ मूर्ध्निचैकंवक्षस्येकंनासाक्ष्योःकर्णयोर्द्वयोः॥बाह्वोर्नाभौ
चहृद्देशेमूर्ध्निचैकंविनिक्षिपेत्॥ प्रणवःपूर्वतंन्नामचतुर्विंशतिसंख्यया॥ स्वाहांतंप्राशयेद्वारितन्नमोंतंस्पर्शयेत्तथा॥
अथस्मृत्याचमनं॥ तथाचस्मृतिः॥संहतांगुलिभिस्तोयंगृहीत्वादक्षिणेनतु॥मुक्तांगुष्ठकनिष्ठेचत्रिःपिबेद्ब्रह्मतीर्थतः॥प्रक्षा
ल्यहस्तौपीत्वाचसकृद्दोष्ठवत्तःपरं॥संहतांगुष्ठमूलेनद्विःप्रमृज्यततोमुखं॥धृत्वाकरौचभिमृशेतसंहतांगुलिभिर्जलं॥अद्भि
र्वामकरेसिंच्यताभिःपादौचसंस्पृशेत्॥ मध्यमध्येजलंस्पृष्ट्वास्पृशेन्नासादिकंक्रमात्॥अंगुष्ठेनप्रदेशिन्याघ्राणंपश्चादु
पस्पृशेत्॥अंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रेपृथक्पृथक्॥अंगुष्ठेपकनिष्ठाभ्यांनाभिंपश्चादुपस्पृशेत्॥तलेनहृदयंस्पृ
शेदंगुलिभिःशिरः॥अंगुल्यग्रैर्दक्षिणाद्बाहुमूलद्वयंस्पृशेत्॥अनेनविधिनाविप्रःकुर्याद्वाचमनःसदा॥अथश्रुत्याचमनं॥
द्व्याःपादौत्रिभिःपीत्वाचाब्लिंगैर्नवभिःस्पृशेत्॥सप्तव्याहृदिभिश्चैवशिरोमंत्रैस्पृशेदथ॥आदावंतेचसंध्यायाद्विर्द्विराचम
नंस्मृतं॥तथैवार्घ्यप्रदानांतेमध्येसकृत्सकृत्॥ अथप्राणायामःस्मृत्यर्थसारे॥ दक्षिणेचैवनंकुर्याद्वामेनापूरितोदरं॥
कुंभकंचजपंकुर्यात्प्राणायामःसउच्यते॥पंचांगुलिभिर्नासाग्रंपीडनांचुप्रणाभिधा॥मुद्रेयंसर्वपापघ्नीवानप्रस्थगृहस्थयोः॥
कनिष्ठानामिकांगुष्ठैर्नासाग्रस्यचपीडनं॥ओंकारसमुद्रासाप्रोक्तायतिश्चब्रह्मचारिणः॥याज्ञवल्क्यः॥गायत्रींशिरसासार्धंज
पेद्व्याहृतिपूर्वकं॥त्रिःपठेदायतःप्राणःप्राणायामःसउच्यते॥आदावंतेचमध्येचप्राणायामस्त्रयस्त्रयः॥ मार्जनंशौनक

कारिकायां॥ अथसंध्यामुपासिष्य इतिसंकल्प्यमार्जनं॥ आपोहिष्ठेतिकुमंत्रेणकुर्याच्चैवकुशोदकैः॥ पादेपादेक्षिपेन्मूर्ध्निप्रतिप्र
णवसंयुतं॥ आत्मानंप्रणवेनैवपरिषिंच्यजलैःसह॥ कुर्यात्सप्रणवैःपादैःमार्जनंनकुशोदकैः॥ यस्यक्षयायेतिजलंसकुशंप्रक्षि
पेदधः॥ स्पृष्ट्वाहस्तेनवामेनललाटंनधादिकेनवा॥ पाणिनादक्षिणेनैवमार्जयेत्सकुशेनतु॥ कुर्याच्चत्वारिपात्राणिसंध्याकाले
गृहेद्विजः॥ मार्जनेप्राशनेचार्घेतथैवाचमनेसदा॥ सूर्यश्चेत्यनुवाकेनप्रातःकालेपिबेदपः॥ अग्निश्चेत्यनुवाकेनसायं
कालेतथापिबेत्॥ आपःपुनंतुमध्याह्नेमंत्राचमनमाचरेत्॥ विसृज्यदर्भानाचम्यकुशपाणिश्चमार्जयेत्॥ प्रणवेनच
व्याहृत्यागायत्र्यानैवमार्जयेत्॥ हृष्टिनासापुटेनैवपापात्मानमपोहरेत्॥ तज्जलंनावलोक्याथवामभागेक्षितौक्षिपेत्॥ आच
म्यदर्भान्विसृज्यधृत्वादर्भान्नूतनान्परं॥ अथार्घ्यदानं॥ पाणिभ्यांजलमादायगायत्र्याचाभिमंत्रितं॥ रवेरभिमुखंतिष्ठन्त्रिरूर्ध्वंसं
ध्ययोःक्षिपेत्॥ द्वौपादौतुसमौकृत्वापूरयेदुदकांजलिं॥ गोशृंगमात्रमुद्धृत्यजलमध्येजलंक्षिपेत्॥ आपस्तंबविप्रयमाह
ईषन्नम्रःप्रभातेचमध्याह्नेऋजुसंस्थितं॥ उपविश्यतुसायाह्नेजलेत्वर्घ्यंननिक्षिपेत्॥ कालातिक्रमेणयस्तुत्रिसंध्यामपिस
र्वदा॥ चतुरर्घ्यंप्रदातव्यंगायत्र्याशिरसासह॥ तर्जन्यंगुष्ठसंयोगेराक्षसीमुद्रिकाभवेत्॥ योददातितथाचार्घ्यंततोयंरुधिरंभवे
त्॥ असावादित्यमंत्रेणप्रासोदकेनैवपाणिना॥ प्रदक्षिणमनुकृत्यत्वाचम्यसंध्ययोर्द्वयोः॥ मंदेहिनांविनाशायनिक्षिपेत्तुज
लांजलिं॥ प्रायश्चित्तार्थमाचम्यमुच्यतेदैत्यहत्यया॥ अथासनानि॥ वंशासनेदरिद्रस्यात्पाषाणेव्याधिसंभवः॥ धरण्यां
दुःखसंभूतिर्दौर्भाग्यंदारुकासने॥ तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः॥ कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्म
णि॥ अभिचारेचनीलंस्यात्कंबलोव्याधिकर्मसु॥ श्वेतवस्त्रेयशोवृद्धिःसर्वार्थीचित्रकंबलं॥ सायणीये॥ भिन्नासनंयोग

पद्धंतथैवस्नगचर्मच॥कृष्ण॥जिनंचयत्नेनवर्जयेत्तुत्रवासदा॥आधारादिनमःकुर्यात्कुशाग्रैरासनंततः॥प्राणायामत्रयंकुर्या
दुपविश्यकुशासने॥ऋष्यादिलक्षणंज्ञात्वारुद्रप्रोक्तेनमार्गतः॥न्यासंकृत्वाविधानोक्तंषडंगंवाथशक्तितः॥शौनकः॥गायत्री
संस्मरेद्धीमान्हृदिवासूर्यमंडले॥कल्पोक्तलक्षणेनैवध्यात्वाभ्यर्च्यततोजपेत्॥प्रातस्तिष्ठञ्जपेद्देवींसायंचैवोपविश्यच॥उ
पविश्यतुमध्याह्नेजपकर्मसमारभेत्॥कार्ष्णाजिनिः॥पूर्वसंध्याजपन्तिष्ठेत्सावित्रीकर्मदर्शनात्॥पश्चिमांतुसमासीनः॥
सम्यङ्नक्षत्रदर्शनात्॥व्यासः॥प्रातर्मध्याह्नयोस्तिष्ठन्गायत्रीजपमाचरेत्॥ऊर्ध्वजानुस्तुसायाह्नेध्यानालोकनतत्परः॥
कारिका॥अर्धास्तमितिमादित्येपश्चिमस्यथउत्तरः॥भागस्तन्मुखआसीनः॥सावित्रीवाग्यतोजपेत्॥आतारकोदयाद्देवींप्रा
तः॥कर्मतदिष्यते॥अर्धास्तमितिनक्षत्रमंतरिक्षंयदाततः॥आरभ्यप्राङ्मुखस्तिष्ठेज्जपन्नासूर्यदर्शनात्॥संध्यायासाय
मुत्पत्तिविज्ञयासाबुधैःसदा॥प्रथमतःउपनयनकालेसायंसंध्यामुपक्रमेदित्यर्थः॥तथाचशौनकः॥उपनीतोहिकुर्वी
तसायंसंध्यामुपक्रमादिति॥तथाचकारिका॥अहःशेषंततस्तिष्ठेत्सायंसंध्यामुपास्यचेति॥ अथजपविधिः॥ प्रातर्नाभौक
रंकृत्वामध्याह्नेहृदिसंस्थितं॥सायंजपतिनासाग्रेजपस्तुत्रिविधिःस्मृतः॥अंगुष्ठेनाभिकामूलेप्रदक्षिणमतंद्रितः॥मध्यमा
मूलपर्यंतंगायत्रीजपमीरितं॥गायत्रीवेदमूलत्वाद्वेदपर्वसुगीयते॥पर्वभिस्तुजपेद्देवींनमालाभिकदाचन॥उष्णीषकंचि
कोनग्नोमुक्तकेशीगलवृत्तः॥अपवित्रकरश्चैवप्रलापंनजपेत्क्वचित्॥ॐकारंपूर्वमुच्चार्यभूर्भुवस्वस्ततःपरं॥गायत्र्याप्रण
वश्चांतेजपएवंविधिःस्मृतः॥तिस्रव्याहृतयःकुर्यात्पृथगोंकारसंयुताः॥पुनःसंहत्यपंचांतेमंत्रस्याद्यंतयोस्ततः॥वाचिका
स्यमुपांशुश्चमानसस्त्रिविधःस्मृतः॥त्रयाणांजपयज्ञानांश्रेयःस्यादुत्तरोत्तरः॥यदुच्चनीचैःस्वरितैःस्पष्टशब्दवदक्षरैः॥ १०

इषुमात्रावरंसर्वतःस्थंडिलमुपलिप्यैतस्मिन्॥कौशिकोपि॥अरत्निमात्रंविज्ञेयमग्नेरायतनंशुभं॥श्रौतेचौपासनेवापिखातयो
निर्विवर्जितं॥मेखलाद्वितयंकार्यंखलग्नंतुबाह्यतः॥बाह्याद्व्यंगुलविस्ताराऽभ्यंतराचतुरंगुला॥बाह्याषडंगुलोत्सेधाभ्यं
तराद्वादशांगुला॥विस्तारेणतुकर्तव्यासमाश्लक्ष्णादृढाशुभा॥अन्यपक्षः॥नित्यहोमेतुकुंडस्यान्मेखलात्रयसंयुतं॥भूमेरू
र्ध्वंप्रकुर्वीतचतुर्विंशांगुलंशुभं॥मेखलाचोन्नताकार्यात्वेकैकाचतुरंगुला॥द्व्यंगुलाविस्तृतत्वेकैकारखातस्याद्वादशांगुलं॥
गृह्याग्निरक्षणाशक्तविषये॥शाकलः॥अग्निसंरक्षणेयस्यशक्तिर्यदिनविद्यते॥समिधारोपयेदग्निंहस्तयोरथवापिच॥अ
थप्रयोगः॥लौकिकाग्निंप्रतिष्ठाप्यकुंडेवास्थंडिलेपिवा॥पाणिस्थंवासमित्स्थंवावह्निंसंयोजयेत्ततः॥अथप्रत्यवरोहेतिमं
त्रेणाग्निंसमित्स्थितं॥पाणिस्थंवाथनेनैवनिदध्याल्लौकिकेऽनले॥यथाविधिसुसंकल्प्यंकुर्याद्ध्यानंहविर्भुजः॥पर्युक्ष्याग्निं
परिस्तीर्यपर्युक्ष्यचततःपरं॥पयःप्रभृतिद्रव्यकेचसंकुर्यादग्निहोत्रवत्॥दर्भैर्पासंवेज्वलयेदपक्वंपक्वमेवच॥अधिश्रितंश्रपेणा
पःप्रतिषिंचेन्नवारिच॥पुनस्त्रीज्वलतानेनपरिहृत्यप्रहृत्यतत्॥पयोप्रियंगुसर्पिश्चह्योदनंदधितंडुलाः॥सोमश्चैलमपा
व्रीहिद्वादशैतेतिलायवाः॥पयश्चादीनिचत्वारिविद्धिपक्वानियाज्ञिकाः॥दध्यादीनामपक्वानांनाधिश्रयणमिष्यते॥स्मृत्य
र्थसारे॥प्रियंगुव्रीहिश्यामाकानीवाराश्चतथायवाः॥यावयावन्नलाश्चगोधूमाऔपासनशुभावहाः॥शालिश्यामाकनीवारा
गोधूमाव्रीहयोयवाः॥स्वरूपेणैवहोम्याश्चस्वरूपेणैवचैतिलाः॥कारिका॥व्रीहीणांचयवानांचचतुःषष्टीरथाहुतिः॥
तिलानांतुतदर्धंस्यात्तदर्धंस्यात्स्यतंनतु॥द्रवहविःस्रुवेणैवपाणिनाकठिनंहविः॥जुहुयादग्नयेस्वाहास्त्वभिहुत्वातदा
ने॥शाकलः॥अद्भिःप्रक्षालितान्शुभ्रान्तंडुलानग्निसंस्कृते॥जुहुयादग्नयेस्वाहासूर्यायाप्रतरेवच॥ध्यात्वाशर्दचतु

र्थ्यंतंप्रजापतयइत्यथा॥स्वाहाकारेणवैहुत्वाकुर्यात्परिसमोहनं॥औपासनेहुतेदेवमंगुलीनांचवामतः॥वैश्वदेवेतथावान्यैर्घ
हुतीस्यतोहुनेत्॥पयसाज्येनवाप्रातस्तेनैवृत्याहद्धतिक्रतु॥पूर्वमंत्रस्तुसूर्यायस्वाहेत्यन्यसमंभवेत्॥शौनकः॥अग्नयेचैवसू
र्यायप्रजापतयनित्यशः॥सोरवैश्वानरेर्यावासमस्यसप्तिपंचभिः॥आ कामनापरत्वमालाविधिः॥शंखाक्षमणयःश्रीदःस्फ
टिकोमोक्षदःपरः॥पद्माक्षास्तुष्टिलक्ष्मीदारुद्राक्षाभुक्तिमुक्तिदाः॥पुत्रजीवभवाःपुत्रपशुधान्यसमृद्धिदाः॥विद्रुमावश्यधनदासो
भाग्यार्थाश्चमौक्तिकाः॥पापक्षयःकुशामयाःकामदाःस्वर्णरौप्यजाः॥प्रवालमुक्तास्फटिकैर्जपेत्कोटिफलप्रदं॥तुलसीमणिना
येनगणितंचाक्षयंभवेत्॥रुद्राक्षमणिनाचैवह्यनंतफलमश्नुते॥अक्षरुद्राक्षधारणं॥रुद्राक्षान्कंठदेशेदशनपरिमिता
न्॥मस्तकेविंशतिद्वेषट्षट्कर्णप्रदेशेकरयुगलगतान्द्वादशद्वादशैव॥बाह्वोरिंदोःकलाभिर्नयननयुगकृतेनैकमे
कंशिखायांवक्षस्यष्टाधिकंयःकलयतिशतसःस्वयंनीलकंठः॥ अथसंध्योपासनं॥शौनकः॥सायंप्रातरुपस्थानंकुर्या
न्मंत्रैर्यथाक्रमं॥जातवेदसइत्येकातछंयोरावृणीमहे॥नमोब्रह्मण्यइत्येतेरूपतिष्ठेद्विजःप्रति॥उत्तमेचानुवाकेनगायत्रीचवि
सर्जयेत्॥प्रसंगतोमध्याह्नसंध्योच्यते॥आचार्यः॥कुर्यान्माध्याह्निकींसंध्यांब्रह्मयज्ञादनंतरं॥संगवाद्रूर्ध्वमेवाकुभवेद्दवी
गथापिवा॥विश्वामित्रः॥कुर्यादर्घ्यंतुमध्याह्नेप्रक्षिपेद्धंसइत्यचा॥आकृष्णेनेतिमंत्रेणगायत्र्याचेतिकेनच॥उपस्थानंतुमध्या
उ ह्नेकुर्यात्सूर्यस्यसंमुखः॥उदुत्यमितिचैचित्रंदेवानामित्यनेनच॥अथाभिवादनं॥आत्मप्रादोतथाभूमिस्पृष्ट्वासंध्याभि
वादनं॥नक्षत्रचतथास्त्रयेनजानंत्यभिवादयेत्॥विश्वादर्शे॥पूर्वंनाम्नाभिवाद्यपितृवदिहभवेज्ज्ञानदःश्रोत्रियस्तुज्येष्ठाज्या
याकनीयानपिभवतितदामातुलोकापितृव्यः॥जुहन्नृत्योपिवर्ज्यःकुशसलिलसमित्पुष्पपाणिःस्वयंवाशुचोधावल्गुद

क्यापतत्शठकृतघ्नानुप्रपाभ्योपवासः॥स्मृत्यर्थसारे॥ज्येष्ठं वाथकनिष्ठंवासंध्यांतंवाभिवादयेत्॥ वर्जयेत्तुसुतंशिष्यंदौहि
त्रंदुहितुःपतिं॥नारायणः॥नयेद्वेदमधीतारंपदक्रमसमन्वितं॥सारथ्यंब्राह्मणंसांगंकनिष्ठंचाभिवादयेत्॥नित्यंवेदमधीता
रंमध्यापयंतमेवच॥अनधीतान्नमस्कुर्याज्ज्येष्ठंवापिकनीयसं॥वर्ज्यानाह॥वमंतंजृंभमाणंचकुर्वंतंदंतधावनं॥अभ्य
क्तशिरसंस्नानंकुर्वंतिनाभिवादयेत्॥दूरस्थंजलमध्यस्थंधावंतंधनगर्वितं॥उन्मत्तंबधिरंमूकंमंधंचनाभिवादयेत्॥औपा
सनविधिः॥तत्रदक्षः॥पाणिग्रहणादिगृह्यपरिचरेदृति॥तत्रादौहोमकर्तृन्नाह॥होमामुख्यायजमानःपत्नीपुत्रश्चकन्य
का॥ऋत्विक्शिष्योगुरुर्भ्राताभागिनेयःसुतापतिः॥एतेरेवहुतंयत्तुतद्धुतंस्वयमेवहि॥कार्याच्छेत्कारणेकृत्तीस्वयंकर्तुंन
शक्यते॥होमंकुर्याद्नाशौचेत्वृत्विक्तुरनुज्ञया॥यदिस्यात्सूतकंकर्तुःकुर्वीतानुज्ञयाविना॥अस्तमितेसायंजुहोत्य
दितेप्रातरितिब्राह्मणं॥यत्सायंतनमारभ्यवह्निंपरिचरेत्त्वयंसौरवैश्वानरीयेवासमस्यसप्तिपंचभिः॥सायमुपस्थाने॥
अग्नआयूंषिपत्यिभिर्द्वाभ्यामग्नेत्वमित्यर्थ॥कुर्यात्सायमुपस्थानंप्रजापतेइतितथा॥सूर्यानइतिपंचर्चःप्रातरौपासनेज
पेत्॥उदुत्यंचित्रंदेवानामुद्वयंचप्रजापते॥ ॥अथसमस्यहोमः॥कालद्वयेहसमस्येद्देकस्मिन्कालएववा॥प्रागेवोक्ते
नविधिनासमस्यसायमाचरेत्॥चतस्रश्चाहुतिर्हुत्वातत्रद्वेसायमाहुती॥द्वेप्रातराहुतीःसायंहोमेचैकासमिध्यपि॥समस्यं
सायमारभ्यजुहुयात्सायमाहुती॥परिषिच्याहुतीप्रातर्हुत्वातुपरिषेचयेत्॥द्विःसायंहोमयस्मृज्याद्विप्रातर्होमवल्कच॥
उपस्थानंसकृत्कार्यंशेषंप्रकृतिवद्भवेत्॥हविष्यान्नंद्विदेवत्यांमितिसूर्याग्निदेवतं॥समस्येपंचभिर्ऋग्भिःप्राजापत्य
इतितथा॥कुर्यादग्निरुपस्थानंसर्वत्रांचमइत्यथ॥अभिवाद्यजपेद्देवीयथाशक्त्याथवादश॥भस्माभिधारणंकुर्यात्

१२

मंत्रमुच्चारयेद्वाचाजपयज्ञःसवाचिकः॥शनैरुच्चारयेन्मंत्रंमंदमोष्ठौप्रचालयेत्॥अपरैरश्रुतःकिंचित्सउपांशुजपःस्मृतः॥धिया
यदक्षरश्रेण्याद्वर्णाद्वर्णपदात्पदं॥शब्दार्थचिंतनंभूयःकथ्यतेमनसोजपः॥मनसःसिद्धिकामानांपुत्रकामउपांशुकः॥वाचकं
मारणेचैवप्रशस्तोजपईरितः॥वाचकस्त्वेकएवास्यादुपांशुःशतउच्यते॥सहस्रंमनसाप्रोक्तंअन्वत्रिभिर्गुनारदः॥स्मृत्यर्थसारे॥
ब्रह्मचारीगृहस्थश्चशतमष्टोत्तरंजपेत्॥वानप्रस्थोयतीचैवसहस्रादधिकंजपेत्॥शौनकः॥अष्टोत्तरशतंनित्यमष्टविंशति
मेववा॥विधिनादशकंवापित्रिकालसंजपेद्द्विजः॥ अथप्रदोषजपसंख्या॥श्राद्धप्रदोषदर्शेचगायत्रीदशसंख्यया॥अ
ष्टाविंशत्यनाध्यायेसुदिनेतुयथाक्रमं॥ अथजपस्थाने॥ गृहेजपासमंविद्याद्गोष्ठेशतगुणंभवेत्॥पुण्यारण्येतथारामेसहस्र
गुणितंविदुः॥आयुतंपर्वतेपुण्येनद्यांलक्षमुदाहृतं॥कोटिर्देवालयेप्राहुरनंतंविष्णुसंनिधौ॥सूर्यस्याग्रेर्गुरोरिंदोर्दीप
स्यस्यजलस्यच॥विप्राणांचगवांचैवसन्निधौशस्यतेजपः॥अश्वत्थमूलमाश्रित्यजपहोमसुरार्चनं॥अक्षय्यंफलमाप्नोतिब्र
ह्मणोवचनंयथा॥अथनिषिद्धः॥पतितानांचांत्यजानांदर्शनेभाषणेश्रुते॥क्षुतेऽधोवातगमनेजृंभणेजपमुत्सृजेत्॥प्रा
प्यावावम्यचैतेषांप्राणायामेषगंडकं॥कृत्वासम्यक्जपंछेषंयद्वासूर्यादिदर्शनं॥नित्योपासनंसायमारंभणंसिद्धं॥अथाह्निका
चारेतुप्रातरारभ्यविधिर्लिख्यते॥उदितेजुहोतीतिश्रुतेः॥अथात्रमनुः॥कालमाह॥लेखामात्रश्चदृश्येतरश्मिभिश्चसमन्वि
तः॥उदितंतंविजानीयात्तत्रहोमोविधीयते॥संग्रहे॥हस्तादूर्ध्वंरविर्यावद्गिरिंहित्वानगच्छति॥तावद्देवहिकालोयंप्रातस्तु
दितिहोमिनां॥प्रातर्होदशनाड्यस्तुसायंतुनवनाडिकाः॥होमकालःसमुद्दिष्टोमुनिभिस्तत्वदर्शिभिः॥अथस्थंडिलादिः॥

बृहत्सामेत्यचैव यथा॥ ललाटे हृदये बाह्वो मस्तके च यथाक्रमं॥ होमकालेपि कुर्वीत त्रिपुंड्रं भस्मधारणं॥ मानस्तोके इति मंत्रे
ण केचिद् ऊर्ममनीषिणः॥ प्रतेपदरपीनत्र पाणि वायुगपतपेत्॥ अयं ते योनिः समिधां यातेअग्ने करात्तुभौ॥ तथा च श्रोतसू
त्रे॥ अयंते योरित्यरणिं गार्हपत्ये प्रतिपतेत्पाणिवायातअग्नेयज्ञियेनेति। तथा च स्मृतिः। अश्वत्थं समिधं वापि ग्रामीस
मिधमेव वा॥ तदभावे यथा चान्यः समिधः प्रतपेत्तु बुधः॥ पालाशः खादिरोश्वत्थः शम्युदुंबरजाशमीनू॥ अपामार्गार्कदू
र्वाश्च कुशाश्चेत्यपरे विदुः। सत्वचः समिधः कार्या ऋज्व्यः श्लक्ष्णास्समास्तथा॥ शस्ता दशांगुला स्तासुः द्वादशांगुलका स्तुवा॥
षाण्मासं स्यात्शमी ग्राह्या खादिरं तु त्रिमासकं॥ मासत्रयं तु पालाशे ह्यश्वत्थो हरहः स्मृतः॥ दिनमेकमपामार्गो ग्राह्या श्वार्क
स्तथैव तु॥ औपासने तु मासोक्तास्त्रिदिनं स्यादुदुंबरः॥ एतेषामप्यभावे तु कुशा इत्यपरे विदुः॥ मासमेकं कुशो ग्राह्यो दूर्वा
स्यात्सद्य एव तु॥ शाद्यः शमी च पालाशं सप्ताहमिति केचन॥ वृटादयोपियाह्यास्तु केचिद्यज्ञविदा विदुः॥ प्रयोगपारिजाते॥
अकाले यत्कृतं कर्म कालं प्राप्य पुनः क्रियां॥ कालातीतं तु यत्कुर्यादकृतं तद्विचक्षते॥ यत्कर्म क्रियते मोहाद्ध्यकाले केनचिद्
हि॥ काले प्राप्ते पुनः कुर्यात्कृतं वापि हि कर्म तत्॥ संध्योपासनादीत्यर्थः॥ कृतदारो न तिष्ठेत क्षणमप्यग्निना विना॥ यदि
तिष्ठेत्ततो व्रात्यस्ततश्च पतितो भवेत्॥ अथ वैश्वदेवविधिः॥ तत्रेदं सूत्रं॥ अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादग्निहो
त्रदेवेभ्य इति॥ स्मृत्यर्थसारे॥ गृहस्थो वैश्वदेवाख्यं कर्म प्रारभते द्विजः॥ अन्नस्य चात्मनश्चैव संस्कारार्थमितीष्यते॥ कोद्र
वरकंमाषमसूरं च कुल्त्थकं॥ कांजिपक्वं परान्नं च वैश्वदेवं तु वर्जयेत्॥ कारिका॥ गृहस्थो वैश्वदेवाख्यं कर्मप्रारंभ

नेदिया॥ तं चन्द्रोस्त्विति कृष्णगवद्वचनं यथा॥ औपासनाग्निमन्वं वा समीप्याथ हविर्भुजं॥ पर्युक्ष्य परिषिच्याग्निमलंकृ
त्य च पूर्ववत्॥ हविष्यं पक्वमादद्यात्तु अधिश्रित्यानले च तत्॥ प्रोक्ष्यो द्वास्याकृतत्तान्यक्तं तदभावे ऽम्बुनापि वा॥ सायंपी
ये॥ अन्नाभावे प्रवासे च तन्दुलानोषधीस्तु वा॥ पयो दधि घृतं वापि कंदमूलफलानि च॥ यजय देवयज्ञादौ जलं वापत्सु
वा जलं॥ द्रवं स्रुवेण होतव्यं पाणिना कठिनं हविः॥ संगृह्य कृत्ति मे के काम के कामकृतीकृ नेत्॥ स्वाहाकारेण चैवाग्नौ त्य
त्सर्वत्यागपूर्वकं॥ अन्यत्र कुरुते यस्तु कृतं तस्य वृथा भवेत्॥ शौनकस्त्रेधा विभज्य सिद्धान्नं त्रिः प्रोक्ष्य पुरतः स्थितं॥ हवि
र्यदेकपात्रस्थं मध्ये दैवं तयोतरे॥ भौतिकं पितृकं याम्ये मानुष्यं चान्यपात्रके॥ देवभूतपितॄणां च तत्तद्भावे भवेत्क्रमात्॥
उत्ताने न तु हस्तेन गुष्ठाग्रेण पीडितं॥ सहतांगुलिपाणिस्तु वाग्यतो जुहुयाद्धविः॥ कृत्वा हस्ते नेस्तूर्याय त्यादिभिर्दशभिस्त
था॥ कृत्वयज्ञ प्रकुर्वीत ह्यग्नेरुत्तरदेशतः॥ एभिर्भूमि बलिं दत्वा प्राक् संस्थां स्तां निरंतरां॥ भुक्तांतरालं प्राक् संस्थं नत्य द्द
त्याभिहुतात्॥ इहापि भवति स्वाहाकारो न पित्र्ययज्ञके॥ अद्भ्यो हुता बलेः प्रत्यगिंद्रायेति बलिं हरेत्॥ उदगिंद्र बलेरिंद्रपु
रुषोभ्यो बलिं हरेत्॥ यमायेत्यंतरालस्य हरेद्दक्षिणतो बलिं॥ याम्याद्बलिरुदग्यमपुरुषेभ्यो बलिं हरेत्॥ प्राच्यां ब्रह्म बले
कृत्वा वारुणायेति मंत्रितः॥ अस्मादुदक् वरुणपुरुषेभ्यो वै बलिं हरेत्॥ सोमायेत्यंतरालस्य हरेदुत्तरतो बलिं॥ सौम्याद्ब
लेरुदक् सोमपुरुषेभ्यो बलिं हरेत्॥ यजंत स्वाह वास्त्वं तान् बलिं हृत्वा निरंतरान्॥ भुक्तांतराले मिंद्रादिदिग्देवानां बलिं
हरेत्॥ ऐंद्रादिबलितः प्राच्यां यद्वास्यापो रुषो बलिः॥ अंतराले बलिं कृत्वा शिष्टैर्मंत्रैरतः परं॥ रक्षोभ्य इति सर्वासां ब

गृह द्वारादिषूल्लिपेत्॥ चंडालपतितादिभ्यो भूतयज्ञनशेषतः॥ सुविकृतबलिदानं भूतयज्ञविधानं शिशिरभिपरमविश्वेद्य
स्रु वत्सोवगीये॥ अज वृषतुरगाद्यैः स्थानमेतेषु दद्यादिह वदतिवसिष्ठो शौनको नित्ययज्ञे॥ सूर्यादिदशभिर्मंत्रैर्हुत्वातु प
रिषिंचयेत्॥ ततो व्याहृतिभिर्हुत्वात्कुदगग्रे बलिं हरेत्॥ प्रागादीशानपर्यंतं मंगुल्यग्रे महीतले॥ बदरीफलमात्रान्नं
घृतक्षीरसमन्वितं॥ सूर्यादिवास्तुपर्यंतं नैरंतर्येण तान् हरेत्॥ पूर्वपश्चिमभागेतु प्राकूसंस्थं बलिमाहरेत्॥ दक्षिणो
त्तरभागेतु उदक्संस्थं बलिं हरेत्॥ वक्रमध्येतु पंचानां प्राक्संस्थं ब्रह्मपौरुषे॥ दक्षिणे चैव विश्वेभ्यः सर्वेभ्य इति पश्चिमे॥
उत्तरे च दिवेत्यादि नक्तं नक्तमित्यादिना निशि॥ ईशान्यां तु बलिं चक्रादक्षेभ्योथ बलिं हरेत्॥ तथा तृतीयभागाच्च त्याग्र
येनि नयेद्धविः॥ अपसव्यं स्वधेत्यादिमंत्रेण पितृतीर्थतः॥ नाम गोत्रं समुच्चार्य बलिं हरेत् तस्मात्तृतीयं दद्यात्ततो द्विजः॥
पितृयज्ञान्नशेषेण तथा नैर्ऋत्यकोणके॥ पश्चाद्वायव्यकोणेतु शुनो बलिं तथाहरेत्॥ स्वाहाकारश्चोपवीतीति पितृती
र्थेन तत्तयोः॥ द्वितीयामथ बलौ चैतौ श्यानो देवप्रणोदितौ॥ देवले वा पितृत्वं वायाम्यां दद्याद्बलिं सुधीः॥ द्वात्रिंशन्मंत्रकेचेते
गृहमध्ये तु दत्वा दिक्षु च नस्त्वं॥ सिद्धादिभ्यो बलिं दद्यात्समंतात्पूर्वतः क्रमात्॥ देवयज्ञान्नशेषेण वायसेभ्यो ब
लिं हरेत्॥ न पश्येद्भूबलिं वीरदत्ता गृह बलिं द्विजः॥ स्वयं नैव हरेन्मोहाद्दुसरे च्छ्रीर्विनश्यति॥ चंडालपतितेभ्यश्चापि
तृयज्ञान्नशेषतः॥ वायसेभ्यो बलिं रात्रौ नैव दद्यान्महीतले॥ येभूताः प्रचरंतीति पात्रे दद्याद्बलिं सुधीः॥ इत्थं कुर्याद्द्विजो
यज्ञान्दिवानक्तं च नित्यशः॥ वैश्वदेवं दिवा नक्तं न भवेच्च पृथक्पृथक्॥ प्रातरेव द्विरावृत्त्या कर्तव्यं स्मृतिशासना

त्॥ सूर्यादिभ्यो हुनेत्पूर्वमग्न्यादिभ्यस्ततः परं॥ हुत्वा व्याहृतिभिः पश्चाद्भूतयज्ञस्तथैव च॥ शब्दात्पितृयज्ञस्तथैवेति॥ उपस्था
नं स हुत्वा कार्यं सकृत् स्वगृहे बलिं॥ दद्याद्वै वायसादिभ्यो भूतेभ्यश्च बलिं सकृत्॥ असंस्कारप्रतीताश्च द्वारे तिष्ठंति ये मम॥
ते सर्वे तृप्तिमायांतु दर्वी धौतेन वारिणा॥ विभक्तवैश्वदेवं॥ साग्नयोथ कपाकाद्यपुत्रभ्रातादयो यदि॥ नष्टथकु वैश्वदेव
स्युः स्वपाकान्निर्वपेद्यदि॥ एकपाके निवसतां पितृदेवद्विजार्चनं॥ एकं भवेद्विभक्तानां तद्देवस्यात्पृथक्पृथक्॥ कारिका॥ कु
र्वीत स्नानकश्चैवं पृथक्पाकी भवेद्यदि॥ अन्नाभावे प्रहरहः कर्तव्यं पायसादिना॥ शाकलः॥ अविभक्तेन संसृष्टेष्वेके
नापि तु यत्कृतं॥ देवायज्ञादिकान्सर्वान्नूनं किं केनो कृतं यदि॥ संस्कारान्नाग्निनः सर्वे कार्यान्नित्यत्व सिद्धये॥ संसृष्टाभा
ते रकुर्युः ब्रह्मयज्ञं पृथक्पृथक्॥ होमसंख्यैश्च भोक्तव्यमन्ने योपासने हुतं॥ अभ्येश्चैव नामोक्तव्यं भोक्तव्यं लौकिके हु
तं॥ अथाग्निक वैश्वदेवः॥ सायणीये॥ साग्निकः पितृयज्ञांते बलिकर्म समाचरेत्॥ संग्रहे॥ हुत्वा व्याहृतिभिश्चान्नं हुत्वा शा
कलकादिभिः॥ भूतेभ्यश्च बलिं दद्यादन्नमश्नात्यनग्निमान्॥ धृतांगुष्ठेन सव्यस्य ब्रह्मसूत्रं करस्य तु॥ दद्याद्दन्नं वैश्वदेवे पितृ
भ्यः स पिता पितुः॥ अनग्निकस्तु यो विप्रश्चान्नं व्याहृतिपूर्वकं॥ हुत्वा शाकलमंत्रेण शेषं काकबलिं हरेत्॥ अन्नं व्याहृतिभि
र्हुत्वा मंत्रैः शाकलः शाकलश्चारवंजेः॥ प्रजापते हविर्हुत्वा पूजयेद्दत्तिर्थं स्ततः॥ अथ सूतके त्याज्यं॥ वैश्वदेवं तथा श्राद्धं ब्र
ह्मयज्ञं च सूतके॥ न कुर्यात्स्वयमन्यैश्च कारयेन्नं न सर्वदा॥ स्मृत्यर्थसारे॥ कुर्यात्पंच महायज्ञान्नित्यं शास्त्र कंदिना॥
नित्यं निमित्तिके काम्ये सूतकेपि न हापयेत्॥ नित्यमौपासनं नैमित्तिकमुपरागे स्नानदानादिकं॥ काम्यमाश्वयुजिचं
डिकापूजनं च सर्वथा न त्यजेदन्ययेकारयेदित्यर्थः॥ तथा च॥ संध्यामिष्टिं चरुं वामं यावज्जीवं समाचरेत्॥ न त्यजेत्सूतके

वापिगदादौ नत्य द्विजो द्विजः॥ नित्यं नैमित्तिकं काम्यं यत्तत्कर्म प्रचोदितं॥ सूतकादिनिमित्ते तु हावयेन्नतु हापयेत्॥ सूतके
मृतके चैव ह्यशक्तौ श्राद्धभोजने॥ प्रवासादिनिमित्ते तु हावयेन्नतु हापयेत्॥ सूतके तु समुत्पन्ने स्मार्त्तं कर्म कथं भवेत्॥ पिं
डयज्ञं चरुं होमं सगोत्रेण कारयेत्॥ पिंडयज्ञ पिंड पितृयज्ञं चरुः स्थालीपाकं होमं नित्योपासनं चान्येन कारयेदित्यर्थः॥
अथ ब्रह्मयज्ञः॥ यत्स्वाध्यायमधीते स ब्रह्मयज्ञ इति सूत्रं॥ स्मृतिः॥ प्रातश्चेत्तं संगवादूर्ध्वं मंते वा नित्यकर्मणां॥ अथवा वै
श्वदेवांते ब्रह्मयज्ञस्त्रिधा स्मृतः॥ इति कालत्रयमुक्तं तत्र स्वशाखोक्तो ज्ञातव्यः॥ आश्वलायनानां कालमाह॥ शौनकः॥ आव
र्तिने गवाह्याप कुशपाणिस्तु बह्वृचः॥ ब्रह्मयज्ञं प्रकुर्वीत संध्यामाध्याह्निकीं ततः॥ स्नानं कृत्वा तु मध्याह्ने द्विजः संध्यामुपास्य
तु॥ ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तु द्विजोत्तमैः॥ अथ कारिका॥ ग्रामात्प्राच्यामुदीच्यां वा यात्रा दिक् स्यादनिंदिता॥ आपो वगा
ह्य तु स्नाय तु उपवीत्यं वसन् द्विजः॥ धौत शुद्धांबरे कुर्यात्कर्मं गाचमनं ततः॥ दर्भान्बहून् शुचौ देशे प्रागग्रानास्तृणात्तथा॥
आश्वलायनर्षिः॥ सव्यस्य पाणेरंगुष्ठप्रदेशिन्योस्तु मध्यगा॥ दक्षिणास्यांगुलीर्न्यस्य वतस्तोंगुष्ठवर्जितः॥ तथा सव्यकरां
गुष्ठं दक्षिणांगुष्ठवेष्टितं॥ संबंधमेव कुर्वीत न्यसेद्दक्षिणजानुनि॥ कारिका॥ दर्भेषूपविशेत्कर्माण्यत्र प्राङ्मुख एव सन्॥
कृत्वोपस्थं करे सव्ये उत्ताने प्रादिगंगुले॥ शाकल्यः॥ वामं संपातयेज्जंघं दक्षिणं स्यात्समुन्नतं॥ नीच प्रागंगुलं तेन संहा
त्या दक्षिणे करे॥ ऊर्ध्वतिर्यगधास्ताद्वा न क्षेत यदि वाक्षिणि॥ संमूल्य देन चात्मानं समाहितमना भवन्॥ सूक्तादिर्न भवत्तं पूर्व
मभिसंधाय शक्तितः॥ ॐ पूर्वा व्याहृतीस्तिस्रः समस्तास्तु सकृद्वदेत्॥ पश्चात्यर्धर्चशः सर्वां सावित्रीं त्रिर्वदेत्तथा॥ पूर्वाभि
संहितं यावत्तद्धीत्य समाहितः॥ अग्निमीळ इतीत्यादीन्वेदांश्चापि स शक्तितः॥ नमो ब्रह्मण इत्येतां त्रिरुक्त्वा प्रणवं वदे १२

लिभुक्तरतो हरेत्॥ भूतयज्ञोयमुदितः प्राचीनावीत्यतः परं॥ स्वधा पितृभ्य इत्युक्त्वा दक्षिणस्यां तु निर्वपेत्॥ पितृयज्ञेन मुदि
तो नरश्चैतत्त्रयं भवेत्॥ अथ यज्ञो मनुष्याणां कर्तव्यः सनकादिनां॥ आम्नायेवायवान्यत्र केचिदाकुर्मनीषिणः॥ शौनकः॥
त्रिधा विभज्य सिद्धान्नं त्रिः प्रोक्ष्य पुरतः स्थितः॥ हविर्द्वयेकपात्रस्थं मध्ये देवं तथोत्तरे॥ भूतिकं पैतृकं याम्ये मनुष्यार्थं त्व
न्यपात्रकं॥ आयुरारोग्यकामो वा ध्वजाकारं बलिं हरेत्॥ मृत्युरोगविनाशार्थं नराकारं बलिं हरेत्॥ आयुरारोग्यसौ
भाग्यं पुत्रविद्यापशूंस्तथा॥ कामांश्च धर्ममोक्षार्थं चक्राकारं बलिं हरेत्॥ आयुरारोग्यसौभाग्यं पुत्रविद्यापशूंस्तथा॥ कामांश्च
धर्ममोक्षार्थं चक्राकारं बलिं हरेत्॥ चक्राकारं मथाष्टारं कुर्यादग्निसमीपतः॥ प्रागादीशानपर्यंतं मंडुलत्यग्रे महीतले॥
बदरीफलमन्नं तत्तद्घृतक्षीरादिमिश्रितं॥ प्रागादीशानपर्यंतं नैर्ऋतमेण तान्हरेत्॥ इंद्रायेंद्रपुरुषेभ्यः प्राचीप्राक्संस्थ
सोमायेति तथोत्तरं॥ चक्रस्य मध्यदेशे तु ब्रह्मणे बलिमाहरेत्॥ अथ पूर्वे तथा ब्रह्मपुरुषेभ्यो बलिं हरेत्॥ ब्रह्मणो दक्षिणे
देशे वैश्वदेव बलिं हरेत्॥ ब्रह्मणः पश्चिमे देशे सर्वेभ्यो भूतये तथा॥ ब्रह्मणश्चोत्तरे देशे दिवाचारभ्य इत्यथा॥ रक्षोभ्यो
इत्युत्तरतः स्वधा पितृभ्यो नमः मत्॥ चक्रस्य नैर्ऋत्ते देशे श्यामाय च बलिं हरेत्॥ चक्रस्य वायुकोणे तु शबलाय बलिं हरेत्॥
चक्राकारेणायो विप्रः सदा भक्त्या बलिं हरेत्॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात्॥ पितृयज्ञस्य शेषेण नरयज्ञमथो
च्यते॥ पुष्करस्य प्रमाणान्नेम न्यपात्रे समुद्धरेत्॥ अक्षतोदकहस्तेन चोपवीती निवेदयेत्॥ योगिभ्यः सनकादिभ्य इ
दमन्नं नमेति च॥ तदन्नं विप्राय कुर्याद्गृह्य बलिं न च॥ अन्नशुद्धि बलिं ह्यायुरन्नदोषै न लिप्यते॥ देवयज्ञान्नदोषेण

त्॥आर्षं छंदांसि दैवत्तद्ध्यज्ञे तर्पणकर्मणि॥ शौनकः॥ आचम्य बह्वृचः कुर्याद्ब्रह्मयज्ञं च तर्पणं॥ ततो निष्पीड्य हस्तं च ह्युपवीती समा
चरेत्॥ समाचम्य यजुश्शाखी ब्रह्मयज्ञं समाचरेत्॥ पुनराचम्य देवादीन् संतर्प्य पुनराचमेत्॥ अपां समीपमागत्य तर्पयेदथ
देवतान्॥ अन्वारब्धेन सव्येन दक्षिणेन तु पाणिना॥ एवमंतानि तृप्यंतु चेत्येतैः प्रतिमंत्रकं॥ तेनैवाथ परस्मैपदेन वचनेन॥ सि
चेत्प्रजापतिस्तृप्यत्वित्सपो देवतीर्थतः॥ धातुस्थस्यैर्यथालिंगमंत्रांतेषु प्रयुज्यते॥ मंत्रैः शतर्चिनस्तृप्यंत्वित्यादिभिरतः परं॥
प्रतिमंत्रं निवीती तु तर्पयेद्ध्यृषितीर्थतः॥ देवतास्तर्पयित्वाथ व्रातर्कि प्रभृतीनथ॥ ऋषीन् द्वादशैसंतर्प्य सनकादींश्च सप्त वै॥
प्राचीनावीत्यथो दान् तर्पयेत्॥ पितृतीर्थतः॥ सुमत्यित्यादिभिर्मंत्रैः प्रतिमंत्रं च पूर्ववत्॥ द्वितीयांतेषु मंत्रेषु तर्पयामि पदं वदेत्॥
पितरं चाथ नामाणां गोत्रं संतर्पयेत् क्रमात्॥ तथा चाखिलसंहितायां॥ तर्पयेत् पितृन् स्त्रीनादौ ततश्चैव तु मातरं॥ साप
त्नमातरं पश्चात् पितामाद्यादिकान् क्रमात्॥ आदौ पिता तथा माता सापत्नजननी तथा॥ मातामहा सपत्नीका आत्मप
त्नी ततः परं॥ सुतभ्रातृपितृव्याश्च मातुलाः सहभार्यकाः॥ दुहिता भगिनी चैव दौहित्रो भागिनेयकाः॥ पितृष्वसा मातृष्वसा
श्वशुरो गुरुरित्यथा॥ एते स्युः पितरस्तीर्थे तर्पणे च महालये॥ याज्ञवल्क्यः॥ सवर्णेभ्यो जलं देयं तत्तु पूर्वोक्तसारतः॥ नामगो
त्रस्वधाकारैस्तर्पयेत्तु पृथक्शः॥ स्मृत्यर्थसारे॥ वसुरुद्रादित्यरूपांश्चाधार्थे तर्पयेत्पितॄन्॥ नामगोत्रस्वधाकारैः प्रत्ययंतं तर्प
येत्सुधीः॥ एकैकमंजलिं देवा द्वौ द्वौ सनकादयः॥ अर्हंति पितरस्त्रीस्त्रीं स्त्रियश्चैकैकमंजलिं॥ मातृमुख्यश्चया तिस्रः
तासामप्यंजलित्रयं॥ दद्यादेकैकमन्यासां त्रीणि चैवांजलिं बुधः॥ पितृणां चैव देवानां जलेदद्याज्जलांजलिं॥ नि

लत्तर्पयुतंतोयंस्वधयायत्रदीयते॥तत्तोयममृतंभूत्वापितॄणांदत्तमक्षयं॥भूमौयस्तर्पणंकुर्यात्लोहेकांस्येचमृन्मये॥तर्ज
न्यंगुष्ठयोगेनसपुत्रःपितृघातकः॥स्थलेवापिसुचौदेशेकुशास्तीर्णेषुभाजने॥ताम्रादिकेचपर्णेवातर्पयेत्सीतलेजले॥
पाणिनैकगुणंप्रोक्तंदर्भैःशतगुणंततः॥अक्षय्यंखड्गपात्रेणपितॄणांतर्पणंभवेत्॥तर्पितेयेनतीर्थेनगृह्णीयात्तेनवैजलं॥
अन्यथाकुरुतेयस्तुनरकंप्रतिपद्यते॥अथतिथिस्थतर्पणं॥विवाहेचोपनयनेचास्तिसन्तियथाक्रमः॥वर्षमर्धंतदर्धंतुने
त्येकेतिलतर्पणं॥सप्तम्यांरविवारेचजन्मर्क्षेदिवसेषुच॥गृहेनिषिद्धंसलिलंतर्पणंसर्वदापिच॥भानुवारेभौमवारेनंदाभृ
गुमघासुच॥रात्रौदशम्यांसप्तम्यांभरण्यांकृत्तिकासुच॥अयनद्वितयेचैवचतसृषुयुगादिषु॥पिंडदानंमृदास्नानंनकु
र्यात्तिलतर्पणं॥अर्केशुक्रेत्रयोदश्यांमध्यायांनिशिसंध्ययोः॥गृहेमृताहेजन्मर्क्षेनकुर्यात्तिलतर्पणं॥पवित्रंकौशिकं
ताम्ररजतंहेममेवच॥धारयेद्दक्षिणे॥पाणौपवित्रंचोत्तरोत्तरं॥तिलानामप्यभावेतुसुवर्णरजतान्वितं॥तदभावेतुकुर्वी
तदर्भैर्मंत्रैश्चतर्पणं॥इदंतुनित्यविषये॥अथविशेषःकथ्यते॥प्रेतपक्षेव्यतीपातेसंक्रांतौतिथिपर्वसु॥निषिद्धेहिति
थौवारेकर्तव्यंतिलतर्पणं॥उपरागेव्यतीपातेगंगायामथपर्वणि॥आदित्यादिनिषिद्धेपिकर्तव्यंतिलतर्पणं॥नद्यांती
र्थविशेषेषुप्रेतकार्येतथैवच॥निषिद्धेपिदिनेकुर्यात्पिंडदानंतिलोदकं॥प्रेतपक्षेचगंगायामुपरागेतथैवच॥कृताह्
हेपिकुर्वीततर्पणंतिलसंयुतं॥व्यतीपातेचसंक्रांतौयुगमन्वंतरादिषु॥तर्पयित्वापितॄन्पश्चाच्छ्राद्धंकुर्यात्प्रयत्न
तः॥पक्षश्राद्धेहिरण्येचपश्चाद्दद्यात्तिलोदकं॥तथाचैवाष्टकाश्राद्धेश्राद्धेचैवानुमासिके॥कृत्वातुमासिकंश्राद्धंस

निस्तारयत्तिदुर्बोधचमहतश्चैवकिल्बिषात्॥ इतिश्रीनारायणभट्टविरचितायांधर्मप्रवृत्तौशौचादितर्पणांतंप्रकरणंसमाप्तं॥
अथदिवातीतकर्माण्याह॥ नकृतानिप्रमादाच्चप्रातःकर्माणियानिच॥रात्रावपिचकार्याणिविनासौचंचतर्पणं॥दिवोदितानिक
र्माणिप्रमादादकृतानिवै॥शर्वर्याःप्रथमेपादेतानिकुर्याद्यथाक्रमं॥रात्रौप्रहरपर्यंतंदिवाकर्माणिकारयेत्॥अवगाहंचसौरंच
ब्रह्मयज्ञंचवर्जयेत्॥दिवोदिताःक्रियाःकार्यारात्रावपियथाक्रमं॥अवगाहंविनासौरंब्रह्मयज्ञंचतर्पणं॥केचिद्रात्रावपिब्रह्मवि
दुषोयज्ञमिच्छति॥ग्रामेमननस्वाध्यायमधीयीतदिवानक्तंवेत्यापस्तंबविषयं॥तथचस्मृति॥आचार्याःकेचिदिच्छंतिरात्रावपितुतर्प
णं॥ऋग्यजुःशाखिनामेवनान्येषांतुविधीयते॥मध्याह्नसमतिक्रांतेसायंकालेभवेद्यदि॥सायंसंध्यामुपास्यादौसंध्यामध्याह्नि
कीततः॥सायंकालेव्यतीतश्चेदस्तंयातेदिवाकरे॥कुर्यादावर्तनीसंध्यांसमारभ्ययथाक्रमं॥आवर्तनोमध्याह्नास्तस्थेयंसंधेत्य
र्थः॥कुर्वीतावर्तनीसंध्यांरात्रावपिनदुष्यति॥दद्यादर्घ्यंतुगायत्र्यासौरसूक्तंविवर्जयेत्॥मध्याह्नसंध्यारात्रौचेत्प्रमादात्क्रि
यतेयदि॥सौरस्थानेजपेत्सूक्तंसौरवैश्वानरीयकं॥ ॥अथदेवतार्चनं॥अग्नौचैवाथवासूर्येप्रतिमायांजलेपिवा॥पूजयेद्भक्ति
भावेनप्रत्यहंपरमेश्वरं॥नारायणंमहादेवमादित्यंगणनायकं॥शक्तिंश्चैवाथपंचैताप्रत्यहंपूजयेद्द्विजः॥देवतास्थापयेद्धीरस्था
वरेप्राङ्मुखादिषु॥गृहादौजंगमेवापिस्थापयेत्प्रत्यगाननाः॥अभीष्टदेवतांमध्येस्थापयेतान्यथाक्रमं॥यदामध्येभवेच्छंभु
रीशान्यांपूजयेध्धरिं॥आग्नेय्यांपूजयेत्सूर्यंनैऋत्यांगणनायकं॥वायव्यांपूजयेद्देवीमित्येतान्वैयथाक्रमं॥तथाचसंग्रहे॥
शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवेहरगणेशाजांबिकास्थापिता॥देव्यांविष्णुहरेकदंतरवयोलं
बोदरेजेश्वरेनार्मीःशंकरभागतानिष्टुभदाव्यस्तास्तुहानिप्रदा॥अथागमविषयेप्राचीलक्ष्यते॥पूज्यपूजकयोर्मध्येप्रा

चीमित्यभिधीयते॥नैशानंपूजकापेक्ष्यंपूज्यापेक्षंतुनद्भवेत्॥देवस्यमुखमारभ्यदिशंप्राचींप्रकल्पयेत्॥तदादिपरिवाराणांमंगाद्या
वरणंक्रमात्॥यस्मिन्विवस्वान्विषुवत्कदेतिप्राचीतितांवेदविदोवदंति॥मध्येतुनःपूजकपूज्ययोश्चसदागमज्ञाःप्रवदंतिसंतः॥
मुख्येषुपुष्पांजलिंदत्वागणेशाद्यर्चनंभवेत्॥गणेशएवमुख्यश्चेत्तत्रसूर्यक्रमाद्भवेत्॥गणेशार्कौसमभ्यर्च्यरुद्रोवोविष्णुःप्रपूज
येत्॥अर्चयेच्चशिवंपश्चात्शिवमादौतुवैष्णवः॥ततोविष्णुस्ततोदुर्गाएवंस्यादर्चनक्रिया॥अर्चयेद्देवविप्रश्चशिष्टाचारोय
थाभवेत्॥हैमराजततास्राणांसर्वेषामर्घ्यभाजनं॥शिवसूर्यौपरित्याज्यंशंखेन्यत्रप्रशस्तते॥आवाहनासनंपाद्यमर्घ्यमाचम
नंभवेत्॥स्नानवस्त्रोपवीतानिगंधपुष्पेचधूपकं॥दीपंनैवेद्यतांबूलेआदक्षिण्यैर्विसर्जनं॥प्रत्यचाप्यूजयेद्देवंस्नापयेत्पौरुषेण
च॥शालग्रामेस्थावरेचनावाहनविसर्जनं॥शालग्रामशिलायांतुनित्यंसंनिहितोहरिः॥स्नापयित्वार्चयेद्देवंयदिच्छेत्पु
ण्यमात्मनः॥चर्मण्योष्टिकमायासेपाषाणेनोपवेशयेत्॥स्नानवस्त्रेचनैवेद्येदद्यादाचमनीयकं॥अंगलग्नंचजीर्णंचवस्त्रं
देवेनचार्पयेत्॥नांगुल्यामर्दयेद्देवंधाधःपुष्पंसमर्पयेत्॥कराग्रेनक्षिपेत्तोयंवज्रपातसमंभवेत्॥जलंपर्युषितंत्याज्यंपात्राणि
कुसुमानिच॥तुलस्यगरुबिल्वंचमार्जनंजाह्नवीजलं॥नाक्षतैरर्चयेद्विष्णुंनतुलस्यागणेश्वरं॥सर्वाभिर्नार्चयेद्देवंनकेत
क्यामहेश्वरं॥शालग्रामशिलामेवंनाक्षतैरर्चयेद्द्विजः॥अर्चयेद्यदियोमोहात्पूजातस्यतुनिष्फला॥मृन्मयेभिन्नपात्रेचपा
षाणलोहकाष्ठजे॥पल्लवकरभूम्यास्तुनैवेद्यंनचदापयेत्॥अग्राह्यंशिवनिर्माल्यंपत्रंपुष्पंजलं॥शालग्रामस्यसंपर्कात्स
र्वयातिपवित्रतां॥येर्चयेद्विधिवद्भक्त्यायरानित्तिश्चसाधनैः॥पूजाफलार्धमवाप्यनसमग्रफलंभवेत्॥एकंविनायकेकुर्याद्द्वे
देसूर्येत्रीणिशंकरे॥चत्वारिंशकेशवेप्रोक्तासप्तशक्तेःप्रदक्षिणा॥समभ्यर्च्यपिबेद्द्वान्यःपादसलिलंहरेः॥सयातिपरमं

स्थानं तद्विष्णोः कैरै परमं ॥ विष्णुपादाभिषिक्तं यत्पात्रेणैव पिबेज्जलं ॥ सर्वपापविनिर्मुक्तो संयाति परमं पदं ॥ यः पादसलिलं विष्णोः
१८ करेणापिबते यदि ॥ स मूढो नरकं याति यावदिंद्राश्चतुर्दश ॥ अथ नित्यश्राद्धं ॥ ॥ तत्रेदं सूत्रं ॥ यत्पितृभ्यो ददाति स पितृयज्ञ इ
ति ॥ तथा च मनुः ॥ स्वाध्यायेनार्चयेदृषीन्होमैर्देवान्यथाविधि ॥ पितॄन्श्राद्धेन नॄनन्नैर्भूतानि बलिकर्मणा ॥ कुर्यादहरहः श्रा
द्धमन्नाद्येनोदकेन वा ॥ पयोमूलफलैर्वापि पितृभ्यः प्रीतिमाहरेत् ॥ एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके ॥ न चैवात्राशयेत्
किंचित् वैश्वदेवं प्रति द्विजं ॥ याज्ञवल्क्यः ॥ नित्यं श्राद्धं देवहीनं नियमादिविवर्जितं ॥ दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितं ॥ आ
वाहनस्वधाकारं पिंडाग्नौकरणादिकं ॥ ब्रह्मचर्यादिनियमान्विश्वेदेवांस्तथैव च ॥ नित्यश्राद्धे त्यजेद्धीमान्भोज्यमन्नं प्रकल्पये
त् ॥ भोक्तृभावे तथा देवान्नं गोभ्यश्चैव निवेदयेत् ॥ नित्यश्राद्धमदैवं स्यादर्घ्यपिंडादिवर्जितं ॥ नामंत्रणं न होमं च नावाहनविसर्ज
नं ॥ श्राद्धादिनियमो नास्ति किंचिद्दत्वा विसर्जयेत् ॥ षड्दैवत्यं भवेच्छ्राद्धं कर्तव्यं प्रत्यहं द्विजैः ॥ नित्यकर्म समाप्याथ ब्राह्मणः
श्रद्धयान्वितः ॥ अपसव्येन कर्तव्यं नित्यश्राद्धमदैवतं ॥ पितृमुद्दिश्य विप्रस्य भोक्तुमभ्यागतस्य च ॥ पादप्रक्षालनं कुर्यान्ना
मगोत्रं समुच्चरेत् ॥ अर्चयेद्वासनं दत्वा नमो वः पितरस्तथा ॥ गंधपुष्पादिकं दद्याद्भोज्यान्नं परिवेषयेत् ॥ भोजने स घृतं चान्नं
गायत्र्या चाभिमंत्रयेत् ॥ इदं विष्णुरिति मंत्रेण पितृभ्योऽन्नं निवेदयेत् ॥ ये चेह इत्यति मंत्रेण पितॄणां स्तुतिमारभेत् ॥ ब्रह्मार्पणं ब्रह्म
हविरित्युक्त्वा विनिवेदयेत् ॥ बालाः सुवासिनी वृद्धाः स्तथैवातुरकन्यकाः ॥ संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनं ॥ चित्राहु
तिप्रदानांतं कृत्वा भोजनमाचरेत् ॥ सपंक्तौ ब्राह्मणस्यापि भुंजीयात्सह बंधुभिः ॥ अथ भोजनविधिं मनुः ॥ सायंप्रातर्द्वि
जातीनामशनं श्रुतिचोदितं ॥ नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥ गोभिलः ॥ नतो जनवेलायां कृत्वा चारं सदा द्विजैः ॥ १९

पिंडीकरणात्परं ॥ वैश्वदेवं ततः कुर्यात्तर्पणं तिलसंयुतं ॥ दर्शे तिलोदकं पूर्वं पश्चाद्दद्यान्महालये ॥ आष्टिकेनापरं पूर्वं परेहनि ति
लोदकं ॥ तीर्थश्राद्धे गयाश्राद्धे प्रत्यब्दे च महालये ॥ आष्टिके नापरं पूर्वं परेहनि तिलोदकं ॥ परेहनि द्विजः कुर्यात्तर्पणं तिलसं
युतं ॥ पक्षश्राद्धं तु निर्वृत्यात्तर्पणं स्याद्दिने दिने ॥ सकृन्महालये दद्यात्परेह्नि तिलोदकं ॥ वृद्धिश्राद्धे सपिंडे च प्रेतश्राद्धे नु
मासिके ॥ परेहनि विमुक्ताख्ये न कुर्यात्तिलतर्पणं ॥ श्राद्धाहे तिलतर्पणं ॥ पित्रोः प्रत्याब्दिके प्राप्ते तर्पणं तु कथं भवेत् ॥ ज
लेनैव प्रकर्तव्यं निवृत्ते पितृकर्मणि ॥ श्राद्धं कृत्वा तु विधिवद्वैश्वदेवादिकं ततः ॥ ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तु तिलैर्विना ॥
हारिता ॥ ततः परेद्यु कुर्वीत तर्पणं पुरुषः सुधीः ॥ तच्छेषस्तिलदर्भैस्तु प्रातः स्नाता मृते जले ॥ श्राद्धं तु कृत्वा पूर्वेद्युः प्रातः स्नाय
त्परेहनि ॥ पितृश्चैवाथ संतर्प्य पश्चात्संध्यादिकाः क्रियाः ॥ तर्पणं त्वमृतं प्रातः द्वितीयाप्रहरे पयः ॥ तृतीये जलमित्याहुश्च
तुर्थे रुधिरं भवेत् ॥ प्रयोगपारिजाते ॥ स्नात्वा तीरं समासाद्य उपविश्य कुशासने ॥ संतर्पयेद्धः तत्पितॄंस्तत्र स्नानवस्त्रं च धारयेत् ॥
यस्तु तर्पयति प्रातः कृत्वा श्राद्धं परेहनि ॥ पितरस्तुष्टिमायांति न च कुप्यंति वै ध्रुवं ॥ परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् ॥ अतस्मात्
पितरस्तस्य शापं दत्वा व्रजंति ते ॥ श्राद्धांगतर्पणं कुर्यात्सतिलं स्वपरेहनि ॥ पित्रोर्विषय एवं स्यान्न चान्यविषये भवेत् ॥ जीवमानपिताय
स्य माता यदि पैविपद्यते ॥ मातुः श्राद्धं सुतः कुर्यान्न कुर्यात्तिल पतर्पणं ॥ इति प्रसंगात्कथितं ॥ अथेतु ब्रह्मयज्ञस्य भिक्षादानादि रक्षणं ॥
कुर्यात्तिष्ठन्शयानो वा ब्रह्मयज्ञं समं भवेत् ॥ देशे शुचिः स्वयं वा स्यात्तद्ध्यान ध्यायमिष्यते ॥ वागूर्ध्वं वा भवेच्चायं वैश्वदेवाख्यकर्मणं तु र्ध्वं म
नुष्ययज्ञः स चेष्टोऽतिथिपूजनं ॥ स्वशक्त्या भोजयेद्विप्रानतिथीन्समयागतान् ॥ मनुः ॥ विद्यातपःसमिद्धेषु हुतं विप्रमुखाग्निषु

घृतक्त मभिमंत्रयेत्॥ अन्नंमध्येप्रतिष्ठाप्य दक्षिणेघृतपायसं॥ शाकादिंतुरतरछाय भक्ष्यंभोज्यंचामतः॥ पानीयंपायसंचैव दद्याद्वा
कुरुश्चदक्षिणं॥ पात्रंघृत्वातु वामेनयावस्यांद्भोजनंहितत्॥ पाणिंदक्षिणेनैव पर्युक्ष्यपरिषेचयेत्॥ आसनंपादमारुह्यबहिर्जीपाति
रतथा॥ हसनेवदत्तश्चैवनिराशाः पितरोगताः॥ अंगुष्ठतर्जनीचैवमध्यमाचतृतीयका॥ तिस्रेषुकोकंगुल्लीचैवप्रशस्तंपात्रधार
णे॥ सत्यंत्वर्त्येनवैप्रातर्वारिणापरिषेचयेत्॥ सायंकालेतथैवास्यदृतंत्वाचादितःक्रमात्॥ अनेनैवघृतातेन नमस्कारेयावद्भु
वि॥ तिस्त्रएकाहुतीर्दद्यात्भोजनादौतुदक्षिणे॥ सत्यणीये॥ उद्धृत्यकिंचिदन्नाग्रंधर्मराजायवैबलिं॥ दत्वाथचित्रगुप्तायप्रे
तेभ्यश्चेदमुच्चरेत्॥ स्मृतिः॥ बदरीफलमात्रंन्नंमगुल्यग्रैर्भुविक्षिपेत्॥ यमधर्मायचित्रायभूतेभ्यश्च ततोजलं॥ मनुः॥ दत्वातु
चित्रगुप्तायहस्तंप्रक्षालयेद्द्विजः॥ अप्रक्षाल्याकरौभुंक्तेरौरवंनरकंव्रजेत्॥ चित्राहुतिरनुद्धृत्यभुंक्तेयोग्रासपंचकं॥ अघंसके
केवलंभुंक्तेज्ञानतोज्ञानतोपिवा॥ स्मृतिचंद्रिकायां॥ भोजनादौबलिर्मुक्तःसमुद्धृत्यहिभोजनं॥ अनुद्धृत्यतुयोभुंक्तेप्रा
णायामाष्टकंचरेत्॥ उत्क्रामृतेपस्तरणमसिस्वाहांतमुच्चरेत्॥ आपोशानमितिप्राक्भोजनादौपिबेज्जलं॥ आपोशानमहृत्वा
तुयोभुंक्तेद्विजसत्तमः॥ अभोज्यंतद्भवेदन्नंभुंक्त्वाचांद्रायणंचरेत्॥ आपोशानंकरेघृत्वापात्रेकृत्वातिलोदकं॥ श्वानमूत्रस
मंतोयंपुनःस्मर्यतेयदि॥ आपोशानार्थयत्तोयधृतंचेन्निसृतंयदि॥ हस्तंप्रक्षाल्यतोयेनपुनस्त्वाधारयेज्जलं॥ आपोशान
करोविप्रोयथाशीर्वचनंपठेत्॥ अभोज्यंतद्भवेदन्नंदाताभवतिकिल्बिषी॥ यजमानकृतंपापंअन्नमाश्रित्यतिष्ठति॥ अन्नंनप्र
तिगृह्णीयात्कंठैःप्राणगतैरपि॥ अन्नंब्रह्मरसोविष्णुर्भोक्तादेवामहेश्वरः॥ एवंध्यात्वाद्विजोभुंक्तेह्यन्नदोषोनविद्यते॥ प्राणा
हुतिरहुत्वातुयश्चान्नंपरिमर्दयेत्॥ मर्दितंभोजयेद्यस्तुभुंक्त्वाचांद्रायणंचरेत्॥ अभ्यज्यसर्पिषैकेकांप्राणानानामेवचा

हुतिं॥ सत्यघ्वविधिनामंत्रैर्ॐनेत्प्राणाहुतिंतथा॥ घृतंवायदिवातैलंविप्रोनाद्यान्नखच्युतं॥ यमस्तमशुचिप्राहुस्तुल्यंगोमां
सभक्षणं॥ स्मृतिसारसमुच्चये॥ तर्जनीमध्यमांगुष्ठैःप्राणस्यचाहुतिर्भवेत्॥ मध्यमानामिकांगुष्ठैरपानेचाहुतिंक्षिपेत्॥ कनि
ष्ठानामिकांगुष्ठैर्व्यानायजुहुयात्बुधः॥ कनिष्ठतर्जन्यंगुष्ठैरुदानायजुहेद्बुधः॥ सर्वांगुलिभिरादायसमानस्याहुतिर्भवेत्॥ अ
नेनविधिनाविप्रोवाग्यतोभोजनंचरेत्॥ जीवत्पितृकसद्भोजनेमौननिषेधः॥ स्मृतिचंद्रिकायां॥ कनीयान्सपिताचैवमुक्त्वाश्राद्धि
कभोजनं॥ प्राणाग्निहोत्रादन्यत्रनसंमौनंसमाचरेत्॥ यदिभुंजीतवैतूष्णींसर्वत्रैवतुभोजने॥ सपापःपितरंहंतिभ्रातरंहंतिभ्रातसंन
तिध्रुवं॥ भोजनंश्राद्धिकंमुक्त्वाकनीयान्सपितापिच॥ मौनंभोजपात्रस्यधारणंपरिवर्जयेत्॥ वाग्यतोभोजनेकुर्यान्ब्रह्मचारीस
देवहि॥ कनीयान्पपितावास्यान्नसपापेनयुज्यते॥ पंचप्राणाहुतीर्हुत्वाब्रह्मग्रंथिंविसर्जयेत्॥ प्रक्षाल्यवामहस्तंतुपश्चा
द्भोजनमाचरेत्॥ तर्जन्यांतुस्थितेरौप्येब्रह्मग्रंथिंचमूर्धनि॥ कनिष्ठिक्यांस्थितेखड्गेनैवभोजनमाचरेत्॥ हुत्वाप्राणाहुतीरन्नंकिं
चिद्देव्यर्पयेत्पृथक्॥ यद्यद्दार्श्पितंवाद्यारक्षितमंतेनभोजयेत्॥ अनिधायपृथक्चान्नंगायत्र्याप्यभिमंत्रितं॥ पुनरन्नंनगृ
ह्णीयाद्यदिभुंजीतकिल्बिषी॥ मनुः॥ मधुपर्केचसोमेचअप्सुप्राणाहुतीषुच॥ आस्यहोमेषुसर्वेषुनोच्छिष्टोभवतिद्विजः॥
दक्षिणंतुपरित्यज्यवामेनीरंनिधापयेत्॥ अभोज्यंतद्भवेदन्नंपानीयंचसुरासमं॥ जलपात्रंतुनिक्षिप्यमणिबंधेचदक्षि
णे॥ भुक्तेकालेतुविप्रोवैपिबेदन्यत्रपाणिना॥ एकपंक्त्युपविष्टानांब्राह्मणानांसहभोजने॥ यद्येकोपित्यजेत्पात्रंशेषमन्नं
नभोजयेत्॥ भुंजानेषुचविप्रेषुयोग्रेपात्रंविमुंचति॥ समूढोनरकंयातिब्रह्महासतुजायते॥ अग्निनाभस्मनाचैवद

र्भपासतिलेनवा॥ अंतरेद्वारदेशेतुपंक्तिदोषोनविद्यते॥ एकपंक्त्युपविष्टानामन्यान्यंस्पृशतेयदि॥ भुक्तातदन्नमत्याज्यंगाय
त्र्याष्टशतंजपेत्॥ स्मृतिः॥ भवेदुच्छिष्टसंस्पर्शोभोक्तुर्वाभाजनस्यवा॥ अन्नंतदेवभोक्तव्यंनत्याज्यंभाजनेस्थितं॥ पुनरन्नंनभो
क्तव्यंयदिभुंजीतकिल्बिषी॥ ततश्चैवजपेद्देवींशतमष्टोत्तराधिकं॥ शेषमुद्धृत्यभोक्तव्यंश्रूयतामंत्रकारिणं॥ तस्मादद्यादन्न
शेषंस्मोदुर्गतिवृत्तये॥ भुक्त्वापीत्वातुयःपात्रंरिक्तंत्यज्यतियोनरः॥ सनरःक्षुत्पिपासोपिभवेज्जन्मनिजन्मनि॥ यत्रक्वच
नसंस्थानंक्षुत्तृष्णोपहतात्मनां॥ दुर्गतीनांमयादत्तमक्षय्यमुपतिष्ठतु॥ रौरवेपूयनिलयेपद्मार्बुदनिवासिनां॥ अदिनामुदकं
दत्तमक्षय्यमुपतिष्ठतु॥ अर्धंपिबत्तिगंडूषमर्धंत्यजतिवैभुवि॥ प्रीणातिपितरस्तस्ययेचान्येभूमिदेवता॥ यद्युत्तिष्ठेदनाचांते
भुक्तवानाद्द्विजः॥ यद्यस्नानंप्रकुर्वीतनान्यथाप्रयतोभवेत्॥ अंगिरः॥ उच्छिष्टोच्छिष्टसंस्पृष्टःश्वनाशूद्रेणवाद्द्विजः॥ उपोष्यरज
नीमेकांपंचगव्येनशुध्यति॥ श्वानंचशूद्रमुच्छिष्टंह्यनुच्छिष्टंतुयःस्पृशेत्॥ स्नानंविधीयतेतस्यपात्राणांचलनंविना॥ स्मृ
तिः॥ गंडूषकरणात्सर्वंहस्तंप्रक्षालयेद्द्विजः॥ हतंचैवंचघात्मानंचोपपातके॥ गौतमः॥ योवैगंडूषसमयेतर्जन्यावक्त्रक्षा
लनं॥ कुर्वीतयदिमूढात्मारौरवंनरकंव्रजेत्॥ आचांतोपिशुचिस्तावद्यावत्पात्रंनचोद्धरेत्॥ उद्धरेप्यशुचिस्तावद्यावद्भू
र्नप्रमार्जिता॥ रात्रौभोजनकालेतुयदिदीपोविनश्यति॥ पात्रंधृत्वातुपाणिभ्यांभास्करंमनसास्मरेत्॥ दृष्ट्वासद्युपुनर्दीपंत
त्छेषंभोजयेन्नरः॥ पुनरन्नंनभोक्तव्यंयदिभुंजीतकिल्बिषी॥ परपाकनिवृत्तिस्तुपरपाकरतस्तुयः॥ तयोरन्नंनभोक्त
व्यंभुक्त्वाचांद्रायणंचरेत्॥ परपाकनिवृत्तिस्तुवर्षेवर्षार्धमेववा॥ याचयेच्छ्रोत्रियस्यान्नंतदभावेजलंपिबेत्॥ श्रोत्रिया

पोष्यवर्गसमोपेतोभोजनंकारयेद्बुधः॥ मातापितागुरुर्भार्यापुत्रोदासस्तथैवच॥ अभ्यागतोऽतिथिश्चाग्निःपोष्यवर्गइतिस्मृतः॥ स्मृति
सारसमुच्चये॥ प्राङ्मुखस्तुनमश्नीयात्प्रतीच्यांवायथासुखं॥ उत्तरेपितृकृत्येषुदक्षिणेतुविवर्जयेत्॥ मनुः॥ आयुष्यंप्राङ्
मुखोभुंक्तेयशःश्रीदक्षिणामुखः॥ श्रीकामःपश्चिमेभुक्तेनकदाचिदुदङ्मुखः॥ पुत्रवान्स्वगृहेनित्यंनाश्नीयादुत्तरामुखः॥
सोमवारेतथाभ्यंगंवर्जयेत्तुतथाबुधः॥ अथभोजनमंडलविधिः॥ बोधायनः॥ चतुरस्रंत्रिकोणंचवर्तुलंचार्धचंद्रकं॥ कर्त
व्यमनुपूर्वेणमंडलंब्राह्मणादिषु॥ नारदः॥ आदित्यावसवोरुद्राब्रह्माचैवपितामहः॥ मंडलेतूपजीवंतितस्मात्कुर्वीतमंडलं॥
पितामहः॥ यातुधानाःपिशाचाश्चह्यसुरराक्षसास्तथा॥ घ्नंतितेबलिमन्नस्यमंडलेनविवर्जितं॥ अथकांस्यपात्रं॥ एकएव
तुयोभुंक्तेविमलेकांस्यभाजने॥ चत्वारितस्यवर्धंतेआयुःप्रज्ञायशोबलं॥ पलाशीद्विशतिवादर्वीगतउर्ध्वंयथेच्छया॥ इद्
मेवगृहस्थानांनयतिब्रह्मचारिणां॥ पंचार्द्रोभोजनंकुर्यात्प्राङ्मुखोमौनमास्थितः॥ हस्तौपादौतथैवास्यमेषपंचार्द्रता म
ता॥ परिग्राहेतथाश्राद्धेवर्जयेत्कांस्यभोजनं॥ मोहाद्योयदिभुंजीतकृतंकर्मचनिष्फलं॥ भोजनेग्राह्यपात्राणि॥ रंभाकुटजमध्वा
म्रजंबुफणसचंपकाः॥ पद्मोबिल्वंदुरपालाशोलोब्रह्मपत्रंविविक्तकं॥ ब्रह्मपत्रेतुयोभुंक्तेमासमेकंनिरंतरं॥ त्रिभिश्चांद्रायणैस्तुल्यं
महापातकनाशनं॥ ब्रह्मपालाशमित्यर्थः॥ पालाशेषुचपर्णेषुमध्यमेषुचभारत॥ यःकरोत्यशनंतस्यप्राजापत्यंदिनेदि
ने॥ निषिद्धपर्णानि॥ वटार्काश्वत्थपर्णेषुकुंभीतिंदुकपर्णयोः॥ कोविदारकदंबानांभुक्त्वाचांद्रायणंचरेत्॥ करखर्परकेचैवशि
लायांताम्रभाजने॥ भिन्नकांस्येचवस्त्रेचनभुंजीयात्तथायसे॥ शाकादिपुरतस्थाप्यमध्येन्नंपरिवेषयेत्॥ परिविष्टंबगायत्र्या

चार्यशिष्यर्त्विक्ज्ञातिश्वशुरमातुलाः॥ येषामन्नं न दूष्येत तत्कपाध्यायस्यैव वहि॥ अथ निषिद्धान्नं॥ अन्नोदने त्तथा चौले सीमंत
प्रथमार्त्तवे॥ मासिके च तथा कृच्छ्रैने च भोजनमाचरेत्॥ गणान्नं गणिकान्नं च सूतिकान्नं तथैव च॥ इत्यन्नं चैव शूद्रान्नं नाश्नी
याद्द्विजसत्तमः॥ नग्नश्राद्धे न वश्राद्धे नवश्राद्धे सपिंडीप्रेत कर्मसु॥ प्रायश्चित्ते न भुंजीत भुक्त्वा चांद्रायणं चरेत्॥ तिथिपरत्वे
वर्ज्यं॥ सप्तम्यां रविवारे च दिवा रात्रौ तथैव च॥ धात्रीफलं नरोश्नीयाद्लक्ष्मीको नरो भवेत्॥ कूष्मांडं च रुणी चैव मूलकं
बृहतीं तथा॥ श्रीफलं च कलिंगं च धात्री प्रतिपदादिषु॥ शिरः कपालमंत्राणि नखचर्म तिलस्तथा॥ यदीच्छेदूर्ध्वगामित्वं
मष्टम्यादिषु वर्जयेत्॥ वर्जयेच्छ्वेतवृंताकं मलांबुं वर्तुलं तथा॥ छत्रकं लशुनं चैव घुषरंभासुरं तथा॥ वृंताकं कलंकाकालिं
गं बिल्वोदुंबरभिःसदाः॥ एतानि सेवते यस्तु तस्य दूरतरो हरिः॥ यत्यन्नं तु यदा भुंक्ते पात्रं गंप्रेरितं तथा॥ पर्वताश्विज्जपेन्
मंत्रं शतवारं न कल्मषं॥ समानमुद्यं मंत्रं च सहस्त्रं तु जपेद्यदा॥ भुक्ते प्रमादाच्छूद्रान्नं तदा दोषात्प्रमुच्यते॥ प्रमादाज्ज्ञा
नतो भुंक्ते गणान्नं तु यदा तदा॥ अस्ते वसु जपेन्मंत्रं सहस्त्रं वै न किल्बिषं॥ यज्ञायंज्ञयवोसूक्तं जपेद्धात्र्यां जलपिवा॥
गणिकान्नं यदा भुंक्ते तदा पापात्प्रमुच्यते॥ अन्नं भुंक्ते यदा यस्तु तदा पापात्प्रमुच्यते॥ इंद्रानुपूषणं सूक्तं सहस्त्रं वै जले जपे
त्॥ स्तोत्रमिदो जपेन्मंत्रं शतवारं जले पिवा॥ कुष्टान्नं चापि यो भुक्ते विमुच्येत स कल्मषात्॥ ब्रह्मघ्नस्य गृहे भुक्ते किल्बिषान्मु
च्यते यदा॥ एहि वानू प्रजपेत्सूत्रं सहस्त्रं तु जले यदा॥ यएनं प्रजपेत्सूत्रं सहस्त्रं विष्णुमंदिरे॥ पापात्प्रमुच्यते सत्यं भुक्ते
गेहे सुरापिनः॥ श्रुकं ते प्रजपेत्सूक्तं शिवस्थने सहस्त्रकं॥ तल्पकस्य गृहे भुक्ते तदा पापात्प्रमुच्यते॥ मानोष्टकापवं गं

च शतं विष्णुालये जपेत्॥ भुक्ते न दोषिणो यस्तु तदा पापात्प्रमुच्यते॥ आयुवानां जपेद्दुर्गा शतवारं जले यदा॥ दीर्घरोगीगृहे भु
क्ते तदा०॥ कुबेरोदेवीवर्गं चबद्दर्यं विजपेच्छतं॥ पिशुनस्य गृहे भुक्ते तदा०॥ अपेहातिजपेत्सूक्तं श्राद्धे भुंक्ते तु षोडशे॥ तदा
पापात्प्रमुच्यते त्रिंशद्वारं जले स्थितः॥ विभ्राट् बृहज्जपेत्सूक्तं सपिंडीभोजने जले॥ प्रेतस्थाने थवान्यत्र त्रिंशद्वारं न कि
ल्बिषं॥ भुक्ते तु मासिके यस्तु तदा०॥ अभ्यइवजपेन्मंत्रं दशवारं जले यदि॥ नित्यश्राद्धे यदा भुंक्ते तदा०॥ आराइंद्रजपेन्मं
त्रं दशवारं न संशयः॥ सीमंते च यदा भुक्ते तदा मुच्येत किल्बिषात्॥ सत्येनोत्तभिता मंत्रं जपेदश्वत्थसंनिधौ॥ उत्स
वेषु यदा भुंक्ते मुच्यते पातकात्तदा॥ कोष्टानरोजपेत्सूक्तं एकवारं प्रशस्तकं॥ भुक्तं मन्वादिकं श्राद्धं कल्मषं नैव लिप्यते॥
ऋतेन ऋतं यत्सूक्तं एकवारं जपेत्बुधः॥ भुंक्ते युगादिकं श्राद्धं तदा०॥ तमूनूनं जपेत्सूक्तं दशवारं शिवालये॥ भुंक्ते यो
न्वष्टकाश्राद्धे तदा०॥ लेषं गणं जपेत्सूक्तं दशकं विष्णुमंदिरे॥ द्विवारं च दिवा भुक्ते तदा०॥ यावो न ये जपेन्मंत्रं शतसंख्या शि
वालये॥ रात्रौ द्विभोजनं चेत्तस्या कल्मषं नैव सर्वथा॥ ममतु घेजिपेन्मंत्रं शतवारं शिवालये॥ भार्यया सह यो भुंक्ते तस्मा
द्दोषाद्विमुच्यते॥ आयथस्तु जपेन्मंत्रं शतं वै विष्णुमंदिरं॥ हस्तं दत्तं यदा भुंक्ते तदा०॥ अवृते हेलइत्यग्भ्यां सर्वपापैः प्रमु
च्यते॥ इलेअग्निं जपेन्मंत्रं शतवारं यदा तदा॥ पंचयज्ञविहीनस्य गृहे भुंक्ते न पातकं॥ बहवश्चैकपात्रे के भुंजते नैव
कल्मषं॥ अजेष्टासो जपेन्मंत्रं दशवारं न किल्बिषं॥ श्वानादिदर्शनं कृत्वा पश्चाद्भुक्ते यदा तदा॥ यदुत्तमे मंत्रं दश
वारं न कल्मषं॥ रजस्त्रीणां ध्वनिं श्रुत्वा पश्चाद्भुक्ते न कल्मषं॥ अग्निश्चयज्जपेन्मंत्रं दशवारं विशेषः॥ अत्यजानां

द्दिखादयेत्॥ श्राद्धंहंता भवेत्कर्त्तारौरवंनरकंव्रजेत्॥ रवेरस्तमयात्पूर्वंघटिके कायभवेत्॥ सायंसंध्यामुपास्याथ
कुर्याद्धोमंचपूर्ववत्॥ यस्य तिष्ठो ह्हे दीपस्तस्य नास्तिदरिद्रता॥ आयुःर्दः प्राङ्मुखोदीपोधनदःस्यादुदङ्मुखः॥
प्रत्यङ्मुखोदुःखदोसौहानिदोदक्षिणामुखः॥ माता पिता पितायद्दिस्युः स्याद्दीर्घीदीयाचतस्मु॥ शुभदास्तेसदा
सर्वेनदोषस्तत्र कश्चन॥ ॥इतिश्रीनारायणभट्टविरचितायांधर्मप्रवृत्तौनित्यकर्मप्रकरणंसमाप्तं॥ ॥अथ
शयनविधिः॥ ॥स्वगृहेप्राक्शिरःकुर्याच्छ्वशुरे दक्षिणामुखः॥ प्रत्यङ्मुखः प्रवासेचन कदाचिदुदङ्मुखः॥ तृणे
देवालयेचैव पाषाणेचैव पल्लवे॥ अंगणे द्वारदेशेतु मध्यभागगृहस्यच॥ रिक्तभूमौतथा लोष्ठे पार्श्वे वोच्छिष्टसंनि
धौ॥ शून्यालये श्मशानेच वृक्षमूले चतुष्पथे॥ माता वा भगिनी वापि तथाचान्यस्त्रियोपि वा॥ एतेषांसंनि
धौचैव नस्वपेत्ब्राह्मणः क्वचित्॥ चंदनं चानुलिप्यांगे धृत्वा पुष्पाणिदंपती॥ तांबूलंचर्वणंकृत्वा प्रदीपेमै
थुनंचरेत्॥ दीपेनष्टेतुयःसंगंकरोति मनुजंयदि॥ यावज्जन्मजरिद्रत्वंलभतेनात्रसंशयः॥ पादलग्नलत
नुश्चैवस्त्वच्छिष्टं ताडनंतथा॥ कोपरोषंचनिर्भर्त्स्यंसंयोगेचनचभावः॥ ॥अत्रकश्चिद्विशेषल्लिख्यते॥
ऋतुमत्यांतुयोभार्यातत्रसंगादिकंचरेत्॥ अनर्तुमाभार्यायांनसंगामितिकेचन॥ गर्भाधानोगम्भूतयत्क
र्मकुर्याद्दिवेवहि॥ रात्रौकुर्याद्विधानेनगर्भबीजस्यरोपणं॥ मूत्रादिकंततःकुर्याद्योन्याप्रक्षालयेज्जलैः॥ पू

र्वरात्रेव्यतीतेतु संगच्छेद्रतिमंदिरं॥ पादौप्रक्षालयेत्पूर्वं पश्चाच्छय्यांसमाचरेत्॥ मृदुशय्यांस्थितः शेते रिक्तशय्यांपरित्य
जेत्॥ उपानहौ वेणुदंडमंबुपात्रं तथैवच॥ तांबूलादीनि सर्वाणि समीपस्थापयेद्गृही॥ कुंकुमंचंदनंचैव तथाही
रीनसिंदुरे॥ धौतवस्त्रंचताबूलंसंयोगेवस्तुभावहं॥ भर्तृःपादौ नमस्कृत्यपश्चाच्छय्यांसमाचरेत्॥ सानारीसुख
माप्नोतिनभवेद्दुःखभागिनी॥ स्वपेत्स्त्रीप्राक्शिरःकृत्वा प्रत्यक्पादौ प्रसारयेत्॥ तांबूलंचर्वणंकृत्वासकामोभा
र्ययासह॥ तांबूलेनमुखंपूर्णं कुंकुमादिसमन्वितं॥ प्रीतिमाह्लादयंमुक्तं कृत्वायोगंसमाचरेत्॥ विनातांबूलव
दनंनम्रमाक्रांतरोदनं॥ दुर्मुखींचकृशांधातुक्षीं संयोगेपरिवर्जयेत्॥ भुक्त्वानुपविष्टस्तुशय्यासमभिसन्मुखः
संस्मृत्य परमात्मानंपत्न्याजंघेप्रसारयेत्॥ अलोमशांसुदृढां अनार्द्रांसुमनोहरां॥ योनिस्पृष्ट्वाजपेत्स्तंवि
ष्णुर्योनिप्रजापतेः॥ योनिंपश्येज्जपेन्मंत्रंविस्तनीतिपुनस्त्विति॥ मादृशास्तु भवेत्पुत्रइतिमत्वास्मरेद्धरिं॥ ॐ शावि
वर्जपेद्दर्गमन्योन्यमवलोकयेत्॥ स्तनौधृत्वातुपाणिभ्यांमन्योन्यंपुंबयेन्मुखं॥ बलंदेहीतिमंत्रेणयोन्यांशि
श्नंप्रवेशयेत्॥ यानेस्तुकिंचिदधिको भवेल्लिंगाबलान्वितः॥ मनुः॥ संतुष्टो भार्ययाभर्त्ताभर्त्राभार्या तथैवच॥ यस्मिन्ने
तकुलेनित्यंकल्याणंतत्रवैध्रुवं॥ संभोगेचैवभार्यायाःसुदृष्टस्त्विद्वीर्यवान्॥ स्कंधौवामाकटिंधृत्वा यथेष्टंमैथुनंचरेत्॥
इच्छापूर्वंभवेद्यावद्दुस्त्वयोःकामगंधयोः॥ रेतःसिंचेत्ततोयोन्यांतस्मात्गर्भंबिभर्तिसा॥ ऋतुकालेपुंगवामीतुस्त्रा

ज्ञोतिपरमां गतिं॥ सकुलः प्रभवेत्पुत्रः पितॄणां स्वर्गदो भवेत्॥ ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति। घोरायां भ्रूणह-
त्यायां पितृभिः सह मज्जति॥ ऋतुस्नाता तु या नारी पतिं नैवोपविंदति॥ शुनी वृकी सृगाली स्यात्सूकरी च पुनः पुनः॥ का-
मयज्ञमिति प्राकृ गृहीणामेव सर्वदा॥ अनेन लभते पुत्रं संसारार्णवतारणं॥ तावुभावसूचिस्यातां दंपती मैथुनंग-
तौ॥ शयनादुत्थिता नारी शुचिः स्यादशुचिः पतिः॥ ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनिनः स्मृतं॥ अनृतौ तु यदा गच्छेच्छौचं
मूत्रपुरीषवत्॥ ॥इति गर्भाधानं॥ ॥अथ पुंसवनं॥ तत्र सूत्रं॥ उपनिषद्गर्भलंभनं पुंसवनमनवलोभनं च यदि
वादीयात्तृतीयं गर्भमास इति॥ तथा च कारिका॥ तृतीये गर्भसंस्कारं मासे पुंसवनं भवेत्॥ आद्यगर्भे न विज्ञातस्तृ-
तीये मासि वै यदि॥ गृह्य॥ चतुर्थे गर्भमासे तु सीमंतोन्नयनं भवेत्॥ पूर्वस्यासंभवे षष्ठे मासे यद्वाष्टमे भवेत्॥ त-
था च स्मृतिः॥ आधानादष्टमे मासि सीमंतोन्नयनं भवेत्॥ नवमे मासि वा कार्यं यावद्गर्भविमोचनं॥ प्रयोगपारिजा-
ते॥ सीमंतोन्नयनस्योक्तं तिथिवारासरादिषु॥ पुंसवं कारयेद्विद्वान्स्वहेवैकदिने थवा॥ अन्नप्राशनांतः सर्वो गर्भा-
धानादिकः क्रिया॥ उक्तकाले भवंत्येतादोषानाषाढ्यपुष्यमोः॥ मासप्रयुक्तकार्येषु मूढलंगुरुशुक्रयोः॥ नदोष-
कृत्तदा ह्येषो लक्षणो बलवानिति॥ पूर्वस्मिन्न दिवसे पत्नी हविष्यं काशना भवेत्॥ वृद्धिश्राद्धं ततः कुर्यात् ब्रह्मचारी
भवेत्तदा॥ तथा च स्मर्यते॥ पुंसवने च सीमंते तथा चौलोपनयने॥ गोदानस्नानउद्वाहे नांदीश्राद्धं पुरादिने॥ अथ २२
गर्भिणीधर्माः॥ भूम्यां नैवोच्चनीचायां मारोहणावरोहणे॥ नदीप्रतरणं चैव शकटारोहणं तथा॥ उग्रोपथ तथास्व

धनिं श्रुत्वा पश्वाकुंभेन किल्बिषं॥ अग्निर्मरुद्भिर्मंत्रं च कल्मषं न शतं जपेत्॥ एकस्य तु न भोक्तव्यमन्नं तु प्रत्यहं द्विजैः॥
अज्ञानाद्यस्तु भुंजीत तस्य वै नास्ति निष्कृतिः॥ अथ वमनविधिः॥ उत्तरापोशनात्पूर्वं वमनं यदि जायते॥ स्नानं तत्र न
कर्तव्यं गंडूषैः शुद्धिरुच्यते॥ उत्तराचमनं पीत्वा कुरुते वमनं यदि॥ तत्र स्नानेन शुद्धिः स्यादिति प्राक्कर्मनीषिणः॥ सर्वत्र
वमने स्नायात्तथा शोकाश्रुपातने॥ अभ्यनुभुक्तार्द्रपाणिश्च हातोन स्नानमाचरेत्॥ ॥अथ तांबूलविधिः॥ तां-
बूलचर्वणं कुर्याद्भुक्त्वा रात्रौ च सर्वदा॥ अभ्यंगे दैव मांगल्ये दिवापाथ्य व्यवानिशि॥ प्रातःकाले फलाधिक्यं चूर्णा-
धिक्यं तु मध्यतः॥ पर्णाधिक्यं भवेद्रात्रौ लक्ष्मीवान्सुमनोभवेत्॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ चूर्ण-
पर्णं हरत्यायुः शिरा बुद्धिं विनाशयेत्॥ मूलमग्रं परित्यज्य शिरश्चैव परित्यजेत्॥ सचूर्णं खादयेत्पर्णं आयुः श्री
कीर्तिमान्भवेत्॥ अनिधाय मुखे पर्णं पुगं खादति यो नरः॥ सप्तजन्मदरिद्रत्वं दंते नैव स्मरेद्धरिं॥ पंचसप्त च प-
र्णानि दशाद्वादश वापि च॥ दद्यात्स्वयं च गृह्णीयादिति कश्चिदुदीरितं॥ तर्जन्या चूर्णमादाय तांबूलं न तु खादयेत्॥
यदि वा खादयेन्मूढो नरकं प्रतिपद्यते॥ मध्यमांगुलिमादाय चूर्णपर्णस्य लेपयेत्॥ अंगुष्ठेनाथवा चेद्वविप्राएण
मेष निर्णयः॥ मृताशौचे तथाश्राद्धे मातापित्र्योर्मृते हनि॥ उपवासे च तांबूलं दिवारात्रौ विवर्जयेत्॥ पक्षश्रा-
द्धे तथा दर्शे युग्ममन्वंतरादिषु॥ श्राद्धं निवृत्य भुक्त्वा तु तांबूलं खादयेन्नरः॥ मोहादरूलायः श्राद्धं तांबूलं य

ष्यनिकृंतयेत्॥ स्वधृतेन ब्रह्मसूत्रेण नालमावेष्ट्य इत्यर्थः॥ जातसूतके कर्त्तव्यतानिबंधसारे॥ जातादिपंचमे षष्ठे निशीथे ब
लिमाहरेत्॥ अर्चयेदष्टदिक्पालाननुगीतवाद्यसशस्त्रकैः॥ कृत्वा जागरणं दीपैः सूक्तैश्च शांतिपाठकैः॥ द्वारे द्वितीयभागे
तु पुत्तलैश्चापि कज्जलैः॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा॥ त्रिष्वेतेषु न कुर्वीत सूत्रे पुत्रजन्मनि॥ दद्यात्तु प्रथ
मे दानं षष्ठे वापं च मे पिवा॥ दशमे बलिदानं स्यादन्नदानं तथैव च॥ अथ नामकरणं तत्र कारिका॥ द्वादश्यां नामकरणं
नांदीश्राद्धे कृते भवेत्॥ पुंसां युग्माक्षराणि स्युर्विपरीतानि योषितां॥ ग्रंथांतरे कानिचिद्वचनानि मनुः॥ नामधेयं दशम्यां तु द्वा
दश्यां वापि कारयेत्॥ पुण्ये नक्षत्रदिवसे मुहूर्ते वा गुणान्विते॥ वसिष्ठः॥ द्वादशे षोडशे विंशे द्वात्रिंशे दिवसेऽपि वा॥ नामकर्म
द्वितीयानां कर्त्तव्यं श्रुतिचोदनात्॥ द्वात्रिंशाद्दिवसादूर्ध्वं यावत्संवत्सरं भवेत्॥ नामकर्म द्विजैः कार्यमिति केचिदुदीरितं॥ अव
सरं नैव दोषो मूढायां गुरुशुक्रयोः॥ सप्तमासेऽपि तत्कुर्याद्युक्तकाले न दोषभाक्॥ ॥ पत्नीकुमारोपवेशनं॥ ॥ प्रयोग
पारिजाते॥ संस्कार्यपुरुषे वापि स्त्री वा दक्षिणतो भवेत्॥ संस्कारस्तु सर्वत्र तिष्ठेदुत्तरतः सदा॥ तथा च स्मृत्यर्थसारे ॥ जातके
नामके चैव ह्यन्नप्राशनकर्मणि॥ निष्क्रमणे च चौले च पत्नी पुत्रस्तु दक्षिणे॥ गर्भाधाने पुंसवने सीमंतोन्नयने तथा॥ व
धूप्रवेशने चैव पुनःसंधान एव च॥ पूजने मधुपर्के च कन्यादाने तथैव च॥ कर्मस्वेतेषु वै भार्या दक्षिणं तूपवेशयेत्॥ कन्या
पुत्रविवाहे च गोदाने व्रतबंधने॥ आशीर्वादाभिषिके च पत्नी तूत्तरतो भवेत्॥ वापीकूपतडाकानां प्रतिष्ठायां महोत्सवे॥ व्रता
दौ शांतिके चैव पत्नी त्वत्तरतो सर्वदा॥ शांतिकेषु च सर्वेषु प्रतिष्ठोद्यापनादिषु॥ वामे तूपविशेत्पत्नी व्याघ्रस्य वचनं यथा॥

अथ निष्क्रमणं॥ चतुर्थे मासि निष्क्रमणं पूर्वपक्षापरपक्षाविति शुभे नक्षत्र इति सूत्रं॥ कारिका॥ चतुर्थे मासि पुण्यर्क्षे शुक्ले नि
ष्क्रमणं भवेत्॥ स्नानं रवलं कृतं चाभिहितं स्वस्त्ययनं महत्॥ तथा च ज्योतिःसारे॥ गृहान्निष्क्रमणं सूनोश्चतुर्थे मासि कारयेत्॥ य
त्रोक्तसमये मासि तृतीये प्रथमेऽपि वा॥ अथ पंचमासिकर्त्तव्यं॥ ॥ पंचमे मासि कर्त्तव्यं शिशोः श्रीभूपवेशनं॥ संपूज्य
सूकरं भूमिं कुमारं चोपवेशयेत्॥ व्रीहिश्यामाकगोधूममाषमुद्गतिलाः यवाः॥ एषामुपरि राशीनां नववस्त्रं प्रसार्य च॥ अ
थान्नप्राशनं॥ षष्ठे मास्यन्नप्राशनमिति सूत्रं॥ कारिका॥ अथ पुण्येऽह्नि षष्ठे तु मास्यन्नप्राशनं भवेत्॥ कृत्वाभ्युदयिकं श्रा
द्धं दधिमध्वाज्यसंयुतं॥ तथा च स्मृतिः॥ षष्ठाष्टदशमे मासि द्वादशे वान्नमाचरेत्॥ अयुग्मे मासि चैव स्त्रीणां मिति केचिदु
दीरितं॥ अथ चौलं॥ तृतीये वर्षे चौलं यथाकुलधर्मं वेति सूत्रं॥ कारिका॥ तृतीये वर्षे चौलं यथा कुलधर्मं वेति
सूत्रं॥ कारिका॥ तृतीये वत्सरे चौलं कुर्वीतास्योत्तरायणे॥ शुक्लपक्षे शुभर्क्षे तु कृत्वाभ्युदयिकं ततः॥ तथान्येषां तु केषांचिद्विप्र
नीत्या सह ष्यते॥ स्वस्त्यादि वाचयेत्पूर्वं वृद्धिपूर्वं षु कर्मसु॥ मनुः॥ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः॥ प्रथमेऽब्दे तृतीये वा
कर्त्तव्यं श्रुतिचोदनात्॥ तृतीये प्रथमे वाब्दे पंचमे सप्तमेऽपि वा॥ चौलकर्म द्विजः कुर्यात्कुलधर्मानुसारतः॥ अथ चौलनियमः
मजन्पारिजाते॥ नग्नस्नाता च भुक्ता च व्रजपभारोहणं तथा॥ त्रिरात्रमाशु चित्वा तु त्रिभिः कृच्छ्रैर्व्यपोहति॥ भक्ष्याभक्ष्ये तथा
तथा पेये वाच्यावाच्ये तथानृते॥ अस्मिन्न दोषस्यात्तस्या चन्नोपनीयते॥ अनुयेतस्तु यो विप्रो मद्यं मोहात्पिबेद्यदि॥ त
तस्य कृच्छ्रत्रयं पित्रा भ्रात्रा वाप्यथ वक्तथा॥ ॥ अथ चूडाकारणे निषेधः॥ ॥ चूडाकर्म शिशोर्माता गर्भिणी यदि

वाभवेत्॥ गर्भस्य वा दिपतिः स्याद्दं पर्या वांडि ओरपि॥ शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्॥ गतेतु पंचमे वर्षे गर्भिण्यामा
पि कारयेत्॥ यस्य मातरि गर्भिण्यां सूनोः क्षौरं न कारयेत्॥ पंचमाब्दात्प्रागथोर्ध्वंतु गर्भिण्यामपि कारयेत्॥ शिशोर्मातरि गर्भि
ण्यां मचौलं नोपनायनं॥ पंचमाद्याग्निषेधोपचा वर्षान्नदृष्यति॥ ॥अथ कुमारलक्षणं॥ ॥शिशोस्त्वन्नप्राशनात्प्रा
गाचौलं बालकः स्मृतं॥ कुमारकेस्तु विज्ञेयो श्चौलादौ मौंजिबंधनं॥ द्विजेतरस्तु लक्षणं प्रोक्तं बालकस्याचमनं स्मृतं॥ र
जस्वलादिसंस्पर्शे स्नानात् शुद्धिः कुमारकः॥ ॥अथ कर्मलोप प्रायश्चितं॥ अग्न्याधारं न या चौलाकालातीतं तु कर्म
णः॥ आज्यं व्याहृतिभिर्हुत्वा प्रायश्चित्तं समाचरेत्॥ एतेषु चैकैकलोपे तु पादकृच्छ्रं समाचरे॥ चौलाकर्म एयति क्रांते पादकृच्छ्रं
द्वयं चरेत्॥ अथाक्षरस्वीकार विधिर्लिख्यते॥ द्वितीय जन्मनः पूर्वमक्षराभ्यास माचरेत्॥ मौंजिबंधनतः पश्चा
द्दराभ्यासं समाचरेत्॥ पंचमे सप्तमे वाब्दे पूर्वं स्यान्मौंजिबंधनात्॥ तत्रैवाक्षराभ्यासः कर्तव्यस्तु दगायने॥ बृहस्पतिमतं चै
वं तदाभावे तु नोच्यते॥ सौम्यायने प्रदोषादि विंतयेद्व्रतबंधनात्॥ ॥अथ नक्षत्राणि॥ ॥मृगादिपंचस्वभिभेषु मूले हस्ता
दिके त्रितये श्विनीषु॥ पूर्वत्रये च श्रवणत्रये च विद्यासमारंभमुपैति सिद्धिं॥ हस्तत्रिके वायुत्रिके पूर्वसु मृगपंचके॥ मू
लाश्वि मैत्र पौष्णेषु मुखसंस्कारमिष्यते॥ आदित्यादिषु वारे विद्यारंभ फलक्रमात्॥ आयुर्जाड्यं मृतिः सम्मसुधीः प्रज्ञातन
पः॥ अनाध्यायाः प्रदोषाश्च षष्ठी रिक्तातथैव च॥ वर्जनीयाः प्रयत्नेन विद्यारंभेषु सर्वदा॥ विद्यारंभे शुभा प्रोक्ता जीव
ज्ञसित वासराः॥ मध्यमौ सोमसूर्यौ च विनिघ्नश्चैव शनिः कुजाः॥ उदगयने भास्वति पंचमेब्दे प्राप्तेक्षरस्वीकरणं शिशुनां॥ २५

रमैथुनं भारवाहनं॥ कृते पुंसवनं चैव गर्भिणी परिवर्जयेत्॥ तत्पतिधर्माः॥ पुंसो भार्या गुर्विणी यस्य वासौ सूनोश्चौलं क्षौरक
र्मात्मनश्च॥ गेहारंभं स्तंभसंसंस्थापनं च वार्धिस्नानं दूरयात्रां न कुर्यात्॥ वाहनं दहनं चैव वपनं सिंधुदर्शनं॥ पर्वतारोहणं
चैव न कुर्यात् गर्भिणी पतिः॥ मासात्तु पंचमादूर्ध्वं निंदितान्बहुदोषकृत्॥ पंचमासात्परात्याज्याः कुर्वंति मृत्यवे ह्यनि॥ दक्षः॥
ऋतुद्वये व्यतीते तु न कुर्यान्मौंजिबंधनं॥ अग्न्याधानं गयाश्राद्धं वपनं तु विवर्जयेत्॥ गर्गिण्या त्मात्मनः पत्न्या वपनं परि
वर्जयेत्॥ कारयेद्यदि मोहेन स वै च भ्रूणहा भवेत्॥ गर्भिण्यामपि भार्यायां सूनोश्चौलं न कारयेत्॥ यस्यान्या गर्भिणी भा
र्या पंचमासात्परोपि वा॥ इत्युक्तं पंचमादूर्ध्वमथो मासत्शुभं नहि॥ सूनोर्मातरि गर्भिण्यां चूडाकर्म च तस्य वे॥ पंचमासा
न्न कुर्याच्च मौंजिबंधनवे तथा॥ अष्टमासात्परश्चैव न कुर्यात् श्राद्धभोजनं॥ श्मश्रुकर्म तथा चैव केचिदाकर्मनी षियाः॥
अथ जातकर्म॥ कुमारं जातं पुरान्यैरालंभनादिति सूत्रं॥ कारिका॥ जातासूतं पिता कुर्यान्नांदीश्राद्धं विधानतः॥ जातकर्म
ततः कर्यादन्यैरालंभनात्पुरा॥ जातः पुत्रस्तु तत्काले श्रुत्वा तस्मै प्रदापयेत्॥ परितोषकमित्यर्थं भूषणाच्छादनादिकं॥ देवाश्च पि
तरश्चैव पुत्रे जाते द्विजन्मनां॥ आयांति तस्मात्तदहः पुण्यं पूज्यं च सर्वदा॥ जाते सूते वगाह्याप्सु श्राद्धं कृत्वा विधानतः॥ जातक
र्मविधानेन कुर्याद्दानादिकं ततः॥ तत्र दद्यात्सुवर्णं च भूमिं गो तुरगान् रथं॥ छत्रं छागं च माल्यं च शयनं वसनं गृहं॥ या
वन्न छिद्यते नालं तावद्दद्यात्स्वशक्तितः॥ अशौचे पि प्रकर्तव्यं गृह्ययोपि यथाविधि॥ अशौचं इति पूर्वाशौचजाते कवा
मृतके वा सत्यपि जातकर्म कर्म कर्तव्यमेवेत्यर्थः॥ ऋणत्रयनिवृत्त्यर्थं दद्याज्जाते सुते पिता॥ ब्रह्मसूत्रं धृतं नालते नावे

सरस्वतीं विघ्नविनायकं च गुडोदनाद्यैरभिषिच्य कुर्यात्॥ एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्॥ पूजयित्वा हरिं लक्ष्मीं
देवीं चैव सरस्वतीं॥ नारायणं महालक्ष्मीं गंधधूपादिकं ततः॥ एतेषामेव देवानां तत्तन्मंत्रेण पूजयेत्॥ कृत्वा होमं स्वशाखो
क्तमाघारांतं समाचरेत्॥ देवतानां च मंत्रेण नाम्ना वा जुहुयात् घृतं॥ एकैकां चाहुतिं कृत्वा होमशेषं समापयेत्॥ स्फटिका
यां स्वर्णस्य प्रसार्य कुंकुमादिकं॥ तदभावे यथारोप्यस्य कृत्वा वित्तानुसारतः॥ सुवर्णलेखनीकेन लिखेत्तत्राक्षराणि च॥
ॐ नमः शिवायेत्यादौ नामेत्यनुक्रमात्॥ अक्षराणि तु संपूज्य स्वयमुक्त्वाथ वाचयेत्॥ प्राङ्मुखो सौ समासीनः कुमार
स्तानि लेखयेत्॥ पूजयित्वा तु गंधाद्यैः पुनः स्त्रीवाच्ययेद्द्विज॥ आचार्यं पूजयेत्पश्चाद्वस्त्रालंकारभूषणैः॥ त्रिः प्रदक्षिण
मावृत्य देवताश्चापि वा गुरुं॥ स्वविद्यासूत्रकारांश्च स्वविद्यांश्च विशेषतः॥ ब्राह्मणान् पूजयेद्भक्त्या गंधपुष्पाक्षतादिभिः॥
तोषयेद्दक्षिणाभिस्तान् यथावित्तानुसारतः॥ अथोपनयनं॥ अष्टमे वर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे वेति॥ ॥सूत्रे
तथा च मनुः॥ गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनं॥ गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥ ब्रह्मवर्चसकाम
स्य कार्यं विप्रस्य पंचमे॥ राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे॥ तथा च याज्ञवल्क्यः॥ आषोडशाद्द्वावि
शाच्चतुर्विंशाच्च वत्सरान्॥ ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥ अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः॥ सा
वित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः॥ ॥अथोपनयनकर्त्तारः॥ आचार्यः॥ पितैवोपनयेत्यत्र तद

भावे पितुः पिता॥ तदभावे पितुर्भ्राता तदभावे तु सोदरः॥ पितापिता महो भ्राता सकुल्यो गोत्रजो गुरुः॥ उपनीये धिकारी
स्यात्पूर्वभावे परस्परः॥ व्रतबंधकुमारस्य विनापि पितुरज्ञया॥ यः करोति द्विजो मोहान्नरकं प्रतिपद्यते॥ दूरस्थपि
तृविषयं॥ तत्र संस्कार्याः॥ स्मृत्यर्थसारे॥ औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा॥ कानीनश्च पुनर्भूतो दत्तः
क्रीतश्च कृत्रिमः॥ दत्तात्मा च सहोढजस्तु पवित्रसुतस्ततः॥ एते द्वादश पुत्राश्च संस्कार्याः स्युर्द्विजातयः॥ कश्चिदौ
र्द्विजेर्जातौ संस्कार्यौ कुंडगोलकौ॥ अमृते च मृते पत्यौ जारजौ कुंडगोलकौ॥ कलौ दत्ता निषिद्धाः स्युः दौहित्रं चौर
संविना॥ संस्कारेण भवंत्यर्धा इति कैश्चिदुदीरितं॥ तथा मनुः॥ य एते भिहिताः पुत्राः प्रसंगादन्यबीजजाः॥ यस्य
ते बीजतो जातास्तस्य ते नेतरस्य तु॥ अथोपनये बृहस्पतिबलं॥ शिरोमणौ॥ द्विपंचसप्तनंदेशास्थितो जीवः शुभ
प्रदः॥ व्रतबंधे तु पुत्रस्य कन्यायाश्च करग्रहे॥ जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः॥ चतुर्थोष्टमस्थश्च
द्वादशस्थो मृतिप्रदः॥ चतुर्थे द्वादशे जीवे द्विगुणं पूजयेद्गुरुं॥ नाशुभोष्टमराशिस्थो न तु पूजाशतैरपि॥ धनुर्मीनकु
लीरस्थो जीवो जन्मात्यमृत्युदः॥ विवाहे मेखलादीनां सबलोपि बलप्रदः॥ कर्कमीनधनुस्थोपि बटोश्चेदष्टमो य
दि॥ श्रुत्या चोक्तं विना वर्षं न कुर्याद्व्रतबंधनं॥ वृद्धवसिष्ठः॥ आचार्यस्य बलं श्रेष्ठं बटोरंत्यो ष्टमो यदि॥ न विचार्य
बलं तत्र कारयेदुपनायनं॥ आचार्यस्य बले हीने बटोर्गर्भाष्टमो यदि॥ न विचार्य बलं तत्र कारयेदुपनायनं॥ अ

केशान्तस्थापितानुकुलधर्मतः॥ शिखास्थानं भवेत्तत्र मध्येशिरसिवर्तुलं॥ प्रमाणंतस्यचैवोक्तमाचार्येणांगुल
त्रयं॥ तथाचस्मृतिः॥ समाप्यमात्रासहभोजनंचबहिर्विदध्याद्वपनाभिषेकः॥ अलंकृतर्लं अपरिग्रहस्यान्मुखं सं
मीक्षेतपरस्परंच॥ कारिका॥ ब्राह्मणस्योपनयनमुक्तकालेभवेदिह॥ कृत्वाभ्युदयिकंश्राद्धंपूर्वेद्युरपरेहनि॥ कु
तस्नानंमस्तंकुर्यादाशिषोवाचयेदथ॥ मुक्तभोज्यस्यशिरसोवपनंस्नानमेवच॥ एवंभूतंकुमारंच मंडपस्थापयेत्तिकं
ततः॥ ज्योतिःशास्त्रविदुक्तेतुमुहूर्तेशोभनेततइत्यादिस्वशाखोक्तविधिनाकर्मकर्तव्यमित्यर्थः॥ ॥स्वशाखो
विधिमुत्सृज्ययेन्यस्यविधिमाचरेत्॥ अप्रमाणमृषिंकृत्वा सोधेतमसिमज्जति॥ स्वस्यकर्मपरित्यज्ययदन्य
त्कुरुतेनरः॥ अज्ञानादथवालोभात्सतेनपतितोभवेत्॥ ऋकुशाखीनेवकुर्वीतस्वकीयंपरशाखया॥ प्रमा
दाद्यदिकुर्वीतपुनःसंस्कारमर्हति॥ यत्र नास्तिस्वशाखाचेदृकुशाखोक्तंसमाचरेत्॥ पुनर्नार्हतिसंस्कारमन्यथा
हितिचेत्पुनः॥ यजुःशाखाविधानेनयदिवह्निचकर्मच॥ कृतंचापिहितंकर्मपुनःकुर्याद्यथाविधि॥ ऋकुशाखाविधि
नाकर्मयदिस्यादन्यशाखिनां॥ ननत्कर्मपुनःकुर्यादितियज्ञविदांमतं॥ अथानुप्रवचनं॥ तिष्ठेदहःशेषम
स्तमितेब्रह्मौदनमितिसूत्रं॥ कारिका॥ अहःशेषंततस्तिष्ठेत्सायंसंध्यामुपास्यच॥ पूर्णपात्रविधानंतमुप
लेपादिपूर्ववत्॥ अन्यपक्षः॥ उपनीतोहिकुर्वीतसायंसंध्यामुपाक्रमात्॥ अग्निकार्यंततःकुर्यादौपासनं
यथाविधि॥ अनुप्रवचनीयंचतस्मिन्नेवकृताशने॥ समन्वारब्ध आचार्येश्चर्वकृतिंत्र्यंकुनेत्॥ उपाकर

णपर्यंततस्मात्सावित्र्याब्रह्मयज्ञकं॥ संध्यामाध्याह्निकींकुर्यात्काण्वकारोब्रवीदथ॥ मौंजीबंधनकालेतुकुर्यात्प्रवच
नीयकं॥ केचिदेवंवदत्यग्नौलौकिकेचापरेविदुः॥ सायंसंध्यामुपक्रम्यब्रह्मचारीसमाचरेत्॥ अपरेद्युःकृतस्नातः
प्रातःसंध्यामुपाचरेत्॥ अग्निकार्यंततोभिक्षांसायंप्रातश्चपूर्ववत्॥ ब्रह्मयज्ञंहिगायत्र्यामध्याह्नेतुसमापयेत्॥
उपोपाकरणे॥ संध्यामध्याह्निकींकुर्यात्काण्वकारोब्रवीदथ॥ उपाकरणपर्यंतंसावित्र्याब्रह्मयज्ञकं॥ अथब्रह्म
चारीनियमः॥ क्षारादिवर्जमश्नीयाद्ब्रह्मचारीदिनत्रयं॥ शयीताधःचतुर्थेह्निमेधाजननमाचरेत्॥ आचार्योवाचये
न्मंत्रंसुश्रवःसुश्रवाइति॥ ततेवमेखलादीनिविहस्यान्यानिधारयेत्॥ मेखलामाजिनंदंडंवस्त्रंयज्ञोपवीतकं॥ पा
लाशासमिधौस्यात्अथंनवान्यन्यानिधारयेत्॥ नियमेनब्रह्मचर्यंचतत्रेवृतुसमाचरेत्॥ अन्यथाकर्महानिःस्या
दितियज्ञविदांमतं॥ वाससीतेस्वगुरवेमेधाजननेकर्मणि॥ दद्यात्तावस्त्रभृत्येवंकौपीनेनप्रवर्तते॥ ॥स्मृत्य
र्थसारे॥ सदाधार्यंद्विजैःश्लक्ष्णंकौपीनंकटिसूत्रकं॥ कौपीनंमहतंधार्यंखंडंवावस्त्रपार्श्वमुक्॥ कौपीनंकटि
सूत्रंचयतेःस्यात्ब्रह्मचारिणः॥ कारिका॥ महानाम्न्यादिकुर्वीततत्कालेव्रतत्रयं॥ उक्तकालेददान्येतद्वामना
त्थपश्चीनवत्॥ नवामौंजीनवंदंडंदत्वास्विष्टकृतद्यया॥ संवत्सरंचरेदेतत्पूर्णेद्वेत्तत्तरायणे॥ औपाकर्मः॥ तत्रे
दंसूत्रं॥ अथातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रवणेनश्रावणस्यपंचम्यांहस्तेनवेति॥ तथाचकारिका

अध्यायनमुपाकर्म श्रावण्यां श्रवणेन तत् ॥ तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यते ॥ अदृष्टौ यस्तस्मिन्मासे
तु न भवति चेत् ॥ तदा भाद्रपदे मासि श्रवणेन करोति तत् ॥ शाकलः ॥ मासद्वयेप्युपाकर्म न भवेद्यदि वै तदा ॥ आषाढे
श्रावणे कुर्याद्धस्ते वा कर्कटे रवौ ॥ तदभावेप्यन्यस्मिन्मासे श्रावणे न कुर्यान्नोदगयने इति ॥ आचार्यः ॥ कुर्यान्नवो
पनीतस्य श्रावणे ध्ययनेन वं ॥ तदूर्ध्वं वापि कुर्वीत नैव कुर्यादधः क्वचित् ॥ यदि चेदुभयं व्याप्ति वृष्यक्षेपि हि कादयं ॥
तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञकं ॥ पर्वण्युदयिके कुर्युः श्रावणं तैत्तिरीयकाः ॥ बह्वृचाः श्रवणं कुर्युः हस्ते वै साम
वेदिनः ॥ धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत् ॥ तत्कर्म सफलं चस्यादुपाकरणसंज्ञकं ॥ संक्रान्तौ ग्रहणे चैव मूढयो
र्गुरुभृग्वयोः ॥ उपाकर्म न कर्तव्यं परतश्चेन्न दोषभाक् ॥ गुरुभार्गवयोर्मूढे बाल्ये वा वार्धिके पि वा ॥ तथाधिमासे
संसर्पे मलमासादिषु द्विजैः ॥ प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ॥ प्रत्यब्दिकं तु यत्कर्म क्रियमाणं न दुष्यति ॥
अथोत्सर्जनं ॥ तथोत्सर्जनं षण्मासानधीयतेति सूत्रं ॥ कारिका ॥ अध्यायोत्सर्जनं माघ्यां पौर्णिमास्यां विधीय
ते ॥ यामार्धहिः स्विवेके स्यादुपलेपादि पूर्ववत् ॥ मनुः ॥ पुष्ये तु छंदसां कुर्यात् बहिरुत्सर्जनं भवेत् ॥ माघे शुक्लस्य वा
प्राप्ते पूर्वाह्णे प्रथमेहनि ॥ उत्सर्जनं भवेत् त्वदुक्तकाले तु नैव यदि ॥ उपाकरणकाले तु कुर्यादुत्सर्जनं बुधः ॥ कृष्णाजि
नः ॥ उपाकर्मणि चोत्सर्गे गौतमादींश्च सप्त वै ॥ ऋषीन् दर्भमयान् कृत्वा पूजयेत ततः ॥ अनध्यायानुस्मृतौ सिद्धा २८
न् परित्यज्य लधीयते ॥ यत्स पूर्वमधीते सो प्रारभेत शुभेहनि ॥ अथ माध्यांनाह ॥ पक्षद्वयं चतुर्दश्यामष्टमी

स्योक्त वर्षेन बलं गुरोश्चेत्तत्त्वा प्रशस्तं व्रतबंधकर्म ॥ अयुक्तवर्षेषु बलप्रदोपि नैवैत तयोरस्य बलो बलीयान् ॥ तथा
आचार्यविशेषमाह ॥ मुख्यकालस्तु बलवान् व्रते गोचरशुद्धितः ॥ कालातिक्रमणे नैव गुरुशुद्धिं विचिंतयेत् ॥ ॥ अथो
पनयने प्रतिबंधः ॥ नांदीश्राद्धे कृते पश्चादुल्कापाताग्निवृष्टिषु ॥ सूतकादिनिमित्तेषु न कुर्यान्मौंजिबंधनं ॥ अथ मा
तरि रजस्वलायां निर्णयमाह ॥ प्रचेताः ॥ यस्य मांगलिकं कार्यं तस्य माता रजस्वला ॥ तदा तन्न प्रकर्तव्यमायुःक्ष
यकरं हि तत् ॥ ज्योतिःसारे ॥ उद्वाहव्रतचूडासु माता यदि रजस्वला ॥ तदा न मंगलं कार्यं शुद्धौ कार्यं शुभेप्सुभिः ॥ प्रा
रंभात्प्राग्विवाहस्य माता यदि रजस्वला ॥ निवृत्तिस्तेन कर्तव्या सहलं श्रुतिचोदनात् ॥ नांदीश्राद्धे कृते पश्चान्मा
ता यदि रजस्वला ॥ मौंजीबंधनं कुर्वीत गार्ग्यस्य वचनं यथा ॥ प्रयोगसारावल्यां गर्गः ॥ ॥ मातृणां भोजना
त्पूर्वं यस्या मातास्पृष्टा भवेत् ॥ तदा कर्म न कुर्वीत यदि कुर्यान्निरर्थकं ॥ शौनकः ॥ वृद्धेश्राद्धे कृते पश्चात् ॥ बटोर्मा
ता रजस्वला ॥ तदा कर्म न कुर्वीत यावद्भोजनसंगता ॥ षट्त्रिंशन्मते ॥ मात्रा सहैव भुंजीत ऊर्ध्वं माता रजस्वला ॥ व्र
तबंधं प्रशस्तं स्यादित्याह भगवान्यमः ॥ नांदीश्राद्धे कृते पश्चात्कन्यामाता रजस्वला ॥ कन्यादानं पिता कुर्यादित्यां
गिरसभाषितं ॥ नांदीश्राद्धे कृते यस्य भार्या रजस्वला भवेत् ॥ विवाहे नैव दोषस्याद्दोषः स्यान्मौंजिबंधने ॥ धर्मा
र्थं कुरुते वित्राभौंजीबंधनमेव च ॥ न दोषो गर्भरजसो रित्याह स्मृतिसंग्रहः ॥ अथोपनयनादे तु कुमारभोजना
तद्या ॥ मात्रा सहैव भुंजीयाद्विवाहो भार्यया सह ॥ मात्रा सहैव भुंजीयां चौलमानाक भोजने ॥ शिरेवांहिस्यावप

द्वितयेतथाप्रतिपद्दर्शोपूर्णेचानध्यायाः प्रकीर्तिताः॥ चतुर्मास्याद्वितीयातुयुगमन्वंतरादिषु॥ अष्टकासुचसर्वासु
तथासोमपदासुच॥ अयनेविषुवेचैवश्रवणद्वादशीतथा॥ शयनीबोधयंनिचैव द्वादसीपरिकीर्तिता॥ द्वितीयाप्रे
तपक्षस्यसाभावेप्रेतसंज्ञका॥ आश्विनस्यतुयाशुक्लाद्वितीयाप्रेतसंज्ञका॥ भरणीप्रेतपक्षस्यद्वितीयापितथैव
च॥ अनाध्यायास्त्विमेनित्याइतिप्रोक्तामहर्षिभिः॥ अथनैमित्तिकानाह॥ ग्रामदाहादिकानपि॥ शंखा
चतुर्दशीचैवतथासंख्याचतुर्दशी॥ निर्घातेभूमिचलनेज्योतिषांचोपमार्जने॥ एतानकालिकान्विद्यादनध्या
यान्त्रतावपि॥ चतुर्मास्याद्वितीयाया आहास्तुवाऊर्जतपस्येचयाद्वितीयाविधूक्षये॥ चातुर्मास्यद्वितीयास्ताः प्र
वदंतिमहर्षयः॥ अथयुगादयः॥ माघेपंचदसीकृष्णानभस्येचत्रयोदसी॥ तृतीयामाधवेशुक्लानवम्यु
र्जेययुगादयः॥ अन्वादयः॥ अश्वयुकशुक्लनवमीद्वादसीकार्त्तिकेसिता॥ सिताषाढस्यदशमीमाघमास
स्यसप्तमी॥ श्रावणेचाप्पमावास्याज्येष्टेपंचदसीसिता॥ आषाढीकार्त्तिकीमाघीचैत्रीमन्वादयस्मृताः॥
अथाष्टकाः॥ मार्गपौषेतथामाघेनभस्यफाल्गुनेपिवा॥ कृष्णपक्षेष्टकातिस्त्रः सप्तम्यादियथाक्रमं॥ अ
थसोमपादाः॥ ज्येष्ठशुक्लद्वितीयाचह्याश्विनीदशमीसिता॥ चतुर्थी द्वादशी माघेएताः सोमपादाःस्मृताः
मृगकर्कटसंक्रांतिद्वेतूदग्दक्षिणायने॥ अथचैवतुलामेषो विषुवौतौप्रकीर्त्तितौ॥ चतुर्दस्यांयदापर्वप्रा

गस्तात् दृश्यते रवेः॥ अनध्यायं प्रकुर्वीत त्रयोदश्यां तु सर्वदा॥ आसप्तम्यां प्रातरारभ्य त्रयोदश्यनुवर्तते॥ अनध्याये॥
भवेत्तत्र भूते दर्शो भवेद्यदि॥ यथासंख्यं तु वै भूते त्रयोदशी भवेद्यदि॥ वेदविद्भिः समाख्याता सैव संख्या चतुर्दशी॥
अनध्याये षधीयानां देवं द्विप्रहरं ध्रुवं॥ हतादंडेन चंद्रो हान्मृताः स्वर्गं न यांति हि॥ नानुरोधस्त्वनध्याये होम
मंत्रेषु चैव हि॥ वेदोपाकरणे चैव स्वाध्याये चैव नित्यके॥ अथ प्रदोषः॥ षष्ठी च द्वादशी चैव दर्धरात्राद्यधो
यदि॥ नवनाड्यस्तृतीया चेत्प्रदोषो मुनिभिः स्मृतः॥ युगसप्तत्रयोदश्यो वर्तते स्त मयादधः॥ प्रदोषे तत्र कु
र्वीत द्येकार्धघटिका सु च॥ युगश्चतुर्थीसप्तमीति॥ अथ गोदाने॥ गोदानं स्नातके चैव समावर्तनकं तथा॥
चौलोपनयनं चैव न कुर्याद्दक्षिणायने॥ मरीचिः॥ गोदानमकृतस्येह विवाहश्चेदुपस्थितः॥ याम्यायने
पि कुर्वीत गोदानं स्नातके चैव॥ चकारात्समावर्तनं॥ एतेन गोदानं षोडशे वर्षे केशशब्देनु श्मश्रुशब्दा
न्वारयेदिति॥ सूत्रं॥ अथाचकारिका॥ गोदानं चौलवत्कार्यं षोडशेब्दे तदुच्यते॥ अंकोतवदानं नास्ति
श्मश्रूणां मुंडनं भवेत्॥ ॥ अथ समावर्तनं॥ अथैतान्युपकल्पयीत समावर्त्यमान इति सूत्रं॥ कारिका
वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वा॥ व्रतपक्षे तु शब्दार्थमारण्याध्ययनं कृते॥ विद्यांते गुरुमर्थेन कामार्थी २९
करवाणि ते॥ यमर्थमहतं कृत्वा ततोनुज्ञामवाप्य च॥ कुर्वीत स्वयमेवेतत्समावर्तनसंज्ञकं॥ प्राप्योदगया

नाद्यक्तमुक्तस्वस्त्ययनंस्वयं॥ अथस्नातकं॥ विद्यांतेगुरुमूर्थेननिमंत्रयंकृत्वानुज्ञातस्यचास्नानंतस्यैव ग्व्रतानिभवंतीतिसू
त्रं॥ कारिका॥ अथशिष्यःसमावर्त्तीनामोपांशुगुरोवदेत्॥ उच्चैरूर्ध्वंवदेत्स्नानमिदमस्येष्टमाश्रमं॥ हेवेद दत्तमाहि
स्यंवत्समोभोरतितथा॥ यथाचारंतथाकुर्यादेकस्मिन्नपिवादिने॥ गोदानादीनिकर्माणिविवाहात्पूर्ववासरे॥ एकं
तत्रएवाकुर्यादितियज्ञविदोविदुः॥ अथमधुपर्कादिविवाहः॥ ऋत्विजोवृत्वामधुपर्कमाहरेत्स्नातकायोपस्थितायेत्यादिमधुपर्कोभवतीतिसूत्रं॥ मनुः॥ गुरुणानुमतेस्नात्वासमावृत्तोयथाविधि॥ उद्वहेतद्विजोभार्यांसवर्णांलक्षणान्वि
तां॥ यस्यास्तुनभवेद्भ्रातानविज्ञायेतवापिता॥ नोपयच्छेततांप्राज्ञःपुत्रिकाधर्मशंकया॥ समानप्रवरांकन्यांसपिंडांचै
कगोत्रजां॥ नवेतावरयेत्प्राज्ञोमातृवत्सरिकीर्त्तिता॥ वाग्दानंचप्रदानंचवरणंपाणिपीडनं॥ सप्तपदीतिपंचांगोमुनि
भिःपरिकीर्त्तिताः॥ तत्रवाग्दानं॥ कुर्याद्वैवाहिकेमासिवाग्दानंद्विजसत्तमः॥ कृत्वाज्ञानस्मयुक्तःसंपूज्यागणनायकं॥ स
न्निधौद्विजदेवानांकर्मणामेसुतायवे॥ त्वयास्वीक्रियतेमह्यंसुरूपादीयतेमया॥ कायेनमनसावाचासंप्रीत्याधर्म
रक्षये॥ पुत्रमित्रसुहृद्वर्गैःसमेवंतमुनिश्चितं॥ कन्यातेममपुत्रायस्वीकृतेवमयाद्यवे॥ एतेषांसन्निधावेवममवंशा
भिवृद्धये॥ संबधुगोत्रेमुच्चार्यदद्याद्वैकन्यकांपिता॥ हस्तेपित्तुर्वरस्याथत्तांकालेसाक्षतफले॥ दास्येहंतेघपुत्रायसु
रूपांसमकन्यकां॥ आसादयाविवाहार्थद्रव्यमंगलकानिच॥ स्वीकृतामम्पुत्रायमयाद्यतवपुत्रिका॥ सफलंचाह

तंदद्याद्यथाचारःपरस्परं॥ अथप्रदानं ॥ कन्यायावरपात्पूर्वंप्रदानंनैवकारयेत्॥ संपूज्यकन्यकांदद्याद्वस्त्रालंकारभू
षणं॥ प्रदानंपट्टकूलादिकर्णकंठादिभूषणं॥ लक्ष्म्याशिरोथविप्रेभ्यःस्तेभ्योदद्यात्फलानिच॥ अथवरणं ॥ प्रार्थयेद्वृदसं
पन्नान्मधुपर्केणपूजितः॥ मदर्थंवृणिध्वंकन्यांमितिदत्वाचदक्षिणं॥ गोत्रोद्भवस्यगोत्रस्यसंबंधस्यामुकस्यच॥ मन्त्रेपो
त्रायपुत्रायह्यमुकायवरायवै॥ कन्यायाअपिगोत्राययथापूर्ववदुच्चरेत्॥ नप्त्रीमथात्रपौत्रींचपुत्रींकन्यांयथाविधि॥
कन्यसमीपमागत्यब्राह्मणैःसहवैपिता॥ इत्युक्त्वाभोद्विजायूयंवृणिध्वंकन्यकामिमां॥ प्रत्यूचुस्तेद्विजाःसर्वेवयंचेमांवृणी
महे॥ प्रसुग्मंतेतिसूक्तंतुजपेयुर्ब्राह्मणास्ततः॥ अष्टौवाचाथचत्वारोब्राह्मणावेदपारगाः॥ कन्यायावरणेचैवयोज्याःका
मीतदोहिये॥ गच्छन्स्मरणेतिवाक्यानिपक्षिणामप्रियाणिच॥ जपेत्कानिक्रंदत्सूक्तंदेवीवाचमसृचंतथा॥ अथपाणीपीड
नं॥ धर्मेचार्थेचकामेचनातिचरितव्यात्वया॥ इयंगृह्णातिवैपाणिपीडनंवृत्तिकारकः॥ अथसप्तपदी॥ अभ्युत्क्राम
येदीशान्यांवध्वंसप्तदानितु॥ साचाभ्युत्क्रामयेत्पूर्वंदक्षिणंपादमात्मनः॥ इतिप्रसंगतःपंचांगोविवाहोदर्शितस्तथा॥
अथमधुपर्कः॥ द्विराचम्यसमासीनःसकर्त्ताप्राङ्मुखोवरं॥ प्राङ्मुखंतंसमासीनंमधुपर्केणपूजयेत्॥ कुलमग्रेप
रीक्षितमातृतःपितृतःश्रुति॥ यथोक्तपुरस्तात्बुद्धिमतेकन्यांप्रयच्छेत्बुधिरूपशीलसंपन्नामुपयच्छेदिति॥ सू
त्रं॥ कारिका॥ यथोक्तलक्षणांकन्यांउक्तकालेसमुद्वहेत्॥ स्यादाभ्युदयिकंश्राद्धंपूर्वंवलाद्यवासरे॥ अपरेद्युः

कृतस्नातोहतवस्त्रधृतोवरः॥स्वलंकृतसितछत्रोपदातिर्यातिबांधवैः॥ इतोवधूगृहंगत्वामधुपर्केणपूजितः॥ स्वसूत्रोक्तवि
धानेनकृत्वाकंन्यांस्वशाखिनां॥ वरोयः प्रतिगृह्णीयात्स्वशाखोक्तविधानतः॥ देशाचारानुधर्मेण विवाहःकार्यएवतु॥
तथाचस्मृते॥ अथखलूच्चावचजनपदधर्माग्रामधर्माश्चतान्विवाहेप्रतीयादिति॥ तथाचमनुः॥ ब्राह्मोदैवस्तथैवा
र्षःप्राजापत्यस्तथासुरः॥ गंधर्वोराक्षसश्चैव पैशाचश्चाष्टमोधमः॥ चतुरोब्राह्मणस्याद्यान्प्रशस्तान्कवयोवि
दुः॥राक्षसःक्षत्रियस्यैवमासुरोवैश्यशूद्रयोः॥ आछाद्यचार्हयित्वाचश्रुतिशीलवतेस्वयं॥ आहूयदानंकन्याया
ब्राह्मोधर्मःप्रकीर्तितः॥यज्ञेतुविततेसम्यक्ऋत्विजेकर्मकुर्वते॥ अलंकृत्यसुतादानंदैवंधर्मंप्रचक्षते॥ एकंगोमि
थुनंद्वेवावरादादायधर्मतः॥ कन्याप्रदानंविधिवदार्षोधर्मउच्यते॥ सहोभौचरतांधर्ममितिवाचानुभाष्यतु॥ कन्याप्र
दानमभ्यर्च्यप्राजापत्योविधिःस्मृतः॥ ज्ञातिभ्योद्रविणंदत्वाकन्यायैचैवशक्तितः॥ कन्याप्रदानंयोदद्याद्आसुरोधर्म
उच्यते॥ इच्छयायोन्यसंयोगःकन्यायाश्चवरस्यच॥ गांधर्वस्तुविज्ञेयोमैथुन्यःकामसंभवः॥ हत्वाछित्वाचभित्वा
वाक्रोशतीरुदतीगृहात्॥ प्रसह्यकन्याहरणंराक्षसोविधिरुच्यते॥ सुप्तांमत्तांप्रमत्तांवारहोयत्रोपगच्छति॥ सम
पिच्छोविवाहानांपैशाचोप्रथितोष्टमः॥ संतिष्टेत्प्राङ्मुखीकन्यातिष्टेत्प्राङ्मुखोवरः॥ मुहूर्त्ते शोभनेकालेतं

तर्धायावरं तयोः ॥ साक्षतान्स मुहूर्ते तु क्षिपेतां शिरसो मिथः ॥ क्षिपेत्कन्यां सततापूर्वं पश्चाच्चैव क्षिपेद्वरः ॥ ऋक्चत्व
त्वत्यादिभिर्मंत्रैः क्षिपेयुरक्षतांद्द्विजाः ॥ आशिषो वाचयित्वा नमथयथाचरेत् ॥ ततश्चोदङ्मुखस्तिष्ठेत्स भार्यां कन्या
कापिता ॥ प्राङ्मुखायास्थितायाश्च कन्यां दद्याद्वराय वै ॥ अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते ॥ इतरेषां तु व
र्णानामितरेतरकाम्यया ॥ दंपत्यो रक्षणार्थाय बधीयात्कंकणं तयोः ॥ करयोरेकमेकस्य बध्नीयात्तां तु दंपती ॥
अनादेशो दक्षिणं प्रतियादिति भाष्यकारः ॥ शौनकः ॥ द्विगुणेन वस्त्रेण पंचधा वेष्टनं तयोः ॥ ततोप्यधोर्ध्वं चोर्ध्वाधः
प्रकोष्टे बंधनं तयोः ॥ स्मृतिः ॥ रक्षार्थं दक्षिणे हस्ते बध्नीयात्कंकणं तयोः ॥ बंधनं बन्यका पूर्वं वरस्त्वं विमोचयेत् ॥
सूत्रं चतुर्गुणं कृत्य दंपत्योर्वेष्टितं च यत् ॥ रक्षार्थं कंकणं प्राङ्कुरादिकानसमान्वितं ॥ विश्वेतात्तत्स्त्वचा पुंसां बध्नीया दक्षि
णे करे ॥ अथ वाम करे स्त्रीणां बृहत्सामेत्कचे पठु ॥ इत्यनेन केचित्कन्याया वाम करे बध्नंति स केचिद्देशाचारः ॥ दे
शधर्मानुसारत इति व्यवस्था ज्ञातव्या ॥ कन्यायै वाससी दत्वा बध्नीयाद्वाससी तयोः ॥ बध्नीयान्मंगलं सूत्रं कुंकुमोल्कं
सुशोभनं ॥ इत्यादिकं प्रकुर्वीत देशधर्मानुसारतः ॥ उभौ वेदिं व्रजेयातां होमस्तत्र विधीयते ॥ अथ वेदिकालक्षणं
हस्तोच्छ्रितां चतुर्भिर्हस्तां चतुरस्रां समंततः ॥ स्तंभैश्चतुर्भिः संयुक्तां विवाहे वेदिकां शुभां ॥ विस्तारितां हस्तचतुष्टयेन

अथयस्मिन्विवाहाग्निरुत्पन्नोहनि तस्यतु॥ तत्सायंतमनारभ्य वह्निं परिचरेत्स्वयं॥ रात्रावतीतः कालश्चे तच्छायांतदुपक्रमः॥
आत्मनोसंभवेत्पानीपुत्राद्यइतिस्मृताः॥ रात्रौत्रि भागंकुर्वीत द्वौभागौपूर्ववासरे॥ परस्मिन्नूततीयोभागोविवाहस्तु
केऋतो॥ मध्येअग्नौविनष्टे॥ चतुर्थिमध्येप्यनलेविनष्टेसंधानमग्नेलथलौकिकाग्नौ॥ औपासनात्पूर्वमथापिनष्टे
विवाहहोमंविधिवच्चकुर्यात्॥ विवाहोपासनात्पूर्वमनले शांतिमागते॥ परिणीयादिकंकृत्वाहोमशेषंसमापयेत्
अत्रकन्याऋतुमतीचेत्॥ प्रयोगपारिजाते॥ विवाहहोमेप्रक्रांतेकन्यायदिरजस्वला॥ त्रिरात्रंदंपतीस्यातांपृथ
कशयासनाशनौ॥ चतुर्थेहनिसंस्नातौतस्मिन्नग्नौयथाविधि॥ विवाहहोमंकुर्यातांकन्यादानादिकंतथा
चतुर्थिमध्येकन्याचेद्भवेद्यदिरजस्वला॥ त्रिरात्रमस्थुचिरत्वेका चतुर्थेहनिशुध्यति॥ युंजानहोमंकुर्वीत प्रा
यश्चित्तंविधीयते॥ श्रियंसंपूजयेद्भक्त्यापुनर्होमोविधीयते॥ अथरात्रौदानं॥ कंन्यादानंनिशीथेचेद्वरोवोपोषिता
यत्र॥ उपोषितःसुतांदद्यात्ब्राह्यादिषुचतुर्ष्वपि॥ अन्यपक्षः॥ कंन्यादानंनिशीथेचेद्दिवाभोजनमाचरेत्॥ पुनश्च
लाजपद्वेपिताकन्याप्रयच्छति॥ उल्कासमुद्वहेत्कन्यांसावित्रीग्रहणंतथा॥ गांधर्वासुरयोर्मध्येविधिरेवमुदाहृ
तः॥ अथकन्यादाः॥ पितापितामहोभ्राता पितृव्योगोत्रिणेगुरुः॥ मातामहोमातुलोवाकन्यदाबांधवाःक्रमात्॥
पित्रादिदातृभावेतुकन्याकुर्यात्स्वयंवरं॥ इत्येवंकेचिदाचार्याप्राहुर्महतिसंकटे॥ अथान्यशाखिनेदानं॥

स्वशाखिरवेद्वरोनस्यात्कस्मैदेयात्तुकन्यका॥ स्वगृह्योक्तविधानेनंदद्यात्तांपरशाखिने॥ पूजयेन्मधुपर्केणस्वश
ववाविधिनावरं॥ आकन्यादानपर्यंतंपिताकुर्यात्स्वशाखितः॥ दंपती॥ धनियमः॥ तत्रदंसूत्र॥ अतऊर्ध्वमक्षारल
वणाशिनौब्रह्मचारिणावलंकुर्वाणावधुःशयानौस्यातांत्रिरात्रंद्वादशरात्रंसंवत्सरंवैकर्षिरिति॥ तत्रस्मृतिः
विवाहेदंपतीस्यातां त्रिरात्रंब्रह्मचारिणौ॥ अलंकृतावधश्चैवसहशाय्यशतासनौ॥ कारिका॥ वध्वासहैवकुर्वीत
पित्॥ कुर्वीतमंगलस्नानंकृत्वावस्त्रंचधारयेत्॥ ताभ्यांचवाससीदद्यादैरिणींपूजयेदथ॥ चतुर्थीमध्येज्ञा
यंतेदोषायदिवरस्यचेत्॥ दत्तामपिपुनर्दद्यात्पितान्यस्मैविदुर्बुधाः॥ आचार्यः प्रवरैक्याद्दिदोषास्युःपति
संगादधोयदि॥ दत्तामपिहरेद्द्यादन्यस्माइतिकेचन॥ हेमाद्रौ॥ कलौतुपुनरुद्वाहंवर्जयेदितिगालवः॥ कस्मै
श्चिद्देशाइछंतिइहदेशेनकेचन॥ इतिपुनरुद्वाहं॥ वरस्यपित्रेमात्रेचदद्याद्वस्त्राणिवैततः॥ वरमातुःकरेद
द्याद्वंशपात्रंसुपूजितं॥ बलिदानंततःकुर्याच्चतुर्दिक्षुयथाक्रमं॥ अनेनबलिदानेनप्रियतामितिदेवताः॥
स्सम॥ वंशदानमिदंपुण्यंवंशानोवंशवर्धनं॥ वंशस्यदीययतेदानमतःशांतिंप्रयच्छमे॥ अस्मदादिसुहृद्
धून्मुक्तायातिभवद्गृहं॥ मातःपालयभावेनकन्यांमेरूपवत्सल॥ कन्यासापालितास्माभिःक्षणमेतज्जन्म

तः॥दीयतेतेसुतायाद्यप्रीतये पार्वतीपते ॥ कन्यासापालितावाभ्यामितिस्नेहेन पुत्रवत्॥ इदानीं तव पुत्राय दत्ता
स्नेहेन पाल्यतां ॥ इति चतुर्थी ॥ अथ वधूप्रवेशः ॥ तत्रेदं सूत्रं ॥ प्रयाणउपपद्यमानेप्रात्ते तां नयतु हस्त गृह्येति य
नमारोहयेदिति ॥ कारिका ॥ विवाहानंतरं गच्छेत्सभार्यः स्वस्य मंदिरं ॥ यदि ग्रामांतरे तस्यात्तत्र यानेन गम्यते ॥ वि
वाहमारभ्य वधूप्रवेशो मध्ये शुभः षोडशवासरस्य ॥ निषिद्धतारातिथियोगदोषो न तत्र चैवं मुनतत्रचैवं मुनयो
वदंति ॥ आषोडशादिनादर्वाक् न तु वध्वाः प्रवेशने ॥ तिथिवासरताराणां दोषस्तत्र न विद्यते ॥ यथाचास्त्यथैव कार्यः॥
विवाहमारभ्य वधूप्रवेशो युग्मे दिने षोडशदिनावधिः स्यात्॥ न चासमाने यदि पंचमे ह्नि शस्तस्ततदूर्ध्वं निदिवाप्रश
स्तं॥ वधूप्रवेशनं कार्यं पंचमे सप्तमेपि वा॥ नवमे च शुभे वारे स्फुलग्ने शशिनो बले। उद्वाहे चतुरष्टषड्दशदिनेप्र
श्टंवधूवेशनमासे स्युर्द्विचतुः षडष्टदश सुश्रीः पंच आयुःप्रदं॥ वर्षे तु द्विचतुःषडष्टमशुभं पंचाद्यमुख्यापरैः पूर्वा
पुण्यमनोरथाविभवदा वध्वाः प्रवेशो भवेत्॥ वधूप्रवेशो नदिवाप्रवेशोन्यप्रवेशो न निशि प्रशस्तः॥ दिवाच रात्रौ च
गृहप्रवेशः संकीर्तयस्या त्रिविधः प्रवेशः॥ अथ देवतोत्थापनं॥ समे च दिवसे कुर्यात् देवकोत्थापनं बुधः॥ षष्ठं च
विषमेन षष्ठं त्यक्त्वा पंचमसप्तमौ॥ प्रतिष्ठादिनमारभ्य षोडशाहाद्यमध्यतः॥ मंडपोद्वासनं कुर्यादुद्वाहे व्रतेदश
व्रत इति उपनयने दशाहान्मध्यतीत्यर्थः॥ विवाहोत्सवथमे पुष्पेला षाढवाधिमासिके॥ नैव भर्तृगृहे वासश्चैत्रे ३२

हस्तोच्छ्रितां मंदिरवामभागे॥ स्तंभैश्चतुर्भिः कृतनिर्मितांगि वेदिं विवाहे प्रवदंति संतः॥ अन्यपक्षः॥ कन्याहस्तैः पंचभिः स
प्तभिर्वा वेदिं कुर्यात्कर्मपृष्टे च्छ्रितांगि॥ रम्ये हर्म्ये निर्गमाद्वामभागे जायापत्यो राशिषोवाचयित्वा॥ अथ व्रतबंधे वे
दिकः॥ प्राक्पश्चिमोर्ध्वपदषट्कयुक्तं मुदीच्ययाम्यादिपदानि पंच॥ एवंविधा ज्योतिषरत्ननिर्मिता बटोःशतपुर्ण
वती ह वेदिका॥ अन्यपक्षः॥ आचार्यस्य पदैः षड्भिश्चतुर्भिरथवा करैः॥ विस्तृता चतुरस्रा च बटोर्वेदी करोन्नता॥ लंबा
भित्तिर्द्विहस्ता स्यादुन्नता त्रिंशदंगुला॥ प्राग्वद्या विवाहे च विस्तृत्या द्वादशांगुला॥ अष्टावष्टौ प्रकुर्वीत सोपानानथ
पार्श्वयोः॥ नंद्यग्रे कलशाकारमिति यज्ञविदां मतं॥ अन्यपीठं॥ अष्टत्रिंशद्दशांगुलमुन्नतं स्यात्षडंगुलं॥ अष्टां
गुलं च विस्तारं कुर्यादौदुंबरादिना॥ अथ होमः॥ कारिका॥ होमदेशं व्रजेयुस्तां प्रतिगृह्य करौ मिथः॥ आत्मनो दक्षिणे
पार्श्वे वधूं तामुपवेशयेत्॥ विवाहः स्याद्दिने यस्मिन् दिवा वाथ दिवा निशि॥ होमं तत्रैव कुर्वीत यथानुक्रमणे न तु॥ हे
म इति विवाहहोम इत्यर्थः॥ तावद्विवाहो नैव स्याद्यावत्सप्तपदी परवेत्॥ तस्मात्सप्तपदी कार्या विवाहे मुनिभिः स्मृतः॥ बृ
धमनुः॥ एकत्वं संगता भर्तुः पिंडगोत्रं च सूतके॥ स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे॥ गृहप्रवेशहोमं तु होमं चैवाहि
कं च हि॥ एकतंत्रेण वा कुर्यादेकस्मिन्ननलेपि च॥ स्ववामे सागमे पत्नीं लाजान् हुत्वोपवेशयेत्॥ युंजुः सप्तपदादूर्ध्वं
होमांते चैव बह्वृचः॥ सायमौपासनं कुर्यादस्तं याति दिवाकरे॥ सभार्यो विधिना चैव तस्मिन्नेव कृताशने॥ कारिका॥

कर्म कुर्वतां॥ कर्मण्यक्रियमाणे तु मध्ये चेत्सूतकं भवेत्॥ यावत्कर्मसमाप्तिः स्यात्तावन्न प्राप्नोति सूतकं॥ विना नैमित्य
मन्येषु कर्मस्वाशौचमिष्यते॥ विश्वरूपे॥ विवाहादिषु मध्ये चेत्सूतके सति चांतरा॥ पूर्वसंकल्पितं द्रव्यं दीयमानं न
दुष्यति॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके॥ शेषमन्नं परैर्देयं दातॄन्भोक्तॄन् न संस्पृशेत्॥ ॥सूतकेपि ग्राह्या
णि॥ विवाहे नियमाह॥ गर्गः॥ नांदीश्राद्धे कृते चैव यावन्मातृविसर्जनं॥ दर्शश्राद्धं क्षयश्राद्धं स्नानं सीतोदकेन
च॥ अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च॥ ब्रह्मयज्ञं चाध्ययनं नदीसीमातिपातनं॥ उपवासव्रतं चैव श्राद्धभोज
नमेव च॥ नैव कुर्युः सपिंडाश्च मंटपोद्वासनावधि॥ मंटपोद्वासनात्पूर्वं नांदीश्राद्धे कृते यदि॥ ये कुर्वंति नरा मो
हादपमृत्युं व्रजंति ते॥ नांदीश्राद्धे कृते चैव पित्रोः श्राद्धं कृतेपि च॥ मोहादुपवसेद्यस्तु नरकं प्रतिपद्यते॥ पित्रोः
मृत्यादिके प्राप्ते नांदीश्राद्धं न कारयेत्॥ यदि मोहाद्द्विजः कुर्यात् मांगल्यमशुभं भवेत्॥ निवृत्यय ति मांगल्यं स्व
धया मंदबुद्धयः॥ मांगल्यविमुखाः शश्वदपमृत्युं व्रजंति ते॥ मुहूर्तं न लभेदन्यत्कथं वैवाहिकं तदा॥ समाप्याथ
कर्मभ्यज्य कृत्वाभ्युदयिकं ततः॥ देशकालभयाद्वापि समाहितमना भवेत्॥ वैवाहिकं द्विजः कुर्यात्संकटे मुन
यो विदुः॥ सपिंडा नैव कुर्वीरन्न्ये यामे गृहेपि च॥ नैव दोषः स्वधाकारो भवेद्यदि॥ ॥ अथ विवाहा
दूर्ध्ववर्ज्यमाह॥ स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं करकप्रदानं॥ अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मंग २८

लतो दमेकं॥ मासषट्कं विवाहादिव्रतप्रारंभणेपि च॥ जीर्णभांडानि न त्याज्यं गृहसंमार्जनं तथा॥ ऊर्ध्वं विवाहात्सु
तस्य तथा व्रतनिबंधनात्॥ आत्मनो मुंडनं चैव वर्षं वर्षार्धमेव च॥ विवाहोपनयादूर्ध्वं वर्षं वर्षार्धमेव च॥ न दद्यात्करका
न्न तिलैस्तर्पयेत्पितॄन्॥ वृष्योरुपरि कर्तव्यं मातापित्रोर्मृतेहनि॥ मांडव्यः॥ पदं पत्योः पितरौ भ्राता चैव नीतस्तु सो
दरः॥ पितृव्यस्तत्सुतश्चैव पितामहपितामही॥ एषामन्यतमः कश्चित्मृतो भवति मानुषः॥ कृतेवाङ्निश्चये पुंसां प्रति
कूलं प्रजायते॥ दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च॥ उदासवर्तिनश्चैव प्रतिकूलं न विद्यते॥ प्रतिकूले तु संजाते
विवाहो नैव कारयेत्॥ प्रतिकूलेपि कर्तव्यो ह्यापत्कर्तव्यं शांतिपूर्वकं॥ ॥प्रतिकूले कालमाह॥ पितुर्मातुश्च पत्न्याश्च वर्षं
वर्षं तदर्धकं॥ सुतभ्रात्रोः सार्धमासं समितं॥ तदंते शांतिकं कृत्वा यथोक्तविधिना ततः॥ पुनश्चैवाथ वाग्दानं कृत्वा
लग्नं विधीयते॥ प्रतिकूलेपि पिंडानां मासमेकं विवर्जयेत्॥ शांतिं कृत्वा विधानेन ततो लग्नं विधीयते॥ संकटे समनु
प्राप्ते याज्ञवल्क्येन योगिना॥ शांतिरुक्ता गणेशस्य पूजां कृत्वा समाचरेत्॥ श्रियं विष्णुं तथा गौरीं मृत्युंजयं ततः परं॥
मृत्युं च प्रार्थयेद्भक्त्या ततन्मंत्रेण वै क्रमात्॥ सहस्रमयुतं वापि ब्राह्मणैः कारितं जपं॥ एतेषां तिथिमाः पूज्याः आदि
दि ग्रहास्ततः॥ शांतिकं विधिना कुर्यात्कलशस्थापनादिकं॥ समिद्भिश्चरूपाचैव होमः कार्यो यथाविधि॥ ततो

व्याहृतिभिर्होमं शतमष्टोत्तरं कुर्यात्॥ ततः स्विष्टकृतं कृत्वा होमशेषं समापयेत्॥ कलशस्थोदकेनैव सिंचयेद्दंपती ततो॥
आचार्यं पूजयेद्भक्त्या वस्त्रालंकारभूषणैः॥ ऋत्विग्भ्यो दक्षिणां दत्वा ब्राह्मणान्भोजयेत्तथा॥ प्रतिकूलविधिः प्रोक्त
इत्येवं पूर्वसूरिभिः॥ अकृत्वा शांतिकं यस्तु निषिद्धे सति दारुणे॥ यः करोति शुभं कर्म विघ्नं तस्य पदे पदे॥ अथ पितरि
मृते शुभकर्मनिषेधः॥ मृते जाते जनन्यां च वर्षं वर्षार्धमेव च॥ न कुर्याच्छुभकर्माणि कलधर्मास्तथैव च॥ पितुर
ब्दमशौचं स्यात् षण्मासं मातुरस्य तु॥ मासत्रयं तु भार्यायां तदर्धं भ्रातृपुत्रयोः॥ अन्येषां तु सपिंडानां मासमेकमु
दाहृतं॥ उक्तकालावधिर्यावत्तावन्नैव शुभक्रिया॥ दशाहानंतरं प्रोक्तमाशौचं च द्विजन्मनां॥ शुभार्थ एव जानी
यात्कृतापि हि सपिंडने॥ यावदाशौचमारभ्य सपिंडीकरणं भवेत्॥ विवाहादीनि सर्वाणि शुभकर्माणि वर्जये
त्॥ मृते पितरि यस्याथ मृतायां वापि मातरि॥ न कुर्याच्छुभकर्माणि वर्षं वर्षार्धमेव च॥ व्रतबंधं विवाहं च न कुर्या
च्छोभनं सुतः॥ वर्षं वर्षार्धकं चैव कृते पि हि सपिंडने॥ विवाहादि प्रकुर्वीत यदा महति संकटे॥ सपिंडीकरणादू
र्ध्वं मासिकान्यपकर्षयेत्॥ कन्यायाश्चातिकालस्य वरस्यापि भवेद्यदि॥ तस्या विवाहे न दोषोस्ति तथा चैवोपनायने॥
शुभकर्माणि कार्याणि॥ निवृत्ते सूतके हि तु॥ इत्युक्त्वास्तत्सपिंडानां केचिन्नेच्छंति मानवाः॥ व्याघ्रः॥ प्रेतक्रिया
मनिष्ट्वा तु न कुर्याच्छोभनं सुतः॥ ॥सत्यव्रतः॥ पिंडदानं परित्यज्य संकल्पं कुरुते यदि॥ संततेस्तु विनाश

स्तावदूहे तथा॥ वंशदानं विना यस्तु मंडपोद्वासनं यदि॥ आसनात्कुरुते मूढो दंपत्योः क्षयमायुषः॥ स्मृत्यर्थसारे॥ वरे
देशांतरगते त्रीनृतून्संप्रतीक्ष्य वै॥ कन्यायस्यै प्रदातव्या वाग्दाने तु कृते सति॥ पंचत्वं गते वरो गच्छेद्वाग्दाने यदि वै कृते॥
कन्यान्यस्मै प्रदातव्या तथा सप्तपदात्पुरा॥ कृते सप्तपदे भर्तुर्वियोगो यदि जायते॥ नैव दद्यात्पुनरन्यस्मै कलौ कन्यां मनीषि
भिः॥ अथ प्रतिकूलं॥ स्मृतिचंद्रिकायां॥ कृते वृद्धिश्राद्धे यदि स्यान्मृत्युर्मर्त्तस्य गोत्रिणां॥ तदा अमंगलं कार्यं नारीवैध
व्यदं ध्रुवं॥ भृगुः॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः॥ तदा विवाहो नैव कार्यः स्वपक्षे क्षयदो यतः॥ वृद्धशौनकः
वरवध्वोः पिता माता पितृव्यश्च सहोदरः॥ एतेषां प्रतिकूलं चेन्महाविघ्नप्रदं ध्रुवं॥ पितापितामहश्चैव माता चैव पि
तामही॥ पितृव्यस्त्री सुतो भ्राता भगिनी चाविवाहिता॥ एभिरेवापि चान्यैश्च प्रतिकूलं बुधैः स्मृतं॥ अन्यैरपि विपक्षैश्च कृ
त्विक्तु न निष्क्रियाः॥ विधिर्भवेत्सपिंडानां नापरेषामयं विधिः॥ अथ विवाहादिषु सूतकोत्पत्तिः॥ चौले चैवोपनयने
विवाहे च महामखे॥ त्रिषट्दशैकविंशत्या प्रारंभे नास्ति सूतकं॥ तथा च॥ एकविंशत्यहर्यज्ञे विवाहे दशवास
राः॥ त्रिषट्चौलोपनयने नांदीश्राद्धं पुरोदिनं॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः॥ नांदीश्राद्धं विवाहादौ श्राद्धे
पाकपरिक्रिया॥ व्रतयज्ञविवाहेषु श्राद्धे होमजपार्जने॥ प्रारब्धे॥ सूतकं न स्यादनारब्धे तु सूतकं॥ प्रारंभादूर्ध्वमा
शौचं विवाहं कार्यमेव तु॥ व्रतादौ पूजने चैव प्रारंभे नास्ति सूतकं॥ वृद्धशौनकः॥ ऋत्विजां दीक्षितानां च यज्ञियं

स्यात्संपदं हरणं भवेत्॥ पित्रोरेवं मृतौ हेतुर्गयायां च महालये॥ पिंडनिर्वपणं कुर्यात्कृतोद्वाहोपि यः सुतः॥ ॥अथैकोदरवि
वाहादि॥ प्रत्यकद्वाहो नैव कार्यस्त्वेकस्मिन्दुहितृद्वयोः॥ नचैकजन्ययोः पुंसो विवाहश्चोपनायनं॥ एकजन्ये तु कन्ये द्वे पुत्रयो
नैकजन्ययोः॥ कन्ये द्वे तु नचैकस्मै प्रदद्यात्तु कदाचन॥ एकमातृकसूतानामेकस्मिन्वत्सरे यदि॥ विवाहं नैव कुर्वीत
वदंति मुनयोन्यथा॥ विवाहस्त्वेकजन्यानामेकस्मिन्नुदये कुले॥ नाशिकेरात्येकवर्षेह्येकस्मिन्विधवा भवेत्॥ एको
दर्योः करतलग्रयदि स्यादेकोदर्यावरयोः कुलनाशनं च॥ एकाद्विस्तु विधवा भवतीति कन्यानंधत्तरं तु शुभवंशस्यु शैलरा
धा॥ न मंडनान्मुंडनमर्धमिदं न पुत्रयोर्मंडनमेकवर्षे॥ न पुंविवाहोर्ध्वमृतुत्रयेपि विवाहकार्यं दुहितुश्च कुर्यात्॥ ज्योतिः
ऊर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहं दुहितुः समार्धं॥ अप्राप्य कन्यां स्वश्रुरालये तु वधूप्रवेशः स्वगृहे च चादौ॥ ए
कोदरप्रसूतानामेकस्मिन्नेवत्सवे॥ न कुर्यान्मंगलं यौ त्रीयणे विवाहं चोपनायनं॥ चकाचौलं॥ एकोदरप्रसूतानां वि
वाहं चोपनायनं॥ चौलकर्म तथा चेत्ति॥ मंगलत्रयमुच्यते॥ एकस्मिन्मंटपे प्येकी न कुर्यान्मंगलत्रयं॥ यदि भिन्नो
दराणां स्यात्समाप्ये कं पुनर्वसेत्॥ भिन्नोदराणामेकस्मिन्न कुर्यान्मंटपेपि च॥ समाप्य मंगलं चैकं पुनः कुर्याच्च ना
दिकं॥ स्मृत्यर्थसारे॥ उद्वाह्य पुत्रीं न पिता विदध्यात्पुत्र्यंतरं सोद्वहनं कदाचित्॥ यावच्चतुर्थदिनमंडगल्हस्य समा
पनं तावदसौ विदध्यात्॥ पुत्रीपरिणयादूर्ध्वं यावद्दिवचतुष्टयं॥ पुत्रांतरं तु कुर्वीत नोद्वाहमिति सूरयः॥ उत्रस्याप्युं

लक्षणं॥ अथयमलः॥ज्योतिःसारे॥ एकस्मिन्नंतरे वासरे मंटपे पिच॥ कर्त्तव्यं मंगलं स्वस्रोः भ्रात्रोर्यमलजातयोः॥ अथसं
कटे प्राह्व त्तिमाहज्योतिःसारे॥ एकोदर्योवरयोरेकदिनोद्वाहकृतो भवेन्नाशः॥ नद्यंतरएकवर्णे किंथाऊ संकटे च शुभो॥ न
प्रवृत्तिनिषिद्धनलसंप्राप्ते संकटे भवति॥ एकोदरसंभवयोरेकाहे मंटपे काले॥ संकटे तथा च स्मृत्यर्थसारे॥ नचैकज
न्ययोः पुंसोः विवाहस्त्वेकवत्सरे॥ अब्दभेदे शुभं केचित् प्राऊर्महति संकटे॥ कृते चैवोपनयने भवेद्यावद्दिनत्रयं॥ कन्या
दानं न कर्त्तव्यं पित्राहूरन्ति सूरयः॥ व्रतबंधनमेकस्य तथैकस्य विवाहकं॥ एकस्मिन्नापि वान्यस्मिन्दिने कुर्यात्तु वै पि
ता॥ मध्ये चेद्व्रतबंधस्य दिवाहो यदि वा भवेत्॥ अलाभे सुमुहूर्त्तस्य कन्याया वा सुतस्य च॥ कन्याविवाहे मध्ये चेद्दिवा
हस्यात्सुतस्य च॥ पितैव तु तदा कुर्यादिति केचिदुदीरितं॥ इत्थं भवेद्यदा तत्र कथं स्यान्मातृपूजनं॥ नांदीश्राद्धं भ
वेद्येकं स्वस्ति वाचनपूर्वकं॥ एका एव तु कर्त्ता स्याद्देने केपि कर्मसु॥ अष्टवर्गो भवेदेकः संकल्पस्तु पृथक् पृथक्॥
मंडनोपरि मुंडनं सारावल्यां॥ चौलं मंडलमेवोक्तं वर्जयेद्दूरपात्परं॥ ऋतुत्रयं पुनर्यावन्न कुर्याल्लघु मंगलं॥
कुले ऋतुत्रयादर्वाङ् मंडनान्न तु मंडनं॥ प्रवेशान्निर्गमे पश्चान्न कुर्यान्मंगलत्रयं॥ न पुंविवाहोर्ध्वमृतुत्रयेपि
विवाहकार्यं दुहितुश्च कुर्यात्॥ नमुंडनाच्चापि हि मंडनं च गोत्रे कृतायां यदि नाब्दभेदः॥ कुले ऋतुत्रयादर्वा
क् मंडनान्न तु मंडनं॥ अब्दभेदे प्रकुर्वीत मंडनं भवेत्तु॥ पुत्रोद्वाहान्नैव पुत्री विवाहस्याहृतुत्रय॥ अब्दांतरान्मंडनं ३६

चनैकदा मुंडनं द्वयं ॥ फाल्गुणे चैत्र मासे तु पुत्राद्वाहोपनायने ॥ अब्दभेदे न दोषः स्यादित्याचार्यो ब्रवीदथ ॥ गर्गः ॥
दोषः स्यात्सर्व मुद्वाहात्कुले चेदुपनायनं ॥ न दोषः पुरुषोद्वाहादूर्ध्व कन्या विवाहिके ॥ अब्दभेदात्स्र कुर्वीत नर्तुत्रय विडंब
नं ॥ व्याघ्रः ॥ पुत्रोद्वाहात्परं दोषो दुहितुः स्याद्विवाहिके ॥ नैव दोषः सपिंडेषु न दोषो भिन्नमातृके ॥ फाल्गुने चोद्विवाहः
स्याच्चैत्रे चैवोपनायनं ॥ अब्दभेदात्स्र कुर्वीत नर्तुत्रय विडंबनं ॥ अथ परिविन्नादि स्मृत्यर्थसारे ॥ दारायहोत्रादी
नां चकुरु ते योग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तस्तु पूर्वजः ॥ पितृव्यपुत्रे सापत्ने परदारासुतादिषु विवाहा
धान यज्ञादौ परिवेत्ताद्यदूषणं ॥ षंढश्च बधिरस्तब्ध जगद्गदपंगुषु कुब्ज वामन रोगार्त्त श्रुष्कांगि विकलांगिषु ॥
क्लीबे पुंस्त्वे वमते चज्ञायने स्थिति निद्रिये ॥ मूकोन्मत्तेषु सर्वेषु न दोषो परिवेदने ॥ प्रयोग पारिजाते ॥ एकमातृकसू
तानां पुत्राणां वेदनेषु वै ॥ दोषः स्यात्सर्व वर्णेषु न दोषो भिन्नमातृषु ॥ विवाहानधिकारास्याज्ज्येष्ट कन्या स्थिताय
दा ॥ तदनुज्ञां विनावापि कनिष्ठमुद्वाहेत्तदा ॥ कालप्रतीक्षणं नस्याद्रजो दृष्टं न दोषभाक् ॥ परिवेत्ता स च घस्तु कप
त्तितः कन्यकापि च ॥ अथ असंस्कृत कन्यारजोदोषः ॥ स्मृत्यर्थसारे ॥ असंस्कृता तु या कन्या रजसा चेत्परिप्लुता ॥ भ्रा
तरः पितरो तस्याः पातितास्युर्न संशयः ॥ तथा चेतिहासे ॥ पितुर्गेहे तु या कन्या रजः पश्यत्य संस्कृता ॥ सा कन्या वृष
ली ज्ञेया तत्पतिर्वृषली भवेत् ॥ अथ स्त्रीणां रजोदोषः प्रसंगतः कथ्यते ॥ रागजं रोगजं चैव द्रव्यजं कालजं तथा ॥

स्त्रीणांचैवरजःप्रोक्तंकालजंदोषकृद्भवेत्॥ यावत्पंचाशद्वर्षादिनिपतेत्।दशावत्सरात्॥ मासिमासिरजस्त्रीणांका
लजंतत्प्रतीक्षते॥ रागजंरोगजंचैवद्रव्यजंचापियद्भवेत्॥ अकालेयदिचेत्स्त्रीणांतद्रजोनैवदुष्यति॥ पंचा
शद्वर्षदूर्ध्वंनैवदोषः॥ याज्ञवल्क्यः॥ रजस्रावेत्तुनारीणांरजोदोषदिनत्रयं॥ चतुर्थेदिवसेस्नातास्पर्शनादेवनि
दितः॥ शुद्धाभर्तुश्चतुर्थेह्निस्नातानारीरजस्वला॥ दैवेपिकर्मणिपच्चेचपंचमेहनिशुध्यति॥ स्मृतौ॥ रजस्वलायाः
पुनरेवचेद्रजःप्राग्दशह्यतेष्टदशावासराच्छुचिः॥ अष्टादशाहेयदिचेद्दिनद्वयादेकोनविंशेत्रिदिनस्ततःपरं॥ रजोयु
ताष्टदशावासरेपुनःप्रयोण्यायौवनशालिनीवधूः॥ च्यहेणसाशुध्यतिदेवपित्र्ययोरजोनियुक्तंशुचिमाल्वव
सति॥ रजस्वलायदिस्नातापुनरेवरजस्वला॥ तत्रस्नानेनशुद्धिःस्यादष्टदशादिनातुरा॥ दिनाच्चेच्छोडशादर्वाङ्ना
रीचातिवयोवना॥ पुनःरजस्वलापिस्याच्छुद्धास्नानेनकेचन॥ रात्रेःकुर्यात्त्रिभागंतुद्वौभागौपूर्ववासरे॥ ऋतौस्मृ
तेम्प्रेतेचैवज्ञेयोंत्यांशःपरेहनि॥ अथान्यपक्षः॥ रात्रावेवसमुत्पन्नेमृतेरजसिसूतके॥ पूर्वमेवदिनंग्राह्यंयावन्नो
दयतेरविरिति॥ कश्चिद्देशाचारः॥ नतुसर्वत्र॥ अथद्वितीयविवाहनिमित्तं॥ स्मृत्यर्थसारे॥ अप्रजांदशमेवर्षेस्त्री
प्रजांद्वादशेत्यजेत्॥ मृतप्रजांपंचदशेसद्यस्त्वप्रियवादिनीं॥ स्मृतौ॥ व्याधितांस्त्रीप्रजांवंध्यामुन्मत्तांविगतार्त
वां॥ अदुष्टांलभतेत्यागंतीर्थतोनतुधर्मतः॥ अग्निसिष्टादिशुश्रूषाणांबहुभार्यःसवर्णया॥ कारयेत्तद्बहुत्वंचज्ये ३०

तंविभज्याग्निंपूर्वपश्चिमयोर्दिशोः॥ आद्यस्तुपूर्वभागाग्नौप्रायश्चित्ताहुतीर्हुनेत्॥ तेथाहिवेकइत्येकात्यादेवानाम्
पीत्यथ॥ द्वितीयःपश्चिमस्थेग्नौवाहुतीर्हुनेद्यथा॥ सुवर्णवस्त्रोरेकवर्चा आक्रंदद्ग्निः॥ अथायथानिश्चित्येकात्यादेवा
यत्वामग्नेमानुषीरिति॥ गृहदाहाग्निसंसर्गोगृह्याग्नेर्जायते यदि॥ कृत्वाचाघारपर्यंतंक्षामायाज्याहुतीर्हुनेत्॥ ग्रा
मदाहाग्निसंयोगेगृह्याग्नेर्यस्यचेद्भवेत्॥ जुहुयात्पूर्ववत्कृत्वासंसर्गयाहुतीद्वयं॥ अग्निकार्यंकृतंचेस्याद्गृह्या
ग्नौब्रह्मचारिणा॥ प्रायश्चित्तंगृहीकुर्यात्तस्मिन्नेवहुताशने॥ अथोपासनादत्तीतदिनप्रायश्चित्तं॥ कारिका॥ नित्य
होमेत्वतीक्रांतेसंस्कृत्याज्यंचपूर्ववत्॥ चतुष्कृत्वागृहीत्वाज्यंमनस्वत्स्रुग्जुहोत्यथ॥ अर्वाक्त्रिरात्राज्जुहुया
त्‌ अयाश्चेत्यसप्तरात्रात्तुमनस्वतीच॥ एकाहेसततंतुमत्यास्याद्वादशाहेध्रुवमग्निनाशः॥ हुतकारहितेऽग्ने
मनोयाभूर्भुवःस्वरो॥ मध्येपर्वणिसप्ताहेपुनःसंधानविधिर्यत्ने॥ आदादद्वादिनादर्वाक्प्रायश्चित्तंकथंभवेत्॥
तत्रकृत्वाज्यभागांतं॥ अयाश्चेत्यादिसप्तकं॥ हुत्वास्विष्टकृतादिस्यात्होमशेषंसमापयेत्॥ द्विवसाद्वादशादू
र्ध्वंकुर्याधामंविहौवाहवत्॥ गृह्याग्नावेवकुर्वीतप्रायश्चित्तनिमित्तकं॥ तदभावेतुकुर्वीतलौकिकाग्नौयथा
विधि॥ प्रातर्होमोथवासायंप्रमादान्नकृतोयदि॥ हुत्वाव्याहृतिभिश्चाज्यमतीतव्याहृतिर्हुनेत्॥ प्रायश्चित्तवि
शेषस्ययत्रनोक्तोविधिर्भवेत्॥ हुनेदाज्याहुतीस्तत्रभूर्भुवःस्वरितिहुनेत्॥ पुनराधाने॥ स्वोदक्यांपतितःशूद्रोर २८

क्तंपुत्रंपुरीषकं॥ स्पृहेदग्निंसमिधंचेत्पुनःसंधानमिष्यते॥ समिधःश्वेतप्तायान्नाशःस्याद्गृगएवच॥ पुनःसंधानमि
छंतिकेचिद्यज्ञविदोजनाः॥ समित्सुतपनात्पूर्वमग्निश्चेदुपनश्यति॥ पुनराधानवत्कुर्याद्याश्चात्यादिसप्तकं॥ अ
थविधुरोपासनं॥ तत्रेयंश्रुतिः॥ तदाहुर्वीचापत्नीकोग्निहोत्रंकथमेवजुहोतीतिसत्रं॥ ॥तथाचस्मृतिः॥ मृता
यामपिभार्यायांवैदिकंनत्यजेद्द्विजः॥ उपाधिनापियत्कर्मयावज्जीवंसमाचरेत्॥ अन्यकशमयंपत्नींकृत्वातुगृह
मेधिनः॥ अग्निहोत्रमुपासंतेयावज्जीवमनुव्रताः॥ अथविधिमाह॥ उद्धृत्यवह्निंप्रणवेनचादौप्रत्याग्निकषमामित्य
वाहरेत्॥ निधायपृष्ठेदिविमंत्रकेनततःस्तुहोमःस्विस्वभिःसमिद्भिः॥ लेखादभोनैवचतत्सवितुर्विश्वादिनोद्या
नइमेचमंत्राः॥ आरोपणंचाप्यवरोपणंचत्यक्त्वापत्निरेवंविधुरानलस्य॥ इत्यंकृत्वाततोहोमंसायंप्रातर्विधीयते॥
प्रतयत्समिधंवापिपाणिवावाजुग्मपतयेत्॥ प्रत्यवरोहणंचैवनचैवारोपणंतथा॥ विधुरस्यविधिःकैश्चिदुक्तो
यमितिसूरिभिः॥ अथमृतभार्यस्यपुनर्विवाहविषये॥ संग्रहे॥ प्रमादान्मृतनत्सरादितःपुनरुद्वाहविधिर्यदाभवेत्॥
वत्सरपरिविषयेशुभःसमवर्षेतुप्रमृतिप्रदोभवेत्॥ पत्नीवियोगंप्रथमेचवर्षेवाचेद्द्विवर्षेपुनरुद्वहेत्सः॥ अयुग्म
मासेतुशुभप्रदःस्याद्विसिष्टगर्गात्रिपराशराद्याः॥ भार्यांतरविवाहःस्याद्युग्मेवत्सरत्सयः॥ युग्मेभर्तृविनाशःस्या
दयुग्मेस्यवचनंयथा॥ अपुत्रिणीमृताभार्यातस्यभर्तुर्विवाहिकं॥ युग्माद्युग्ममासेवाविवाहःशुभदोभवेत्॥ त

थाचगर्गः॥मृतेजनन्यांजनकेंगनायांद्वितीयवर्षेप्रकरोतिशोभनं॥करोतिमोहात्प्रकरोतिहानिंवदंतिगर्गात्रिपराश
राद्यः॥इतिमृतभार्यस्यविधिः॥अथार्कविवाहविधिः॥अर्कलार्कंविवाहेतुत्रितीयांयदिचोद्वहेत॥विधवासभवेत्क
न्यातस्मात्कार्याद्विचक्षणः॥अर्कसन्निधमागम्यकुर्यात्स्वस्त्यादिवाचनं॥नांदीश्राद्धंहिरण्येनद्यष्टवर्गान्प्रपूजये
त॥पूजयेन्मधुपर्केणवरमाचार्यहस्ततः॥अर्कस्यपुरस्तिष्ठेत्प्रार्थयेत्तंद्विजोत्तमः॥त्रिलोकवासिनासप्ताछायायास
हितारवेः॥तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु॥अलिगैरभिषिचायस्वेतवस्त्रेणवेष्टयेत॥कार्पासतंतुभिश्चै
वगंधपुष्पैःसमर्पयेत॥गुडोदनंचनैवेद्यंताम्बूलंविनिवेदयेत॥अर्कप्रदक्षिणंकुर्यात॥जपेन्मंत्रमिमंबुधः॥मतप्रीति
कराचयंमयाष्टष्टापुरातनी॥अर्कजाब्रह्मणासृष्टासर्वप्राणिहितायंच॥वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्ध
नं॥तृतीयोद्वाहजंपापंमृत्युंचाशुविनाशय॥इतिसंप्रार्थ्यतांविप्रः॥कंन्यावरणमाचरेत्त॥गोत्रस्वस्यतुसंबंधम
च्चार्यत्रिपुरुषं॥आदित्यास्याथसवितुरर्कस्यतुयथाक्रमं॥पुत्रीपौत्रीचनत्रीचगोत्रपश्याम्यिहंखलु॥आचार्यो
मुखतःकुर्यान्मधुकृत्वादिकंचयेत॥मंत्रमुच्चार्यतांदद्यादाचार्योयिवरायच॥अर्ककन्यामिमांविप्रयथाशक्त्या
विभूषितां॥गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रयः॥इत्थंकृत्वायथोक्तविवह्निर्ब्राह्मणैःसह॥कंकणंचाथब
ध्नीयात्वस्त्रंमंगलसूत्रकं॥स्वशाखोक्तविधिनानेनतत्तन्मंत्रेणकारयेत॥गायत्र्यावापिकुर्वीतकेचिदेवंवद २९

ष्ययागहितानचेत॥स्वरूपांसुप्रजांचैवसुभगामात्मनःप्रियां॥धर्मानुचरणांभार्यांनत्यजेद्द्विजसत्तमः॥अग्निसंयोगः॥जी
वत्याज्येष्ठपत्न्यांचकथंस्त्रीपुनरुद्वहेत॥कृत्वामंगलसूत्रांतंमधुपर्कादिपूर्ववत॥सर्वकनिष्ठभार्यायाहवनंतत्रचैवहि
कनिष्ठभार्यवासर्वविवाहिकंहवनंचज्येष्ठभार्याग्नौकुर्यादित्यन्वयः॥विधिवज्ज्येष्ठभार्याग्नौकुर्याद्वैवाहिकंचयेत॥
तदभावेतुलौकाग्नौसर्ववैवाहिकंभवेत॥वक्ष्येहमग्निसंयोगंपत्न्याज्येष्ठंकनिष्ठयोः॥निदध्याज्येष्ठभार्याग्निस्थंडिले
दक्षिणेचतं॥तदुत्तरेकनिष्ठाग्निंस्थंडिलेतंविधायच॥पृथकस्थंडिलयोरग्निंसमाधायथाविधि॥तत्रकृत्वाज्यभ
गंतुमन्वाधानादिकंततः॥जुहुयाज्ज्येष्ठभार्याग्नौसमन्वारब्धआहुतीः॥अग्निमीळेइतिऋक्भिर्नवभिश्चय
थाक्रमं॥ततःस्विष्टकृतंकृत्वाहोमशेषंसमापयेत्॥समिध्येनसमारोप्यत्वयंतेयोनिरित्यृच॥प्रत्यवरोहेत्यनया
चकनिष्ठाग्नौनिधायतं॥आज्यभागांतमंत्रादिकृत्वारभ्यतदादितः॥अग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअ
धिराजएषः॥तस्मैजुहोमिहविषाघृतेनमादेवनामोउद्वहेद्भागधेयंनोस्माकंमोधिराजएषः॥तस्मैजुहुहभाग
धेयं॥समन्वारब्धंएताभ्यांपत्नीभ्यांजुहुयात्घृतं॥अग्निनाग्निश्चामावग्निस्त्वंह्यग्नेअग्निनतिचापाहिनोअग्ने
एकयातिसृभिश्चततःपरं॥अस्तीदमधिमंथनमग्निभिश्चतसृभिः॥ततःस्विष्टकृतंकृत्वाहोमशेषंसमापयेत॥तत्रैवो
पासनंकुर्यात्सायमादियथाक्रमं॥अथोपासनाग्नेःसंयोगः॥संयोगेजायतेचाग्नेरग्नेरोपासनस्यतु॥निदध्या

कर्त्तव्यमिति वेदवित्तां मतं॥ अथ षोडशसंस्कारकर्माण्याह॥ भाष्यकारः॥ गर्भाधानं पुंसवनं सीमंतं जातकर्म च॥ नामनिष्क्रमणे
चान्नप्राशनं चौलकर्म च॥ तथोपनयनं चैव महानाम्नी महाव्रतं॥ उपनिषच्च गोदानं समावर्त्तनकं ततः॥ विवाहो तिष्ठकं
चेति संस्काराः षोडशैव तु॥ एते वसुनिभिः प्रोक्ताः कर्त्तव्या वद्विजन्मभिः॥ अथ नांदीश्राद्धं॥ स्मृत्यर्थसारे॥ स्वपितृभ्यः
पिता दद्यात्सुतसंस्कारकर्मसु॥ यावद्विवाहपुत्रस्य तावदेवहि तत्सतः॥ नांदीश्राद्धं पिता कुर्यात्पितृणां पितृहेतवे॥
अत ऊर्ध्वं सुतः कुर्यात्पितृणां तद्वि वै पितुः॥ नांदीमुखे कर्मणि संप्रवृत्ते पितर्यतो जीवति यस्य पुंसः॥ एषां च कुर्यात्
सपित्तास्वयं चतेषां हि कुर्यादिति शास्त्रसिद्धा॥ यदा जीवत्पितानां दीश्राद्धं कुर्याद्विधानतः॥ पितुर्माता महादीनामे
ष धर्मः सनातनः॥ मातुः श्राद्धं तु पूर्वं स्यात्पितृणां तदनंतरं॥ ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं॥ एकैकस्मिन्
दिने श्राद्धमेकैकं वृद्धिसंज्ञकं॥ श्रुत्वा यस्य विधिवत्कुर्यादेकस्मिन्नपि वादिने॥ हेमाद्रौ॥ नांदीमुखे विवाहे च प्रपिता
महपूर्वकं॥ नामसंकीर्त्तये द्विद्वान्यत्र पितृपूर्वकं॥ अथ पादप्रक्षालनविधिः॥ अप्रवाहोदके स्नानं विप्रपाभिषेच
नं॥ स्वरैभिमुखः कुर्यात्संध्यावंदनकर्म च॥ अत्र विशेषः॥ नांदीश्राद्धे कृते चैव द्वादश्यामपि सर्वदा॥ विप्राणां क्षा
लयेत्पादौ प्राङ्मुखस्तूपविश्य च॥ विप्राणमुपविष्टानां प्राङ्मुखानां च सर्वदा॥ पादौ प्रक्षालये छ्राद्धे संविष्टः प
त्यगातमः॥ नग्नश्राद्धे नवश्राद्धे सपिंडीप्रतकर्मसु॥ तिष्ठतः क्षालनं कुर्यादन्यत्रोपविशेषं द्भुवि॥ श्राद्धे यज्ञे वि ४०

वाहे च दीक्षायामागते गुरौ॥ तिष्ठतः क्षालनं कुर्यान्निराशाः पितरो गताः॥ विवाहोत्सवयज्ञेषु श्राद्धे चैव तु सर्वदा॥ विप्रा
णामुपविष्टानां पादौ प्रक्षालयेज्जं द्विजः॥ अथ विवाहमासानाह॥ माघफाल्गुणवैशाखज्येष्ठमासाः शुभावहाः॥ वि
वाहो मार्गशीर्षे पि दैवल्लस्य गते नतु॥ पौषे पि मकरस्थेर्के पौत्रे मीनु गते रवौ॥ आषाढे मिथुनादित्ये कुर्यात्कर
पीडनं॥ मीनरासिस्थिते सूर्ये विंशातिर्वासरे यदि॥ विवाहः शुभदः प्रोक्तो न तु मेषे कदाचन॥ यदि रवि गतमीने विंशाति
र्वासरे वा न भवति खलु दोषश्चैत्रमासे विवाहः॥ यदि रविगतमेषे चैत्रमासे विवाहः सकल शुभद विवाहः सर्वदा वर्जनीयः॥
मार्गमासि तथा ज्येष्ठे विवाहं चोपनायनं॥ ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत्॥ न जन्ममासि न च जन्मधिष्ण्ये
न जन्मकाले यदि नो विदध्यात्॥ ज्येष्ठेन मासि प्रथमस्य सूनोस्तथा सुताया अपि मंगलानि॥ तथा च ज्योतिःसारे॥
जन्ममासि न च जन्मभे तथा॥ नैव जन्मदिवसे पि कारयेत्॥ आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि सिंनतु जातकर्म च॥
अथ ज्येष्ठात्रयं॥ ज्येष्ठे न ज्येष्ठयोः कार्यं नरनार्योः पाणिपीडनं॥ तयोरकत्तरे ज्येष्ठे ज्येष्ठमासे पि कारयेत्॥ ज्येष्ठापंच
कमाचार्यैस्त्यज्ये षष्ठा चतुष्टयं॥ ज्येष्ठात्रयं निषिद्धं स्यात्ज्येष्ठद्वयं तु मध्यमं॥ ज्योतिरर्णवे॥ कन्या वरो यदि स्यातामाद्य
गर्भसमुद्भवौ॥ तयोरेकन वै ज्येष्ठं द्वितीयं शुभदं भवेत्॥ अथ वरगुणमाह॥ ज्योतिःसारे॥ कुलं शुभं वपुर्विद्या च
यो वित्तं सनाथता॥ गुणाः सप्त वरे यस्मिन्न तस्मै कन्या प्रदीयते॥ अंधो मूकः क्रियाहीनो ह्यपस्मारी नपुंसकः॥ दूर

स्थः पतितः कुष्ठी दीर्घरोगी वरो न्यसेत्॥ मूर्खांधो बधिरस्तब्धः पंगुकुब्जो नपुंसकः॥ कुष्ठी रोगी ह्यपस्मारी दश दोषाः प्रकी
र्तिताः॥ अथ कन्यागुणानाह॥ रूपं शीलं कुलं कांतिर्विनयो वित्तसंनतथा॥ तस्याः सप्तगुणा वध्वाः श्रुणया तां च बुद्धिमा
न्॥ इति श्रीनारायणभट्टविरचितायां धर्मप्रवृत्तौ गर्भाधानादि पंचदशसंस्कारप्रकरणं॥ अथ गोत्रं॥ अथ सप्तपं
चमयोः सापिंड्यं वर्ण्यते॥ पिंडेन सह वर्तत इति सपिंडं॥ सपिंडस्य दंसा पिंड्यं॥ तद्द्विविधं॥ गोत्रे चान्यगोत्रे च॥ तत्र सगो
त्रविषये॥ मनुराह॥ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः॥ पिंडदः सप्तमस्तेषां सपिंड्यं साप्तपौरुषमिति॥ यन्मनु
नोक्तं तज्ज्ञातिविषय एव ज्ञेयं नान्यत्रेति॥ ज्ञातिव्यतिरिक्तेपि सापिंड्यमन्यथोक्तवान्॥ भाष्यकारः॥ संतानं विद्य
ते यस्मात्कन्यायाश्च स्कृतस्य च॥ तत्रैवा सप्तमाद्वा गन्यगोत्रात्कुत्र्यान्न्यायते॥ संततेः पुरुषस्यापि स्त्रिया या
श्चापि वायदि॥ सापिंड्यं तद्विजानीयादूरवधेः विवाहके॥ पितृतः सप्तमाद र्वाक् मातृतः पंचमादधः॥ सापिंडत्वानुभावेन
नोद्वहेत्तत्र कन्यकां॥ तथाचार्यः॥ संतानं भिद्यते यस्मात्पूर्वजादुभयत्र तु॥ तमादाय गणेद्धीमान्वरं या वञ्च कन्यकां॥ अ
सपिंडां च वरयेत् पितृतः सप्तमात्परं॥ मातृतः सप्तमादूर्ध्वं मसमानार्षगोत्रजां॥ याज्ञवल्क्यः॥ मूलगोत्रादन्यगोत्रा
मुद्वहेदष्टमोष्टमी॥ अन्यगोत्रादन्यगोत्रां सप्त षष्ठीं समुद्वहेत्॥ पंचमात्सप्तमं पूर्वं कन्यामुद्वहते यदि॥ स्वसारं मातरं स मा
पि द्विज स्याद्गुरुतल्पगः॥ आचार्यः॥ सापिंड्यं मुनिभिः प्रोक्तं मातृतः क्रमात्॥ तत्सापिंड्यं विजानीयान्नर्मदातीर
वासिनां॥ सापिंड्यं प्रकुराचार्यः संकोचापि सपिंडता॥ ज्ञातव्यं तद्धि धर्मज्ञैर्नर्मदायाश्च दक्षिणे॥ पंचमी पंचमी ४२

तिहि॥ निक्षिपेच्चतुरः कुंभान्नर्कस्य परितो वरः॥ धृषत्पिबेत्ति मंत्रेण चाग्नेयादिं च लक्ष्ये॥ सवस्त्रं प्रति कुंभं च त्रिसूत्रेणैव वेष्ट
येत्॥ हरिद्रागंधसंयुक्तं पूजये छीतलं जलं॥ प्रति कुंभे महाविष्णुं ततो देवीं तु पूजयेत्॥ अर्कं च पूजयेद्भक्त्या गायत्र्येण प्र
तीति च॥ अर्कस्योत्तरदिग्भागे स्थंडिलं कारयेद्बुधः॥ चरुस्तत्रैव चाज्येन जुहुयादाहुतीस्त्रय॥ षडाहुतीः स्रुस्रुवेणैव संसे
गोभिर्त्यैरित्यनेकया॥ यस्मै त्वं काम कामायेत्यनेकया ततः परं॥ व्याहृतिभिश्चैव जुहुयात्कुर्यात्स्विष्टकृतादिकं॥ आ
चार्याया थ गां दद्याद्दक्षिणां चैव शक्तितः॥ पुनरर्कं संपूज्य प्रार्थयेत्॥ आयुर्देहि यशो देहि प्रजां देहि पशूनपि॥ देहि मे
कं श्रियं पुष्टिं स्वच्छा ने तं स्थिरो भव॥ इत्यर्कविधिः॥ अथ पुण्याहवचनविधिः॥ द्वात्रिंशदंगुलं दीर्घं समंतात् चतुरस्र
कं॥ रेखोद्दे कोणतः कोणाति र्यक्कुर्वीत पार्श्वयोः॥ कोष्ठानि कारयेत्तत्र द्वात्रिंशत्संख्यकानि तु॥ पदवत्पार्श्वयोस्तत्र पुर
तो गजशुंडवत्॥ पश्चिमे कलशोकारं निर्मितं ब्रह्मपादुरा॥ तदेव स्वस्तिकं चेति प्रवदंति महर्षयः॥ तंडुलैः सलिखे
द्भूमाचारोनुष्टुभकर्मणा॥ तन्मध्ये स्थापयेद्द्वाभ्यां सजलं कलशद्वयं॥ सौवर्णे रजतं वापि मात्स्यं वा रत्नपूरितं॥
पात्रे द्वे तिन्यसेत्तत्र सौवर्णे रजते पि वा॥ सफले कांस्यपात्रे चान्यसेत्तंडुलपूरिते॥ सुवर्णपुष्पपात्रेश्च पंचरत्नैः सम
न्विते॥ पत्नीपुत्रसमायुक्तः शुभार्थे ब्राह्मणैः सह॥ पुण्याहवाचनं कुर्यात्सर्वेष्वपि च कर्मसु॥ विवाहांतेषु सर्वेषु गर्भाधा
नादिकर्मसु॥ नांदीश्राद्धं समुद्दिश्य स्वस्तिवाचनमाचरेत्॥ स्वस्तिवाचनमंत्रेष्ठं सर्वेषामृधि कर्मणां॥ आदावंते प्रक

विद्देशे संकोच्यापि सपिंडतां॥ असपिंडेपि केचिद्विशेषमाहुः॥ पितृव्यभार्याभगिनीं बुध्दिमांस्तां परित्यजेत्॥ सापत्न्यभा
र्याभगिनीं तत्पुत्रीं च परित्यजेत्॥ तथा च॥ पितृव्यभार्याभगिनीं तत्सुतां सापत्नमातृभगिनीं च तत्सुतां॥ नैवोद्वहेत्तां यदि चेत्स
मादाच्चांडालतां सो न निष्कारणं भवेत्॥ सावित्रीं यस्य यो दद्यात्तत्कन्यां न विवाहयेत्॥ तद्गोत्रे तत्कुले चापि विवाहो नैव दोषकृ
त्॥ शाखांतरविषयमाहुः॥ वाजसनेयी॥ समानप्रवरा भिन्ना मातृगोत्रवरस्य च॥ विवाहो नैव कर्तव्यो सा कन्या भगिनी
भवेत्॥ पैत्रे प्रवरभिन्नत्वं चिंतनीयं न मातृके॥ केवलं मातृकं गोत्रं वर्ज्यं कात्यायनोऽब्रवीत्॥ गोत्रं मातुलपुत्राय वर्जयेत्प्रवरान्न
तु॥ स्वपुत्रायास्तु गोत्रं च प्रवरांश्च न चिंतयेत्॥ अत्र गोत्रनिर्णयः॥ भृग्वंगिरःकश्यपात्रिवसिष्ठागस्त्यगाधिजाः॥ सप्त
ब्रह्मर्षयस्तेभ्यो गणा अष्टादशाभवन्॥ भृगोः पंच गणाः पूर्वमष्टावंगिरसो गणाः॥ अन्ये त्वेकैकगणिनः इत्यष्टा
दश तद्गणाः॥ जामदग्न्या वीतहव्यास्तथा गृत्समदा विदाः॥ व्याघ्रश्च वैन्य इत्येते भृगोः पंच गणाः स्मृताः॥ प्राग्ज्यामद
ग्न्यवत्सश्च श्रीवत्सो वत्स इत्यपि॥ ततो मांडव्य मंडूक मांडूकेय ततशायिनः॥ वैरोहित्यश्च वाल्मीकः पापि निर्जमदग्निकः॥
त्वष्टिषेणार्ष्टिषेणौ च नैर्ऋणेर्विदवत्स्यपि॥ प्राचीनयोग्यवेदाद्या जामदग्न्यगणार्षयः॥ अत्रादितो दशानां त्रिःपंचत्रि
प्रवरा अपि॥ भार्गवच्यवनाप्नवानौर्वजमदग्न्य इति॥ पंचप्रवराः शुद्धजामदग्न्यस्य त्रिःप्रवराः भार्गवच्यवनाप्नव इति॥
ऋष्टिषेणार्ष्टिषेणयोः पंच प्रवराः॥ भार्गवच्यवनाप्नवानार्ष्टिषेणानूपा इति॥ बीदादीनां पंचप्रवराः॥ भार्गवच्यवना
प्नवानौर्वबैदा इति॥ एवं चतुर्धा प्रवरो भिन्नोप्येको गणोऽस्त्ययं॥ प्रवरा॥ ऋषिसाम्ये न मिथ्योऽमी न विवाहिनः॥ इति ४२

जमदग्निगणाः॥ वीतहव्यश्च यस्कश्च वाधूलो मौनमौकसौ॥ शार्कराक्षिश्च सार्ष्टिश्च शालंकायनजैमिनी॥ जीवंत्या
यन जाबालिः सावर्णिश्च गणश्रेयः॥ विहृतव्यादयः सर्वेस्तु त्रिप्रवरका अपि॥ भार्गववैतहव्यसावेदसा इति॥ एतदेवं
प्रवरका मिथोऽमी न विवाहिनः॥ उभौ गार्त्समदस्यैतौ तृतीयगण इष्यते॥ अन्ययोः प्रवराः॥ भार्गव गार्त्समदद्गौन
का इति॥ एवं प्रवरसाम्ये न मिथोऽमी न विवाहिनः॥ राध्यश्चो मित्रयुचो भौ चतुर्थो गण इष्यते॥ अनयोः प्रवराः॥ भार्ग
व दैवोदास बाध्यश्व इति एतत्प्रवरसाम्ये न मिथ्योऽमी न विवाहिनः॥ अथ वैन्यश्च पार्थश्चापं चमो गण इष्यते॥ प्रवराः॥ भार्ग
व वैन्य पार्थ इत्येवं त्रयः॥ एतत्पंकप्रवरका मिथोऽमी न विवाहिनः॥ मिथो विवाह्याः पंचैते नत्यक्ता भार्गवमादिमं॥ जा
मदग्न्यादयः पंच मिथो ग्राह्या विनादिमं॥ अथांगिरसगणाः॥ गोतमाथ भरद्वाजः कपि कण्वोथ मुद्गलः॥ विरूपो
हरितो विष्णुवृद्धश्चैवाष्टमो मतः॥ यत्रायास्यो विष्योशिरजकक्षीवद्दीर्घतमास्त्याः॥ वामदेवा बार्हदुक्थ्यरोगौतमस्य
गणर्षयः॥ आद्यषट्त्रिप्रकरकाः पंचप्रवरकोयमः॥ तथा हि आंगिरसायास्य गोतम इति॥ आंगिरस गोतमो चथ्या इति॥
आंगिरसगोतमौशिजा इति॥ आंगिरसगोतमकाक्षीवता इति॥ आंगिरसगोतमदैर्घ्यतमसा इति॥ आंगिरसगोतमवा
मदेव्या इति॥ आंगिरसगोतमौचथ्यौशिजबार्हदुक्थ्या इति॥ प्रवरद्वयार्षिसाम्येन मिथोऽमी न विवाहिनः॥ अथ भर
द्वाजगणाः॥ भरद्वाजोथ कुक्षग्निवेश्य उर्जायनस्तथा॥ सर्वस्तंबस्तंबशाङ्गः स्तुगस्थिः पिकजस्तथा॥ शौंगशैशिर
रक्षील नक्षो नादनेऽत्यपि॥ तथा मातवचा गार्ग्यः कपि कपिल इत्यपि॥ एते सप्तदशाख्याता भरद्वाजगणर्षयः॥

अत्रेदितःकतांतानांत्रप्रवरास्त्रिःप्रकीर्त्तिताः॥आंगिरसबार्हस्पत्यभरद्वाजइति॥शैशिरशैशिरपंचप्रवराः॥आंगिरसबार्ह
स्पत्यभरद्वाजकात्याकिलइति॥ऋक्षीदीनांपंचप्रवराः॥आंगिरसबार्हस्पत्यभरद्वाजसैंगगार्ग्योइति॥प्रवद्धार्षिसा
म्येनमिथोऽमीनविवाहिनः॥ अथकपिलगणः॥गौतमादिवदेवायंगणउत्राष्टकान्विताः॥अतोगार्ग्यकपेभर्तुःस्वांत
त्रेणविशेषतः॥भरद्वाजेसहातोस्यविवाहोगिरूतोरिवेलेः॥गणंस्वस्यविवाहायार्थोविवाहश्रुभेदोभवेत्तथाचो
क्तंस्मृत्यर्थसारे॥कपिलश्रसिद्धाउदिताविवहद्वोस्वतंत्रएकोरस्त्यपरोस्वतंत्रः॥तत्रस्वतंत्रस्यकपेर्विवाहमिथोभर
द्वाजकुलेनचाङ्गिरितियेयांतेरयमथः॥प्रकांतरेपादर्शितः॥तत्रकतिविद्भरद्वाजानभिधानोक्तं॥नातःपरेवांह
रितादधस्तान्मिथोविवाहस्त्कपिर्नयास्यति॥अविवाहेभ्यःपर्छ्दस्छानानांकपिनांविवाहास्तीत्युक्तंभवति॥
आश्वलायनपरिशिष्टेआश्वलायनेस्पृष्टतोष्टकाभरद्वाजेषुकपिनांविवाहसंज्ञावत्यज्ञायेभरद्वाजकुलेयं
षांचिद्विवाहमभिधायोक्तं॥एतेषांतुविशेषोयमहार्याभिधानत्तैरुक्षयैश्चकपिभिर्विहस्त्रिभिरिष्यते॥ अथक
पिस्त्रिप्रवराः॥आंगिरसामहीयवोरुक्षाइति॥अत्रकपिभिरितिबहुवचनं॥नतुत्राभिप्रायेणतेचाप्युक्ताः॥तरस्छिति
तरश्चापिपुत्रविंशउद्रात्कः॥पतंजलिः॥भूयासिधाणिकिश्चैवजलंथरतिचाथा॥कपिपुत्राःसमाख्यातास्तेषांक
पिविदिष्यते॥कपिवदियेनएतेषांभरद्वाजकुलेविवाहसिद्धिरित्युक्तं॥कपिपुत्रलोकामिथोमीनविवाहिनइत्युक्तं॥ ४२

नैवमातृतःपितृतस्तथा॥त्रीणिचातीत्यमातृतःपंचमतीत्यवैपितुः॥संग्रहः॥चतुर्थीमुद्वहेत्कन्यांचतुर्थःपंचमीमपि॥परा
शर्यमतात्षष्ठीपंमोनतुपंचमी॥शंकरः॥गण्यानामार्षजोपक्षीपंचमःपंचमीयदि॥विवाहोनैवकर्तव्योन्यत्रनलोकःश्रु
भावहः॥तृतीयांवाचतुर्थींवापक्षयोरुभयोरपि॥विवाहेतांमनुःप्राह्ःपराशर्योयमांगिराः॥शाकलः॥भवेतांपूर्वजातस्तु
त्रोत्तयोरपिचसंनतिः॥पंचमःपंचमींकन्यांनतत्रावरयोद्द्विजः॥कन्यैद्वेपूर्वजात्स्यातांसंततिःस्यात्तयोरपि॥पंचमंपंच
मीतत्रवरःकन्यांसमुद्वहेत्॥कन्यापुत्रौवसंस्तौपूर्वजाःसंततिस्तयोः॥यदिस्याद्दृश्यतेतत्रपंचमःपंचमीं हि॥आचार्यः
कन्यावरस्यसापिंड्येमातृसंज्ञाभवेद्यदि॥स्वसृसंज्ञाथवापुत्रीनैवतांवरयेद्बुधः॥हेमाद्रौ॥चतुर्थींपंचमीवापिषष्ठी
वामातृसंज्ञका॥स्वसृसंज्ञांचवैपुत्रीसंज्ञांतांपरिवर्जयेत्॥तथाचहेमाद्रौ॥यत्रोक्तसापिंड्यनिवृत्तिपूर्वंतत्रैवकन्या
यदिमातृसंज्ञा॥पुत्रीयदिस्याद्भगिनीयदिस्यात्तदाविवाहोनकदाचिदेव॥पुत्रीविषयेकेचिदाहुः॥पुत्रिकामुद्वहद्विप्रः
केचिदेवंवदंतिहि॥भगिनीमातरंचैवयदिचेत्यतितोभवेत्॥आचार्यः॥धात्रीपुत्रीस्वसारंचनैवतांवरयेद्द्विजः॥के
चिदाहुःकचिद्दृष्टपुत्रिकामुद्वहेदिति॥तृतीयांवाचतुर्थींवापंचमींपितृमातृतः॥दक्षिणेत्तूद्वहेत्कन्यांस्वसारंमातरं
विना॥जननींभगिनींचैवपुत्रीसंज्ञांचकन्यकां॥नैवतांवरयेद्विप्रोगालवोमुनिरब्रवीत्॥तथाचव्याघ्रपादः॥उद्वहेद्दक्षि
णेविद्वान्मातुलस्यचैवसुतां॥उत्तरेनोद्वहेद्विप्रोह्येषधर्मसनातनः॥आचार्यः॥मातुलस्यसुतांविप्रोदक्षिणेतांस
मुद्वहेत्॥वर्जनीयाप्रयत्नेनसैववाजसनेयिभिः॥तथाचस्मृतिः॥मातुलस्यसुतांकेचित्केचित्पितृष्वसुःसुतां॥विवाहेनांब

अत्रप्रयोगपारिजाते॥भरद्वाजगणस्यापि तथा कपिगणस्य च। विवाहो न विधेयस्यादन्योन्यो न कदाचनेति॥ अथकण्व
गणाः॥आंगिरसा अजामीढाः कण्वाश्चापि त्रयो ऽमी॥मिथो विवाहं नार्हन्ति समानप्रवरायतः॥केचित्त्प्रवरानन्यानेवाहुः॥
आंगिरसाघोराकण्वा इति॥ अथ मुद्गल गणाः॥मुद्गलश्चात्रिवेदश्च तार्क्ष्यो भार्म्यश्च एव च॥ मौद्गल्यश्चेति पंचैते मुद्ग
लस्य गणर्षयः॥एतेषां त्रिप्रवराः॥आंगिरसभार्म्यश्चमौद्गल्य इति॥ प्रवरैक्यनपंचापि मिथोऽमी विवाहिनः॥ अथ
विरूपगणाः॥ विरूपः पृषदश्वश्च पार्षदश्चारथीतराः॥ अंगुष्टश्चादंष्ट्रश्च विरूपश्च गणर्षयः॥ एतेषां त्रिप्रवराः॥
आंगिरश्च पार्षदश्च विरूपा इति॥एतदेव प्रवरका मिथोऽमी न विवाहिनः॥ अथ हारीतगणाः॥हारितश्चांबरीषश्च मांधाता यौ
वनाश्वकः॥कौत्सः पैंग्यः शंखदर्भौ तत्तोहै भगवादितः॥कौमारीश्च दशाह्येते हारितश्च गणर्षयः॥एतेषां त्रिप्रवराः॥आं
गिरसांबरीषहारीता इति॥आंगिरसांबरीषश्च यौवनाश्वा इति द्विधा॥तुल्यैकप्रवरत्वे न मिथो मीन विवाहिनः॥ ॥अ
थ विष्णुवृद्धगणाः॥ विष्णुवृद्धः षठमठ मद्रा एणश्चाथ्यद्भ्रणाः॥नितुदर्मैद्रणः कात्म्यारुणिसात्याकिरित्यपि॥चतुर्दशौते
विख्याता विष्णुवृद्धगणर्षयः॥ एतेषां त्रिप्रवराः॥ आंगिरस विष्णुवृद्ध बादरायण इति॥आंगिरसपौरुकुत्सत्रासदश्चा
इति॥तुल्यैकप्रवरत्वे न मिथो मीन विवाहिनः॥ इत्यंगिरसप्रकरणं॥ अत्र निषिद्धमाह। पंचानां त्रिषु सामान्यादवि

वाहस्त्रिषुद्वयोः॥भृग्वंगिरोगणेष्वेवं शेषेष्वेकं कापि वारयेत्॥शेषेष्विति कश्यपादिष्वित्यर्थः॥ अथ कश्यपगणः॥ कश्यपः
कश्यपावत्सारासितौ निध्रुवस्तथा॥वैशंपायन भूतांशुसुमेधो नैधवा अपि॥रैभोरभः शांडिलश्च सोऽजामिर्नगुरिस्तथा॥
धन्वंतरः शांडिलश्च देवलः कश्यपा अपि॥कश्यपादीनां त्रिःप्रवराः॥कश्यपावत्सरासिताइति॥निध्रुवादीनां त्रिःप्रवराः॥कश्यपा
वत्सरनैध्रुवाइति॥रैभादीनां त्रिःप्रवराः॥काश्यपावत्सररैभ्यइति॥प्रवरद्व्यार्षिसाम्येन मिथो मीन विवाहिनः॥ अत्रिगणः॥
आद्यो त्रिः प्रथमस्तत्रिरूप्यानंद्रपदादिमाः॥आत्रेयावाभरथ्याश्च गविष्ठिरसमाधयः॥पौर्वातिथ्यो तिथिश्चापि॥बद्धूतक
धनंजयौ॥सुमंगलो बीजवापि सो मंगल्योत्रि वंशजाः॥ अत्र्यादिवाभरथ्यो तानां त्रिःप्रवराः॥ अत्रे यार्चनानसश्चेति॥अ
त्र्येत्र बंधतक गणयोः प्रवरैक्योपि भिन्नशाखाध्येयनाद्भेदइत्युक्तं॥सुमंगला नां त्रिःप्रवराः॥आत्रेयसुमंगल्यशावाश्चा
इति॥आद्यर्षेरत्तिभेदेन मिथो मीन विवाहिनः॥ अथ वसिष्टगणः॥आद्यो वसिष्ठवासिष्ठउपमन्युरतःपरं॥ अभरद्वसु
रैयेइभ्रमदश्चपराशरः॥पाराशर्यो व्यासशक्ति कुंडिनो गणइत्यपि॥सांख्यायनाजातुकर्ण्यः कौंडिन्यश्च ततःपरं॥मैत्रावा
रुणाइत्येते वसिष्ठस्य गणर्षयः॥ आद्यस्य प्रवरैक्यः स्यात्तत्रस्युः प्रवरास्त्रयः॥ तत्र वसिष्ठस्त्वेनमेकप्रवरः॥ वसिष्ठादीनां त्रिःप्र
वराः॥वासिष्ठशक्तिपराशर्याइति॥कुंडिनादीनां त्रिःप्रवराः॥वासिष्ठमैत्रावरुणकौंडिन्यइति॥प्रवरद्व्यार्षिसाम्येन मिथो
मीन विवाहिनः॥ अथागस्त्यगणः॥ अगस्तिश्च तथागस्त्यो दार्ढच्युतइति त्रयः॥इध्मवाहः सांख्याश्चैव त्रयोप्यमी॥प्रव

रातांविकल्पे नमिथोमी न विवाहिनः॥ अत्र केदाक्षिपंति॥ एकगर्भसमुत्पन्न एकनामत्वसंभवेत्॥ मैत्रावरुणयोरनयोर्गणभेदः कथं
भवेत्॥ अत्रोच्यते॥ द्वयोरेवघटोत्पत्तिर्नैकजा तस्यसाधन॥ समानसमयोत्पत्तेर्नामैक्यमितिइरीत॥ मित्रावरुणयोस्त्वेकुभे
दादैक्यं कथं भवेत्॥ प्रसूतिगृहवत्कुंभप्राणभून्योनकारणं॥ पतित्वाभागभेदेन नतयोरनस्त्वद्वयोः॥ पृथगेवसमुत्पत्तेर्नि
नावितिसमंजसं॥ अथ विश्वामित्रगणः॥ विश्वामित्रोदेवरातश्चिकेतो गालवोमनुः॥ वत्तोलकिवालखिल्यो याज्ञवल्क्य
श्वकौसिकः॥ उलूकोबृहदग्निश्चधस्त्रः शालावतस्तथा॥ शालकायन शालाग्निस्तथा शालावतोदरो॥ श्रीमतोदेवत्त
रसः कामकायनसंज्ञकः॥ देवश्रवाश्वाथधनंजयधानंजयाउभौ॥ मधुछंदाश्चजश्वालोरोहिणोरोहिणष्टकः॥ लोहित
प्ररणः पारिधायश्चयतथोरणौ॥ करीतोरोक्षककात्यो चघस्री लश्चाप्यमर्षणः॥ सूनुःपनसघ्नो चवावर्ग्योजादरस्तथा॥ र
कहव्याग्नि वैश्यश्चशालंकायनसंज्ञकः॥ शालाक्षोलिहिताक्षश्चजकुश्चापिंदकौसिकः॥ धनकौशिकइत्येतेविश्वामित्र
गणर्षयः॥ प्रवरास्त्रयएकोक्ताविश्वामित्रगणस्यतु॥ विश्वामित्रदेवरातानांत्रिःप्रवराः॥ विश्वामित्रोदेवरातोदलइति॥ श्री
मतादिचतुर्णां त्रिःप्रवराः॥ विश्वामित्राष्टकपूरणाइति॥ कत्तादिचतुर्णांत्रिःप्रवराः॥ विश्वामित्रेकात्याकिलाइति॥ अघमर्ष
णाद्यष्टानांत्रिःप्रवराः॥ विश्वामित्रशालंकायनकौशिकाइति॥ इतिविश्वामित्रप्रकरणं॥ एकएवऋषिर्यावत्प्रवरेष्वनु
वर्त्तते॥ तावत्समानगोत्रत्वमृतेभृग्वंगिरोगणात्॥ एवमुक्तेषु भेदेन गणेष्वष्टादशस्वपि॥ सामान्येनोद्वहेत्सापिविशेषा

त्रनिगद्यते॥ अन्येस्वंस्वं गणं हित्वा विवाहं युर्गणांतरे॥ गणांतरे पितुल्याख्या नोद्वहेयुः परस्परं॥ प्रदेशयामतुल्याख्या
न्नगणभेदेष्ववस्थितान्॥ स्वतंत्रश्चास्वतंत्रश्च द्वौ कोपि गणभेदतः॥ कतास्त्रीलो भरद्वाजविश्वामित्रगणांतरे॥ विश्व
मित्रोवैतहव्याशालंकायन इष्यते॥ विश्वामित्रात्रिगणयोर्विद्यते च धनंजयः॥ विश्वामित्रेण शृंगे पाभरद्वाजस्य
त्रेशिरः॥ अतोयं हि प्रवचनोद्वहे तद्गणद्वयं॥ संकृतिः पूतिमाषश्च शंबुचैवंगवस्तथा॥ शांडिल्यो व्याघ्रपादश्च भ
रद्वाजकुलोद्भवः॥ कयक्रीहावसिष्टेननोद्वाह्यास्तद्गणद्वयो॥ जामदग्न्योदिवारातो विश्वामित्रं कुलेर्पितः॥ दत्तपुत्र
तयानेषविवाह्यस्तद्गणद्वयो॥ काश्यपेन वसिष्ठेन क्रौंचा गौतमवंसिजाः॥ अनाष्टिराकुत्सारातिराजा रातिस्तथै
वच॥ सेरजः क्षीरजोबकुसेरंध्रीराजसेबकः॥ स्वष्टुविः स्वापुलिंगश्च लौगाक्षी शरदंबकः॥ त्रयोदशैते ऋषयः॥
स्वस्वसाम्यान्मुनिकृताः॥ रात्रामम्तत्वान्ही तितथैते व्यवस्थिताः॥ अतोगणत्रयोप्येते नविवाह्या कथंचन॥ एवमि
ऐनिमुद्वाहं परित्यज्य प्रमाद्यदि॥ तथाचस्मृतिसारे॥ जमदग्निगणस्यापि विश्वामित्रगणस्यच॥ कतकेशिरःशृंगे
श्च नान्येषां पाणिपीडनं॥ कश्यपस्य गणस्यापि वसिष्ठस्यगणस्यच॥ संकृतिपूतिमाषाभ्यां विवाहो न परस्परं॥
आत्रेयस्यगणस्यापि विश्वामित्रगणस्यच॥ धनंजयाख्यगोत्रेण नान्येन्यं पाणिपीडनं॥ भरद्वाजगणस्यापि
तथा कपिगणस्यच॥ विवाहो न विधेयः स्यादित्येवं मुनयोब्रुवन्॥ मौद्गलस्यगणस्यापि विरूपस्यगणस्यच॥ यरस्य

धमिमित्यर्थः॥ नजीवत्पितृकः कुर्याछ्राधं मातुःक्षयाहते॥ कृत्तेतु नवमीश्राधमन्तेतत्तु हि लुप्यति॥ तथाचगो
भिलः॥ जीवमानपितायस्य माता चेन्म्रियते यदि॥ प्रेतपक्षे नवम्यांतु मातुःश्राधंविधीयते॥ महालये नवम्यां
चश्राधं मातुर्मृतेहनि॥ कुर्यात्पिंडविधानेन पितर्यपिचजीवति॥ तावत्स्यान्नवमीश्राधं यावद्दै वर्त्तते पिता॥
तदलुप्यते श्राधं मृतश्चेद्यदि वै पिता॥ सुवासिन्यां मृतायांतु यछ्राधं प्रतिवत्सरं॥ सुवासिन्ये प्रदातव्यं ब्रा
ह्मणैः सहभोजनं॥ अथ सापत्नमातृविषयं॥ सारावल्यां॥ एकभर्तृकपत्नीनामपुत्राणिधनंगता॥ तस्याक्रि
यादिकं तेनकर्त्तव्यं पैतृमेधिकं॥ एकेनैवतु कर्त्तव्यं ज्येष्टपत्नीसुतेन च॥ जन्मज्येष्ठेन वा मातुः सपत्न्या अ
पि कर्मयत्न॥ कृतासौ वपुनं पुत्रः पुत्रोस्तुजीवतोरपि॥ सापत्न्यमातुः कुर्वीत पैतृमेधिककर्म च॥ चकारात्प्रति
सांवत्सरादिकमित्यर्थः॥ मृतामातरिजीवल्यां सपत्नजननी यदि॥ पितामह्यादिभिः कुर्यात्प्रत्यब्दं न तु तर्प
णं॥ ॥अथ बहुपत्नीपुत्राणां पितृविषयं॥ एकभर्तृकपत्नीनां सर्वासांसंतिवै सुताः॥ पितुर्मरणकाले तु ज्ये
ष्टपत्नीसुतोग्रजः॥ ॥अथ कर्माधिकारिणः पुत्रानाह॥ याज्ञवल्क्यः॥ औरसो धर्मपत्नीजस्तत्समः पुत्रि
कासुतः॥ क्षेत्रजातस्तु सगोत्रेण तरेण च॥ गृहप्रछन्नउत्पन्नो गूढजस्तु सुतः स्मृतः॥ अक्षतायांसुताजीवजा ४६

तः पौनर्भवः सुतः॥ दद्यान्माता पिता वायं स पुत्रो दत्तको भवेत्॥ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः॥
दत्तात्मतु स्वयं दत्तो गर्भे विन्नः सहोढजः॥ उत्सृष्टो गृह्यते यस्तु सोपविधाभवेत्सुतः॥ पिंडदोंशहरश्चैषां पूर्वा
भावपरस्परः॥ मनुः॥ तएते भिहिताः पुत्राः प्रसंगादन्यबीजजाः॥ यस्य ते बीजतोजातास्तस्य तेनेतरेणतु॥ प्रयोग
पारिजाते॥ ज्येष्ठ एव सुतः कुर्यादविभक्तैः सहानुजैः॥ पित्रोरेवाब्दिकं श्राद्धं मन्ये षां नवकैः सह॥ प्रत्यब्दं पार्वणेने
वविधिना क्षेत्रजौरसौ॥ कुर्यात्तामितरे कुर्युरेकोद्दिष्टं सुतादयः॥ औरसः पार्वणेनैव पित्रोरेव विधीयते॥ दत्तपु
त्रादयः सर्वेप्येकोद्दिष्टविधानतः॥ द्व्यामुष्यायणकोदद्याद्वाभ्यां पिंडोदके पृथक्॥ श्राधं कुर्युक्तयोश्चैव
पित्रोर्दत्तगृहीतयोः॥ यस्य योबीजतोजातस्तस्यैव पार्वणं स्मृतं॥ एकोद्दिष्टमयान्यस्य विधिरेषउदाहृतः॥ पि
तुश्चैव गृहीतुश्च श्रैवतथैवतु॥ दत्तः कुर्यात्तथा चैव नान्येषांतु कदाचन॥ अथान्याधिकारः॥ पुत्रः पौत्र
श्च तज्जश्च पुत्रिकापुत्रएव च॥ पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा॥ भगिनी भगिनीयश्च सपि
ण्डः धनहार्यपि॥ एतेष्वभिहिताः केचित्तत्पूर्वाभावे परस्परः॥ अन्य पत्नीताधिकारः॥ विश्वरूपे॥ असं
स्कृतेनपुत्रे पापत्न्या वापि समंत्रकं॥ अग्निदाहं प्रकर्त्तव्यं अन्यत्सर्वतु कारयेत्॥ कुर्यादिन्न नपत्नी नोपिमं

त्रवत्यैत्र मेधिकं॥ पक्षसौकृतचूडस्याद्यद्वितीयाच्चत्रिवत्सरः॥ कृतचूडस्तु कुर्वीत लघ्वादेकपिंडमेव च॥ स्वधाकारं
प्रयुंजीत वेदोच्चारं न कारयेत्॥ कृतचूडोनुपनीतः पित्रोः श्राद्धं समाचरेत्॥ उदाहरेत्स्वधाकारं न तु वेदाक्षरा
ण्यसौ॥ मनुः॥ न ह्यस्मिन्युज्यते कर्म किंचिदा मौंजिबंधनात्॥ नाभिव्याहरयेद्ब्रह्म स्वधानिनयनादृते॥
स्वधानिनयं प्रेतकार्यमित्यर्थः॥ पुत्रे सति निषेधः॥ पुत्रेषु विद्यमानेषु नान्यो वै कारयेत्स्वधां॥ अनुक
ल्पस्य पुत्रस्य श्राद्धं कुर्यात्स नायकः॥ प्राणत्यागो भवेद्यत्र तीर्थे वा स्वगृहेपि वा॥ प्रेतकार्याणि तत्रैव क
र्यादन्यत्र नैव तु॥ अपुत्रविषयं॥ पत्नी कुर्यादपुत्रस्य पुत्रीकापुत्र एव वा॥ कनीयान्भ्रातृजो वापि
पूर्वाभावे परस्परः॥ अथ वपनविधिः॥ आचार्यः॥ निषिद्धेपि सति क्षौरे पित्रोरेव मृतेहनि॥ वापये
युः सुताः पित्रोर्मरणे श्रवणेपि च॥ गंगायां भास्करक्षेत्रे मातापित्रोर्मृतेहनि॥ आधाने यज्ञकाले धुष
ङ्गस्य वै वपनं स्मृतं॥ मातामहि पितृव्यापामातुलाग्रजयोर्गुरोः॥ श्वसुराचार्ययोस्त्वापि पत्न्यो वापि
पितृष्वसुः॥ मातृष्वसृभगिन्योश्च तथोपाध्यायस्य चैव हि॥ एषां केचिद्बुधाः प्राहुः गर्भिण्यानपि वाप्यय ४७
द्धितिकर्मकर्तृविषयं॥ तथा च व्याघ्रपादः॥ विभक्ता वाविभक्ता वा पित्रोस्तु मरणे सुताः॥ वपनं

रेन कुर्वीत पाणिपीडनसत्क्रियां॥ उद्वाहो गोत्रयोर्द्वयोः॥ तदपत्यस्य जन्मगोत्रं त्याज्यमेवं विदुर्बुधाः॥ गुरोः सगोत्रप्र
वराः नोद्वाह्याः क्षत्रवैश्ययोः॥ सगोत्रत्वनभिज्ञैश्च विप्रैराचार्यगोत्रजं॥ असंप्रज्ञातबंधूनां आचार्यप्रवराः स्मृताः॥ प
क्षे चास्मिन्नु विवाहोपि सगोत्रैः सह नेष्यते॥ अज्ञानादथवा ज्ञानाद्यस्तु वै यदि चोद्वहेत्॥ समानप्रवरां कन्यां मातृ
वत्परिपालयेत्॥ तथा च॥ समानप्रवरां कन्यां सपिंडां चैव गोत्रजां॥ नैव तां वरयेत्प्राज्ञो मातृवत्परिपालयेत्॥
इति श्रीनारायणभट्टविरचितायां धर्मप्रवृत्तौ गोत्रनिर्णयः॥ ॥अथ जीवत्पितृकश्राद्धविधिः॥ ॥अमा
श्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकं॥ न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं॥ न जीवत्पितृकः कुर्यान्मुंडनं
तीर्थकं चयेत्॥ महालयं गयाश्राद्धं श्राद्धं च पितृतर्पणं॥ श्राद्धादि कं यदा कर्तुं देशकस्थो पितायदि॥ तदपुत्रेण
कर्तव्यमवश्यं पितुराज्ञया॥ पाराशरः॥ विद्यमाने पितरि श्राद्धं कर्तुमुपस्थितः॥ पितृकृत्यं तत्पुत्रादेः कुर्याच्छ्रा
द्धं महालये शयः॥ तथा च वृद्धधौ॥ वृद्धौ च तीर्थे संन्यस्ते ताते च पतिते यदि॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वतस्व
यं॥ उद्वाहे पुत्रजनने पुत्रेष्ट्यां सोमके मखे॥ तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः॥ गृह्यपरिशिष्टे॥ अन्व
ष्टके गयायां प्रोप्रोसत्यां यत्र मृतेहनि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति॥ अन्वष्टके प्रेतपक्षे तिन वमीश्रा

ग्निसंयोगेजातेज्येष्ठकनिष्ठयोः॥ यदिकाचिन्मृताभार्यादाहस्तस्याःकथंभवेत्॥ संसृष्टाग्निंविभज्याथदक्षिणोत्तर
योरपि॥ ज्येष्ठयादक्षिणेभागःकनिष्ठायातथोत्तरः॥ बहवोयदिभार्याश्चेद्भागाश्चैतादृशाअपि॥ यस्याएवयंथा
भागस्तंतंभागंनियोजयेत्॥ दहादिकर्मकुर्वीततमंत्रवत्येनृमेधिकं॥ प्रथमेहनियःपुत्रःसदशाहंसमापयेत्॥ अ
थनवश्राद्धानि॥ प्रथमेह्नितृतीयेह्निपंचमेसप्तयेपिवा॥ नवमेकादशेचैवनवश्राद्धंप्रकीर्त्तितं॥ यदिरात्रौ
पि भवेत्तस्यसमोदाहनस्यैवत्॥ परेहन्युदितेसूर्येकार्यस्तयोस्याद्दकक्रिया॥ तिलोदकास्तथापिंडान्नवश्राद्धा
नियातिा च॥ नकुर्याद्रात्रौसंध्यायांयदिस्यान्निष्फलंभवेत्॥ उत्तरीयशिलापात्रकर्त्तृसव्यविपर्ययोः॥
स पूर्वदत्तांजलीदद्यापिंडांश्चापितथैवच॥ मध्येदाशौति॥ पित्रोराशौचमध्येतियदिदर्शसमागताः॥ तावदेवो
त्तरंतंत्रपर्यवस्येत्र्यहात्परं॥ अंतर्दशाघदर्शश्चेत्तत्रसर्वंसमापयेत्॥ पित्रोस्तुयावदाशौचंदद्यात्पिंडांतिलां
जलीन्॥ दशाहमध्येदर्शश्चेत्पिंडदानंतिलोदकं॥ औरसंप्रत्यहंदद्यान्नचदर्शेसमापयेत्॥ प्रागूर्ध्वंत्र्य
हाद्दर्शोदशाहमध्येऔरसः॥ पितरोतुविनान्येषांदर्शेचैवसमापयेत्॥ दशाहमध्येयदिदर्शआगतेद
द्याद्दशाहतिलवारिपिंडान्॥ पुत्रीस्तुतोदत्तकऔरसोवाशेषाःसुतास्तत्रसमापयेत्॥ देशांतरस्थितैःपु
त्रैःक्रियाःकार्यायथाविधि॥ विभक्तेवापिभक्तेवासंहतेदेहनंविना॥ दशाहाभ्यंतरेपित्रोर्मरणंश्रूयतेयदि॥

पुत्रेणैवाथवान्येनमंत्राग्निनैवदग्धयोः॥ प्रेतशब्देनशिष्टास्युःकर्त्तव्यंषोडशादिकं॥ सपिंडीकरणंचैवयथाका
लसमुद्भवं॥ मंत्राग्निनैवदग्धस्यपिंडदानोदकक्रियाः॥ नकृतास्युःप्रमादाद्वादशाहाभ्यंतरेयदि॥ अथैक
स्मिन्दिनेकर्मयदिकर्त्तुमुपक्रमेत्॥ पिंडोदकक्रियाःकार्याःचाशौचंदहनंविना॥ अस्थिसंचयनं॥ कुज
मंदार्कशुक्रेषुगुरौनंदात्रिपादभे॥ पूर्वोत्तरापुष्यहस्तेनास्तिसंचयनंचरेत्॥ त्रिपुष्करं॥ त्रिपादभेतिथिर्भ
द्राजायतेवासरेगुरौ॥ रवौभौमेचमुनिभिःप्रोक्तंतद्धित्रिपुष्करं॥ नंदाभद्राकामभूतभौमार्करविजेगुरौ॥
शुक्रेमघायांरोहिण्यांपंचकेद्वित्रिपादभे॥ ऋनत्रयंप्रेतदाहमस्थिसंचयनंतथा॥ नकुर्याद्यदिचेद्दाहंकृतंदा
नंप्रदापयेत्॥ भद्रेतुभूमिदानंस्यात्॥ हेमदानंत्रिपादभे॥ वारेतथादिदैवत्येवासोदानंविधीयते॥ विशाखा
बुपाम्याद्दितिपुष्येपूर्वोत्तरात्रये॥ हस्तेचवासववासवेपौष्णेअस्थिसंचयनंयदि॥ विभक्तैरपिप्रेतश्राद्धंए
कस्मैमेवकार्यं॥ अनंताचार्यः॥ विभक्तावाविभक्तावाकुर्युश्राद्धंमदेवतं॥ मघासुचततोन्यत्रनाधिकारः
पृथग्विधा॥ अदैवतंनवश्राद्धादिषोडशांतंनवश्राद्धंसपिंडंचश्राद्धान्यपिचषोडश॥ एकेनैवतुकार्याणिसं
विभक्तधनेष्वपि॥ तथाचमनुः॥ वृषोत्सर्गंसुतःकुर्यात्पित्रोश्चैकादशेहनि॥ अथवाउपकालेतुविधि

नाऽवृषमुत्सृजेत्॥ वृषोत्सर्गं सुतो मातुः कुर्यादेकादशेऽहनि॥ सहोमं विधिवच्चैव पितर्यपि च जीवति॥ पति
वत्याः सपुत्रायाः वृषोत्सर्गं समाचरेत्॥ इति केचिद्वदंत्यन्येर्न कार्यमिति केचन॥ वृषोत्सर्गः॥ आद्यश्रा
द्धं मनुः॥ असपिंडक्रियाकर्म द्विजातेः संस्थितस्य च॥ अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत्॥ आद्यश्रा
द्धमशुद्धोऽपि कुर्यादेकादशेऽहनि॥ कर्तुस्तात्कालिकी शुद्धिरशुद्धिः पुनरेव सा॥ ब्राह्मणं भोजयेदाद्ये हो
तव्यमनले पि वा॥ पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति॥ आद्यादिषोडशश्राद्धं कुर्यादेकादशेऽहनि॥
दाहादि सफलं कर्म॥ एकोद्दिष्टविधानेन दर्शे वही नं तु तद्भवेत्॥ आद्यश्राद्धं न कुर्वीत मोहादेकादशेऽहनि॥
दाहादि सफलं कर्म पुनः कुर्याद्यथाविधि॥ सपिंडीकरणं यावत्तावस्यादेकमेव च॥ विभक्तैर्वाविभक्तै
र्वा कार्यं प्रेतक्रियादिकं॥ सपिंडीकरणं कुर्यात्सदैव द्वादशेऽहनि॥ तदभावे त्रिपक्षाद्वा त्र्यहेऽथवैकादशेऽपि वा॥
मृते पितरि यस्याथ ध्रियेत च पितामहः॥ तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकं॥ त्रयाणामपि पिंडानां
मेकेनापि सपिंडनं॥ पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः॥ अपुत्रःपुत्रेण वर्त्तव्यं पिता पुत्रस्य नंकचि
त्॥ यदि स्नेहेन वर्त्तव्यं पिता पुत्रस्य न कचित्॥ यदि स्नेहं न वै कुर्यात्सपिंडीकरणं विना॥ अशौचांतरं ५२

कुर्युरन्येषां कुर्यात्कर्ता संयोभवेत्॥ प्रथमेऽह्नि कर्त्ता॥ सगोत्रो वान्यगोत्रो वा यदि स्त्री यदि वा पुमान्॥ प्र
थमेऽहनि यो दद्यात्स दशाहं समापयेत्॥ अस्थिसंचयनादूर्ध्वं पित्रोर्यदि समागतः॥ तदादि सकलं कर्म पुत्रः
कुर्याद्यथाविधि॥ दहनाग्निः॥ स्मृत्यर्थसारे॥ दहनं चाहिताग्नेस्तु कुर्यात्त्रेताग्निना सुताः॥ अनाहिता
ग्निविधिवद्देहे दौपासनाग्निना॥ विधुरं विधवां चैव दहेल्लौकिकाग्निना॥ यतिपृष्ठे कलापाग्नौ तुषाग्नि र्बालकान्य
योः॥ आश्वलायनः॥ आत्मारोपशरीरस्य न विनश्यति पावकः॥ शवदेहं तु नष्टेऽपि दक्षिणः पाणिरस्ति चे
त्॥ लौकिकाग्निं स्थापयेत्तस्य पाणिपुत्रो जपेद्यजुः॥ उपावरोह जातवेदः तूष्णीं मग्नो नयेत्तिसः॥ स्याद्वा दशाग्र
हीतेन तूष्णीं तु जुहुयात्ततः॥ हस्तस्यादग्रपश्चेतमात्यं तत्क्रियां॥ स्नाते प्रेतस्य देहं तु पुत्राद्यैर्वस्त्राद्यैः पूजयेत्त
तः॥ अग्ने देहं दहेन्नैव किंचिद्दोषं परित्यजेत्॥ प्रमादादग्निविच्छित्तिः पत्नी चेत्स्यात्सन्निधौ॥ प्रेतस्य दहनं
कुर्यात्कथं पुत्रोऽथवान्यजः॥ प्रायश्चित्ताहुतिं हुत्वा पसहोमाहुतीरपि॥ दहेत्प्रेतं ततः पुत्रस्तेनैवोपासनाग्निना॥
द्विपत्नीत्वसंसृष्टाग्निविधिः॥ न भवेदग्निसंयोगः पत्न्योर्ज्येष्ठकनिष्ठयोः॥ ज्येष्ठा यदि मृता पूर्वमग्निहोत्रेपा
ताहरेत्॥ पूर्वमेव द्वितीया भार्या कनिष्ठा यदि वा मृता॥ निर्मथ्याग्निं दहेत्तेन विद्धिना विधिवद्व्रती॥ भार्ययोरा

योजयेद्ब्रह्मचारिणं॥ अथासन्निधाने ज्येष्ठकथं गोभिलः॥ ज्येष्ठः सपिंडनं कुर्यात् द्वादशाहे नुजैः सह॥ यदि त्व
सन्निधौ नस्यात् सन्निधस्थो नुजोपि वा॥ व्याघ्रपादः॥ ज्येष्ठेन वा कनिष्ठेन कृतं चेदौरसेन यत्॥ सगुणः स्यात् सपिंडात्त
मन्यन्न कृतमन्यथा॥ आचार्यः॥ दशाहाद्वत्सबहिः पित्रोर्मरणं श्रूयते यदि॥ कृत्वा सोवपनं दद्याद्दर्भाग्रैर्थो तिलो
दकं॥ नोत्तरीयं पिंडदानं नवश्राद्धं नवेदिका॥ नवे कुर्यात् छिन्नपात्रं कृते यस्य च पिंडने॥ पितृशब्देन तच्छ्राद्धं कुर्या
देकादशेहनि॥ सपिंडीकरणं नाम तत्र पार्वणवद्भवेत्॥ संवर्तः॥ यवीयसा कृते श्राद्धे सपिंडीकरणे यदि॥ कनि
ष्ठेनापि कर्तव्यं सपिंडीकरणं पुनः॥ कृते कनीयसा वापि श्राद्धे यस्य सपिंडने॥ ज्येष्ठोपि हि सुतः कुर्यात् स
पिंडीकरणं पुनः॥ सपिंडीकरणं नाम श्राद्धं पार्वणवद्भवेत्॥ अर्घ्यसंयोजनं नैव पिंडसंयोजनं न च॥ द्विती
यादीनि सर्वाणि मासिकान्यपि कारयेत्॥ ऊनान्यपि यथाकालसप्तान्येनेव कारयेत्॥ निवर्त्य सकलं प्रेत
कर्मकाल्यान्तरेपि चेत्॥ ऊनादीनि च सर्वाणि मासिकान्यपि कारयेत्॥ प्रेतकर्मकृतविषयं॥ अथासन्निधा
नपुत्रविषये शाकलः॥ पित्रोर्मरणकाले तु न चेत्स्यात्सन्निधौ सुतः॥ अन्यः कुर्याद्दशाहान्तं न तु सर्वं कदा
चन॥ तथा च स्मृतिः॥ देशान्तरस्थे पितरौ मृते चेदन्यो न्यकुर्यात् सकलं च पैतृकं॥ दाहं विना सकलकर्म ति

तिलोदके न ज्येष्ठैस्तत्कुर्यादनुजैः सपिंडनं॥ गोभिलोपि॥ अन्येनाकेनवित्तिप्रोः कृते पि हि सपिंडने॥ विना दा
हं पुनः कर्म ज्येष्ठं कुर्यात् सहानुजैः॥ अनुमासिकं॥ सपिंडीकरणं श्राद्धं कृत्वा स्यादूनमासिकं॥ न शोधयेद्दिनं
तत्र व्याघ्रस्य वचनं यथा॥ विधवाया ह्यपुत्राया जीवपत्न्यास्तथैव च॥ मासिकानि॥ व्रतस्थस्य नैवोर्ध्वं स्युः सपिं
डनात्॥ व्रतस्थो ब्रह्मचारीत्यर्थः॥ त्रिपक्षे द्वादशे पक्षे चतुर्विंशतिपक्षके॥ पायसन्त्रिपंचके चैव ह्यत्यमर्घ्यादि
पंचके॥ तथा च स्मृतिः॥ ऊनं स्याद्वादशाहे यत् कुर्याच्छ्राद्धानि षोडश॥ प्रतिमासे मृताहे तु यावत्संवत्सरं भवेत्॥
तावदेव हि कुर्वीत श्राद्धं मासिकसंज्ञकं॥ सपिंडीकरणादूर्ध्वं सदैवं पार्वणेन तु॥ मृताहे मासिकं कुर्यात् प्रतिमा
सं च वत्सरं॥ अपकर्ष्याथ चोत्कर्ष्य मासिकान्येव कारयेत्॥ त्रीणि चैवार्घ्यपात्राणि पिंडांस्त्रीनेव निर्वपेत्॥ स
पिंडीकरणादूर्ध्वं कुर्याच्छ्राद्धानि षोडश॥ स्वस्वकाले स्युरुक्तानि नात्यन्यथा यं विनेव तु॥ प्रथमाब्दिकर्तव्यं॥
दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकं॥ प्रथमाब्दे तु वर्जितं सपिंडीकरणे कृते॥ नित्यनैमित्तिकं श्राद्धं तीर्थश्रा
द्धादिकं च यत्॥ सपिंडीकरणादूर्ध्वं पुत्रः कुर्याद्यथाविधि॥ सपिंडमेकोद्दिष्टं॥ निर्णयामृते च॥ सपिंडीकरणादू
र्ध्वं यत्र यत्र प्रदीयते॥ भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च॥ मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणं॥ ए

कोद्दिष्टं कनिष्ठानां ज्येष्ठनापार्वणं स्मृतं॥ माधवीये॥ एकमुद्दिश्य एकश्राद्धं एकोद्दिष्टं प्रकीर्त्तितं॥ त्रीनुद्दिश्य तु यत्तद्धि पार्वणं
मुनयो विदुः॥ पितृव्यस्याप्यपुत्रस्य भ्रातुश्चैवाग्रजन्मनः॥ मातामहानामप्येवं पार्वणं श्राद्धमाचरेत्॥ एकमातृकसूतानामेक
श्चेत्पुत्रवान्भवेत्॥ सर्वे ते तेन पुत्रेण पुत्रिणो मुनयोऽब्रवीत्॥ प्रतिसंवत्सरं कार्यं मातापित्रोर्मृतेऽहनि॥ पितृव्यस्याप्यपुत्रस्य
भ्रातृज्येष्ठस्य चैव हि॥ सपिंडीकरणादूर्ध्वमेकोद्दिष्टं भवेद्यदि॥ सदैव भोजयेच्छ्राद्धं पिंडमेकं तु निर्वपेत्॥ इति कश्चिद्देशा
चारः॥ अथ कर्तृनष्टश्राद्धं॥ तत्राह वृद्धशौनकः॥ अब्दस्यांते विमोकाख्यं श्राद्धं प्रथमवत्सरे॥ कुर्यात्पार्वणं चैव व्याघ्रस्य
वचनं यथा॥ सांवत्सरं विमोकाख्यं मकृत्वा प्रथमाब्दिके॥ यः श्राद्धं कुरुते मोहात्कृतं प्राक्कर्म निष्फलं॥ प्रेतकार्यादि
कमित्यर्थः॥ यः करोति विमापुत्रः श्राद्धं चैव तु कस्यचित्॥ मृतश्चेद्यदि कर्ता च श्राद्धलोपो भवेदिह॥ पित्रोः श्राद्धं विना
मातुः सपत्न्या अपि लुप्यते॥ तन्न कर्त्तव्यमन्येन नष्टे कर्तरि वा यदि॥ पित्रोः श्राद्धं विनान्येषां न कुर्याच्छ्राद्धमेव हि॥ क
र्तर्मृतश्चेज्ज्येष्ठः स्यादनुजैः कार्यमेव तु॥ पित्रोः श्राद्धं विनान्येषां यदि स्नेहेन पार्वणं॥ एकोद्दिष्टं भवेद्वापि पिंडदानं कृता
कृतं॥ अथ पितामहश्राद्धं॥ पितामहस्य यच्छ्राद्धं षोडशादि सपिंडनं॥ अपुत्रस्य तु कर्तव्यं पौत्रेण प्रथमाब्दिकं॥
पृथक्प्रत्यब्दिकं तस्य वर्षे वर्षे न तद्भवेत्॥ पित्रा सहैव तच्छ्राद्धं वत्सरादौ भवेत्पितुः॥ तथा च स्मृतिः॥ पितामहः पि
तुः पश्चात्पंचत्वं यदि गच्छति॥ पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशं॥ नैतत्पौत्रेण कर्त्तव्यं पुत्रवांश्चेत्पितामहः॥

लघ्वाश्वलायनः ॥ दशाहादूर्ध्वमन्यच्चेत् अशौचं प्राप्यते यदि॥ शुद्धः स्यादाद्यपर्यंतं प्रथमं दहनादितः॥ अथ व्युत्क्रमः
गालवः॥ व्युत्क्रमाच्च सापिंड्यं वियोगाच्च कारितं॥ तत्सापिंड्यं पुनः कुर्यात् क्रमाच्चापि तत्कृतः॥ पिताम
हे जीवति च पिता मृतश्चेद्व्युत्क्रमः॥ पुत्राभावे शाकल्यः॥ पुत्राभावे स्वयं पत्नी स्वभर्तृनाममंत्रकं॥ सपिंडीकरणं
कुर्यात्ततः पार्वणमेव च॥ गालवः॥ अपुत्रे संस्थिते कर्त्ता न भवेच्छ्राद्धकर्मणि॥ तत्र पत्न्येव कुर्वीत सापिंड्यं पार्व
णं तथा॥ पार्वणमिति सर्वत्र त्रिपुरुषोद्देशश्राद्धमित्यर्थः॥ आचार्यः॥ अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंड
नं॥ श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्॥ स्मृतिसारे॥ अपुत्राया पितः पिंडं भर्तृपिंडे नियोजयेत्॥
पत्यौ जीवति चेद्यस्याः श्वश्र्वादिषु नियोजयेत्॥ कालदर्शे॥ पत्न्याः कुर्यादपुत्रायाः पतिर्मात्रादिभिः सह॥ सा
पिंड्यमनुयाते तु जनकेन सहात्मजः॥ अथानुगमने बोधायनः॥ पिंडं त्वनुगतायाश्च भर्तृपिंडे नियोजयेत्॥
प्राक्प्रत्यक्च विभजेद्द्विधा एकैकं विभजेत्त्रिधा॥ प्राग्भागान्पिंडेषु संयोज्य विधिवत्ततः॥ प्रत्यग्भागांस्तथा मातृपि
डेषु च यथाक्रमं॥ कृते पिंडादि सापिंडे मातुः श्राद्धं पृथग्विधा॥ अष्टकादौ तथा मातुः पितामह्यादिभिः क्रमात्॥
अथ ब्रह्मचारी सपिंडीकरणं॥ गोभिलः॥ सपिंडीकरणं केचित्कथं स्याद्ब्रह्मचारिणः॥ स्वस्रादिपितृरूपेषु

पितुः सपिंडनं कृत्वा कुर्यान्मासानुमासिकं ॥ अथविभक्तश्राद्धं ॥ अनन्ताचार्यः ॥ विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादि
कं ॥ एकेनैवाविभक्तेषु कृतं सर्वैस्तु तत्कृतं ॥ भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते ॥ विभागसति धर्मोपि भवेदेषां पृथ
क्पृथक् ॥ सर्वैरनुमिमं कृत्वा ज्येष्ठेनैव तु यत्कृतं ॥ द्रव्येणेवाविभक्तेन सर्वैरपि कृतं भवेत् ॥ तथा च स्मृतिः ॥ पित्रोः श्रा
द्धं पृथक्कुर्युः संविभक्ता धने नवा ॥ एकत्र यदि कुर्वीरन्यतिताः स्युर्न संशयः ॥ अविभक्तश्राद्धं ॥ सापत्नभ्रातरः कुर्यु
रविभक्ताः पृथक् पृथक् ॥ अमावास्यादिकं चैव पितुः पत्न्यादिकं विना ॥ संग्रहे ॥ अविभक्ताः सुताः पुत्राः एकं कुर्यान्मृ
ताह्निकं ॥ देशांतरे पृथक्कुर्याद्दर्शश्राद्धानुमासिकं ॥ ग्रामांतरं व्रजेयुश्चेदविभक्ताः सुता यदि ॥ दर्शं च मासिकं
श्राद्धं कुर्युः पित्रोः पृथक् पृथक् ॥ अविभक्ताः पृथग्ग्रामास्वस्वार्जितधनाशनाः ॥ कुर्युस्ते भ्रातरः श्राद्धं मातापित्रोः पृथ
क्पृथक् ॥ अथमृताहविषयः ॥ तत्र स्मृतिः ॥ अज्ञानाद्वा प्रमादाद्वा यो मृताहमतिक्रमेत् ॥ श्वानयोनिशतं गत्वा चांडलः
स्यात्पुनःपुनः ॥ रजस्वला यां भार्यायां मृताहयः परित्यजेत् ॥ सर्वे नरकमायाति यावदाभूतसंप्लवं ॥ मृतस्य वाथ कर्तुर्वा
भार्या यदि रजस्वला ॥ यो तिक्रमे मृताहं तु रौरवं नरकं व्रजेत् ॥ अहके समनुप्राप्ते यस्य भार्या रजस्वला ॥ पंचमेहनि तच्छ्रा
द्धं न तु कुर्यान्मृतेहनि ॥ भार्याकर्तृत्वत्तद्विषये ॥ स्मृतिः ॥ अपुत्रातु यदा भार्या संप्राप्ते पितुराब्दिके ॥ रजस्वला भवे
च्छ्राद्धं कुर्यात्तत्पंचमेहनि ॥ अन्नश्राद्धं ॥ सपिंडमासिके चैव ह्यमावास्यादिकं च येत् ॥ अन्येनैव तु कर्तव्यं यस्य भा

यीरजस्वला ॥ अपत्नीकः प्रवासी च यस्य भार्या रजस्वला ॥ सिद्धान्नेनैव कुर्वीत पित्रोः प्रत्याब्दिकादिकं ॥ श्राद्धं विप्रान्द्वि
जातांश्च आमश्राद्धं प्रकीर्तितं ॥ अमावास्यादिनियतं मासंसंवत्सरादृते ॥ अथामश्राद्धं ॥ अपद्यनग्नौ तीर्थे च प्र
वासे पुत्रजन्मनि ॥ आमश्राद्धं द्विजः कुर्यात्पित्रोः प्रत्यब्दिकं विना ॥ तीर्थे नग्नो प्रवासे च श्राद्धमन्ने न कारयेत् ॥ अमावा
स्यादिकं चैव केचिदेवं वदंति हि ॥ सिद्धान्ने तु विधिर्यस्यादामश्राद्धेप्ययं विधिः ॥ आवाहनादि सर्वं स्यात्पिंडदानं तथै
व च ॥ दद्याद्यदि द्विजातिभ्यः शृतं नाशृतमेव च ॥ तेनाग्नौ करणं कुर्यात्पिंडस्थाने तु निर्वपेत् ॥ अन्नाख्यं भोजनांग
च यत्कर्म विकिरं तथा ॥ उच्छिष्टभागिनां भागमामश्राद्धे विवर्जयेत् ॥ स्मृतिसारे ॥ आमश्राद्धं यदा कुर्यात्पिंडदानं क
थं भवेत् ॥ गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा ॥ अथ हिरण्यश्राद्धं ॥ अन्नाभावे द्विजः कुर्याच्छ्राद्धमामेन वै यतः ॥
तदभावे हिरण्येन सदैवं पार्वणेन तु ॥ अन्नाद्द्विगुणमामं स्याद्धिरण्यं स्याच्चतुर्गुणं ॥ तदभावेऽथवा तस्य पर्याप्तिर्वापि कारयेत् ॥
अथ विधिः ॥ संकल्पं सूक्तपवनं द्विजनेमांस्तथैव च ॥ भाजनासादनं चैव ह्यग्नौकरणमेव च ॥ अवाहनार्घ्यविकिरं प्रदक्षिणं
पितृस्तुतिः ॥ विसर्जनाच्छादने च हेमश्राद्धे विवर्जयेत् ॥ अथैकस्मिन् दिने श्राद्धानि ॥ एककाले मृतानां च बहूनां चाथवा
द्वयोः ॥ तंत्रेण श्रपणं कुर्यात्श्राद्धं चैव पृथक्पृथक् ॥ सवेयादिसपिंडानां युगपन्मरणं तथा ॥ संबंधासत्तिमालोच्य तत्क्र
मात् श्राद्धमाचरेत् ॥ कृत्वा पूर्वं मृतस्यादौ द्वितीयस्य ततः पुनः ॥ कुर्यात्पश्चात्तृतीयस्य सन्निपाते त्वयं क्रमः ॥ अशक्तविषये

उक्तमेतत्॥ ननुशक्तविषये॥ श्राद्धद्वयंनकुर्वीतपाकैकेनकथंचन॥ यदियःकुरुतेमोहाच्छ्राद्धंतस्यवृथाभवेत्॥ शक्तोस
त्यापृथक्कुर्यात्पृथक्पाकेनवैक्रमात्॥ निर्वर्त्यैकंपुनःकुर्यादर्चयित्वाथवाभवेत्॥ पित्रोःश्राद्धेतुसंप्राप्तेनचेत्पर्युषि
तेपिवा॥ पितृपूर्वंसुतःकुर्यादन्यत्रासतियोगतः॥ सहगमने॥ एकचित्यांसमारूढौदंपतीनिधनंगतौ॥ तयोःश्राद्धंपृथक्कु
यदिकस्मिन्कालएवतु॥ पृथक्पाकेनवैश्राद्धंपित्रोरपिपृथक्पृथक्॥ वैश्वदेवादिकंसर्वंपृथगेवविधीयते॥ वैश्वदेवा
दिकमितिविश्वेदेवार्घ्याग्नौकरणपिंडविकिरादिकर्मइत्यर्थः॥ स्मृतिसारे॥ निमंत्र्यादौपितुःश्राद्धेदेवेपित्र्येचवैद्वि
जान्॥ निमंत्रयेत्ततोमातुःश्राद्धेविप्रान्यथाक्रमं॥ प्रक्षाल्यपैतृकेपादौद्विजानामथमातृके॥ उपक्रमेदर्चनांतेलेवं
स्यन्मातृकेपिच॥ अथैकस्मिन्दिनेश्राद्धद्वयंनिषिद्धं॥ सुधावर्ण्णे॥ श्राद्धंकृत्वातुतस्यैपुनश्श्राद्धंनतद्दिने॥ निमित्ति
कंतुकर्त्तव्यंनिमित्तानुक्रमोदयं॥ श्राद्धंकृत्वापुनःश्राद्धंनकुर्यादेकवासरे॥ यदिनैमित्तिकंनस्यादेकाद्देशंभवेद्यदि॥ द्व
बहूनिनिमित्तानिजायेरन्नेकवासरे॥ नैमित्तिकानिसर्वाणिनिमित्तोत्पत्त्यनुक्रमात्॥ श्राद्धंस्यादेकदैवत्यमेकमुद्दिश्य
वैयदि॥ श्राद्धद्वयंनकर्त्तव्यमेकस्मिन्नेववासरे॥ कालदर्शे॥ नित्यदार्शिकयोःश्राद्धोदकुंभमासिकयोरपि॥ दार्शिक
स्ययुगादेश्चदार्शिकालभ्ययोगयोः॥ दार्शिकस्यचमन्वादेःसंपातश्राद्धकर्मणां॥ प्रसंगादितरस्यापिसिद्धिरुत्तर
माचरेत्॥ नित्यश्राद्धदार्शिकयुगमन्वाद्यलभ्ययोगेषुषट्पुरुषात्मकमेकदैवत्यंभवति॥ उदकुंभमासिकयोःप्रस

द्धिके च त्रिपुरुषात्मकमेकदैवत्यं तस्मात्ताद्दशं श्राद्धद्वयं त्रयं वा न कर्त्तव्यमित्यर्थः॥ देवताभेदे सति श्राद्धद्वयं वा कर्त्तव्यमेव॥
तत्र स एवाह॥ नित्यस्य चोदकुंभस्य नित्यमासिकयोरपि॥ दर्शस्य चोदकुंभस्य दर्शमासिकयोरपि॥ नित्यस्य चाद्धिकस्या
पि दार्शिकाद्धिकयोरपि॥ गुणाद्याद्धिकयोश्चापि मन्वाद्याद्धिकयोरपि॥ प्रत्याद्धिकस्यावालभ्ययोगस्य विहितस्य च॥ सं
पाते दैवताभेदा श्राद्धयुग्मं समाचरेत्॥ दर्शप्रत्यद्धिके प्राप्ते श्राद्धं स्यात्तत्र वै कथं॥ आदौ प्रत्याद्धिकं श्राद्धं कुर्याद्दर्शं ततः
परं॥ श्राद्धे सपिंडे संप्राप्ते पिंडहीने तु वै यदि॥ श्राद्धं कृत्वा सपिंडं हीनं मृथा चरेत्॥ सपिंडसहितं श्राद्धमित्यर्थः॥ प्रत्य
द्धिकं यदा श्राद्धं युग्ममागमन्वंतरादिकं॥ प्राप्तं चेत्तच्च कुर्वीत नैव दर्शयुगाद्धिकं॥ श्राद्धे नैव कृते नेह बहुदैवत्यके च
न॥ सिद्धिः स्यादल्पदैवस्य श्राद्धस्य च विनाद्धिकं॥ अथ श्राद्धमहिमा॥ श्राद्धकालेषु सर्वेषु श्राद्धं कुर्वंति मानवाः॥ आयुः
प्रज्ञा यशः कीर्त्तिः प्रजा श्रीश्च विवर्धते॥ श्रद्धया क्रियते श्राद्धं मंत्रेनाद्धादनेन च॥ दक्षिणां च यथाशक्ति श्राद्धं तस्य प्र
चक्षते॥ आकाशे तारका संख्या तृणसंख्या महीतले॥ श्राद्धकाले तु दानस्य पुण्यं वक्तुं न शक्यते॥ सौवर्णं वाथवा रौप्यं त
दभावे यथा ताम्रजं॥ तत्काल एव दंतव्यं तृप्तास्युः पितरो ध्रुवं॥ अज्ञानाद्वा प्रमादाद्वा ह्यनास्तस्य तत्काले चेन्न दीयते॥ अमाश्रा
द्धं॥ दक्षिणाद्धि गुणा देया यथा चार्या यदीयते॥ पितृयज्ञेपि दातव्या पितुस्थाने विशेषतः॥ यच्च संकल्पितं द्रव्यं य
द्वि तस्मै न दीयते॥ स याति नरके घोरे यावदाभूतसंप्लवं॥ सूतके॥ श्राद्धे हनिक्षणे दत्ते सुसंकल्पं यथाविधि॥ पादप्र ५२

सेदद्विजेषु द्वाश्राद्धसंहितां॥सर्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः॥सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति॥नमेस्ति
वित्तं न धनं न चान्यच्छ्राद्धोपयोग्यं स्वपितॄन्नतोऽस्मि॥तृप्यंतु भक्त्या पितरो मयैतौ भुजौ कृतौ वर्त्मनि मारुतस्य॥अथश्रा
द्धकालः॥अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयं॥द्रव्यं ब्राह्मणसंपत्तिर्विषुवः सूर्यसंक्रमः॥व्यतीपातो गज
च्छाया ग्रहणे सूर्यचंद्रयोः॥श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिताः॥ अथषण्णवत्याः प्रकीर्तिताः॥षण्ण
वत्या इति श्राद्धविशेषः॥श्राद्धदेवतानि॥त्रिदैवत्यं मृताहे च षड्दैवत्यं तु दर्शके॥वृद्धौ तु नवदैवत्यमष्टकासु तथैव
च॥दर्शे नित्ये युगादौ च मन्वादौ ग्रहणे तथा॥संक्रांतिषु भरण्यां च षड्दैवत्यं विधीयते॥शातातपः॥नांदीमुखे
ष्टकाश्राद्धे गयायां च मृतेहनि॥मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह॥विश्वादर्शे॥मातुर्गयाष्टकावृद्धिमृता
हेषु महालये॥श्राद्धं कुर्यात्पृथक्दैवे तंत्रे वानुगतावपि॥अत्र कश्चिद्विशेषः॥प्रयोगसारे॥अष्टकासु च वृद्धौ च
गयायां च मृतेहनि॥चंद्रसूर्योपरागे तु व्यतीपाते महालये॥मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह॥पितरो यत्र
पूज्यंते तत्र माता महा अपि॥वृद्धौ तु नवदैवत्यं षड्दैवत्यं तु दर्शके॥महालये गयाश्राद्धे ज्ञेयं द्वादशदैवतं॥प्रयो
गसारे॥आषाढ्याः पंचमे पक्षे श्राद्धं कुर्याद्दिने दिने॥उद्दिश्य नवदैवत्यमित्येवं मुनिरब्रवीत्॥अथ कस्मिन्
दिने कुर्यात्सर्वानुद्दिश्य यत्नतः॥महालयात्मकं श्राद्धं तद्भया सह द्वादशं भवेत्॥पिंडरहितश्राद्धं हेमाद्रौ॥संक्रां ५४

तौ ग्रहणे पाते युगमन्वंतरादिषु॥भरण्यां चापि कुर्वीत श्राद्धं पिंडं विनैव तु॥संग्रहे॥मन्वादौ च युगादौ च ग्रहणे चंद्रसू
र्ययोः॥संक्रांतिषु च सर्वासु श्राद्धं पिंडैर्विना भवेत्॥पिंडहीनं तु यच्छ्राद्धं संकल्पाख्यं प्रचक्षते॥तत्रापि हि द्विजः कुर्यादि
त्येवं मुनयोऽब्रवीत्॥आवाहनार्घ्यपिंडांश्च विकिरोच्छिष्टपिंडकौ॥स्वधोच्चारं तथाग्नौकरणं संकल्पे सप्त वर्जयेत्॥अ
थ श्राद्धनियमः॥दंतधावनतांबूलं क्षौरमभ्यंगमभोजनं॥रत्यौषधपरान्नं च श्राद्धकर्ता विवर्जयेत्॥दंतधा
वनतांबूलं नखकेशनिकृंतनं॥कर्ता चैव तु पूर्वेद्युः भोक्ता चैव परेहनि॥अथ कश्चिद्विशेषः॥अमाश्राद्धे तथा नि
त्ये काम्यश्राद्धे महालये॥निषिद्धं चैव तांबूलमिति शातातपोऽब्रवीत्॥दर्शे चापरपक्षे च संक्रांतिषु युगादिषु॥
श्राद्धं कृत्वा ततो भुक्त्वा तांबूलं खादयेद्द्विजः॥यस्तु पितृव्रतघ्नेषु तांबूलं यदि खादयेत्॥भवेत्तु कृतस्यापि श्वानि
राशाः पितरो गताः॥श्राद्धकालेषु सर्वेषु श्राद्धकर्ता तु यो द्विजः॥न कुर्यात्क्षौरमभ्यंगं तथैव स्त्रीनिषेवणं॥अ
थापरपक्षः॥प्रयोगपारिजाते॥कन्यागते सवितरि यान्याहानि तु षोडश॥क्रतुभिस्तानि तुल्यानि तेषु दत्तम
थाक्षयं॥अहः षोडशकं यत्तु शुक्लप्रतिपदा सह॥चंद्रक्षयविशेषेण सापि दर्शातिका स्मृता॥आदौ मध्या
वसाने वा यत्र कन्यां व्रजेद्रविः॥स पक्षः सकलः पूज्यः श्राद्धं षोडशकं प्रति॥नभस्यापरपक्षे तु श्राद्धं कुर्या

५५

द्विनेदिने॥ नैव नंदानंदादि वर्ज्यास्यान्नैव कुर्याच्चतुर्दशी॥ नभस्यापरपक्षेतु मृताहनि पितुर्यदि॥ करोतितत्र
यःश्राद्धंपितॄणामक्षयंभवेत्॥ भरणीप्रेतपक्षस्य महती परिकीर्तिता॥ अस्यांश्राद्धंकृतंयेन सगयाश्राद्धकृ
द्भवेत्॥ नंदाम्बवर्कभौमेषु चतुर्दश्यांत्रिजन्मसु॥ एषुश्राद्धंनकुर्वीत गृहीपुत्रधनैर्भवेत्॥ कृतेनैमित्ति
केकाम्येश्राद्धंयस्तुमहोडुनि॥ दद्यादिज्येष्ठपुत्रस्य नाशःस्यादितिनिश्चितं॥ प्राजापत्येचपौष्णेचमघा
यांभार्गवेतथा॥ यस्तुश्राद्धंप्रकुर्वीत तस्यपुत्रंविनश्यति॥ मघायांचत्रयोदश्यांकन्यासंस्थेदिवाकरे॥
पिंडदानंपरित्यज्यश्राद्धंतत्रविधीयते॥ याज्ञवल्क्यः॥ प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशी॥ शस्त्र
णेवहतायेवैतेभ्यस्तत्रप्रदीयते॥ समत्वमागतस्यापिपितुःशस्त्रहतस्यच॥ एकोद्दिष्टंसुतःकुर्याच्चतुर्दश्यां
महालये॥ चतुर्दश्यांतुयच्छ्राद्धंसपिंडीकरणेकृते॥ एकोद्दिष्टविधानेनतत्कुर्याच्छस्त्रघातिनां॥ एकोद्दिष्टवि
धानेनमृतस्याद्विदशादिभिः॥ कुर्यान्मृतेप्रेतपक्षेत्वेकोद्दिष्टंसुतःपितुः॥ निषिद्धानिपरित्यतिथिवारादिका
निच॥ अथैकस्मिन्दिनेकुर्यादशुभवापिमहालये॥ प्रयोगपारिजाते॥ अमापातभरण्यांच द्वादश्यांपक्ष
मध्यके॥ यथातिथ्यंत्रनक्षत्रंवारंच नविचारयेत्॥ अपुत्रानिग्निकश्चैवविधवाब्रह्मचारिणः॥ दर्शमि ५५ १६

क्षालनादूर्ध्वंविप्राणांनास्तिसूतकंश्राद्धेपादप्रक्षालनादधः॥ श्राद्धकर्मनकर्तव्यमित्येवकौशिकोब्रवीत्॥ ऋष्य॥ शृंग॥
आह्निकेचैवसंप्राप्तेह्याशौचंजायतेयदि॥ अशौचेतुव्यतिक्रांतेतत्रश्राद्धंविधीयते॥ व्याघ्रपादः॥ पित्रोःप्रत्याब्दिकेप्रा
प्तेसूतकंयदिजायते॥ निवृत्यसूतकेश्राद्धंकुर्यादेकादशेहनि॥ तत्रापिकरणासंभवेदर्शेवाकुर्यात्॥ देवलःप्रत्याब्दि
केश्राद्धंतंतराम्मृतसूतके॥ अशौचानंतरंकुर्यात्तन्मासेदुक्षयेपिच॥ तदहश्चेत्तुदुष्येतकेनचित्सूतकादिना॥
सूतकानांतरंकुर्यात्पुनस्तदहरेवच॥ मृताहेनभवेच्छ्राद्धंदैवात्प्रत्याब्दिकेयदि॥ एकादश्यांतुकृष्णायांकुर्याद्द्वि
नदक्षिणा॥ अथमृताहमासोनज्ञायते॥ नज्ञायतेमृताहश्चेत्प्रोषितेसंस्थितेसति॥ मासश्चेत्प्रतिविज्ञा
तंतद्दर्शेस्यायथाब्दिकं॥ श्राद्धविघ्नेसमुत्पन्नेत्वविज्ञातेमृतेहनि॥ एकादश्यांतुकर्तव्यंकृष्णपक्षेविशेषतः॥
यदामासानविज्ञातोविज्ञातोदिनमेवतु॥ तदाचाढकेमासिमाघेवातद्दिनंभवेत्॥ दिनमासावविज्ञातौमरण
स्ययदापुनः॥ प्रस्थानमासिदिवसेग्राह्योपूर्वोक्तयादिशः॥ अथब्राह्मणाभावे॥ पात्राभावेपरंकृत्वापितृयज्ञ
विधिंनरः॥ निर्दिश्याथन्नमुद्धृत्ययत्रपात्रंततोनयेत्॥ सर्वाभावेक्षिपेदग्नौगवेदद्यात्तथाप्सुच॥ ननुप्राप्तस्थ
लिपास्तिपैतृकस्यविशेषतः॥ अथद्रव्याभावे॥ अग्निनादाहकेजातेश्राद्धकालेसमागते॥ तस्मिंश्चोपन

हालयं कुर्यान्न कुर्यात्पुत्रवान्गृही॥ अर्थाभावे द्विजा भावे तीर्थे चैव महालये॥ एकं वाप्य शयेत्पिंडमर्घ्यपिं
डान्पृथक्पृथक्॥ दर्भाः कृष्णाजिनं मंत्रो भावे ग्नि ब्राह्मणास्तिलाः॥ नैते निर्माल्यतां यांति नियोक्तव्यं
पुनः पुनः॥ दर्भाः पिंडेषु निर्माल्य ब्राह्मणाः प्रेत भोजने॥ मंत्रः शूद्रेषु निर्माल्यं चितौ नो चक्रुताशनः॥ अथ सं
न्यासि श्राद्धं स्मृत्यर्थसारे॥ एकोद्दिष्टं न कर्त्तव्यं संन्यस्तानां कदाचन॥ त्रिदंड ग्रहणादेव प्रेतत्वं नैव जायते॥ एको
द्दिष्टं जलं पिंडमाशौचं पिंडसत्क्रिया॥ न कुर्यात्पार्वणादन्यद्ब्रह्मी भूताय तिक्षये॥ त्रिदंड ग्रहणादेव प्रेतत्वं नैव जा
यते॥ एकादशाहं संप्राप्ते पुत्रः कुर्वीत सत्क्रियां॥ दंड ग्रहण मात्रेण नैव प्रेतो भवेद्यदि॥ अतः पुत्रेण कर्त्तव्यं पार्वणं त
स्य सर्वदा॥ एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा॥ अहन्येकादशे तेषां पार्वणं तु विधीयते॥ सपिंडीकरणं तेषां न क
र्त्तव्यं सुतादिभिः॥ प्रतिमासं तु कर्त्तव्यं मृताहे मासिकादिकं॥ सन्यासिनो प्यद्धिकादि पुत्रः कुर्याद्यथाविधिः॥ मह
लये तु य श्राद्धं द्वादश्यां पार्वणेन तु॥ अथ श्राद्धे ब्राह्मणसंख्या॥ कारिका॥ शुचीन्निमंत्र्य द्वौ दैवत्रीन् विप्रान्
पितृकर्मणि॥ दैव पित्र्ये थवैकैकं सपिंडीकरणं विना॥ बृहत्पाराशरः॥ प्राङ्मुखो दैविको विप्रो पितरस्त्र्युदङ्मु
खः॥ एकैको वा समयत्र्यादसंपत्ताव तिक्रमः॥ संपत्तावथ पात्राणामेकैकस्य त्रयस्त्रयः॥ पित्रादेर्ब्राह्मणाः प्रोक्ताः

चत्वारो वैश्वदेविके ॥ वृत्तिकारः ॥ सत्क्रियादेशकालौ च द्रव्यं ब्राह्मणसंपदः ॥ पंचैते ताच्चिस्तरो हंति तस्मान्मेहत विस्त
५६ रं ॥ द्वौ दैवे प्राङ् त्रयः पित्र्ये उदगेकैकमेव वा ॥ माता महानामप्येवं तंत्र वा वैश्वदेविकं ॥ अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य
च ॥ देवतायतनं कृत्वा ततः श्राद्धं समाचरेत् ॥ प्राश्य दग्नौ तदन्यं तु दद्याद्वा ब्रह्मचारिणे ॥ प्रयोगे ॥ अमंत्राणमगतवि
प्रं निवारयति दुर्मतिः ॥ ब्रह्महत्यासमाप्नोति शूद्रयोनिषु जायते ॥ अमंत्रितस्तु यो विप्रो भोक्तुमन्यत्र गछति ॥ नरका
णं शतं गत्वा चंडालेष्वभिजायते ॥ श्राद्धकर्त्ता परश्राद्धं दैवे पित्र्ये तु भुंजति ॥ नरकं प्रतिपद्येत भोक्ता कर्त्ता तथैव च ॥
भ्रातरो ऽत्र पित्रो च तथा श्रोत्रियमेव च ॥ द्विजमप्यनधीतारं श्राद्धे यत्नेन वर्जयेत् ॥ ब्राह्मणान् देवसंपन्नान् नृपि
त्पुत्रान् स्कृतानपि ॥ पृथग्वर्गेन वै विप्रान् भोज्याद्द दैवि वर्जितान् ॥ एकैकमपि विप्रं तु वर्गे वर्गे नियोजयेत् ॥ दैवे
पित्र्ये यथान्यस्मिन् न विप्रं देद वर्जितं ॥ अथ श्राद्धदेशः ॥ अर्णवे ॥ प्रदक्षिणप्रणवे देशे तीर्थादौ स्वगृहेपि वा ॥
भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः ॥ परकीयप्रदेशेषु न निर्वपेमुयः ॥ तद्भूमिस्वामिपितृभिः श्राद्धकर्म
विहन्यते ॥ अटवी पर्वताः पुण्याः नदी तीर्थानि यानि च ॥ सर्वा स्वामिकान्याहुः न हि तेषु परिग्रहः ॥ नवानि गिरयोत
त्र तीर्थान्यायतनानि च ॥ देवखातश्च्छिदेष्वखातेन विद्यते ॥ पुनः श्राद्धविधिः ॥ प्रमादादकृते चेत्स्यादग्नौ करणमेव
वा ॥ अकृतं पिंडदानं हि पुनः श्राद्धं समाचरेत् ॥ पितृपात्रं चलेत्स्थानात् पितावेद्गमनं यदि ॥ स्पृष्टो ऽसिपिंडांश्च माजा ५६

रेः पिंडभिन्नः पितुर्यदि ॥ अग्नौ कृते तु नाशो ग्नेः श्राधमध्ये भवे यदि ॥ उपोष्य तद्दिने कर्त्ता पुनः श्राधं परेहनि ॥ भिन्नाः
स्यात्पितृपिस्तु पिता च वमने यदि ॥ अग्नौ कृते विना शोग्नेः श्राधं कुर्यात्परेहनि ॥ आपिंडदान पर्यंतं न किंचिदपि वै भ
वेत् ॥ प्रमादाच्च भवे तत्र पुनः श्राधं समाचरेत् ॥ अत्र विशेषवचनं ॥ अकृते पिंडदाने तु पिता चेद्वमते यदि ॥ कृत्वा
पाकं पुनः कुर्यात् श्राधं तत्र विधानतः ॥ मार्जारमुखसंस्पर्शे पिंडभिन्ने पितुर्यदि ॥ पुनः पिंडाः प्रदातव्याः तेन पाके
न तत्क्षणं ॥ पितामहादिदेवानां ब्राह्मणो वमते यदि ॥ सर्वं मंत्रं समादाय कुनेदग्नौ तु लौकिके ॥ प्रणवेनाहुतिं चाद
वंते स्यात् भूर्भुवःस्वरो ॥ आहुतीर्जुहुयात् त्रिंशन्मंत्रैः प्राणादिपंचकैः ॥ द्वात्रिंशदाहुतीरेवं कृत्वा पिंडान् प्रदा
पयेत् ॥ सर्वेषां शाखिनामेवं विधिरेष उदाहृतं ॥ सपिंडीकरणे चैव पिता चेद्वमते यदि ॥ सपिंडीकरणं कुर्यात्तु पुनः
पाकेन तत्क्षणात् ॥ मासिके च गयाश्राधे प्रत्यब्दे च महालये ॥ पिता चेद्वमनं कुर्यात् पुनः श्राधं समाचरेत् ॥ संक्रां
तिपक्षपातेषु युगमन्वष्टकासु च ॥ पिता चेद्वमनं दर्शे पुनः श्राधं न कारयेत् ॥ श्राधदिने ऽतिक्रांते श्राधलोपः
श्राधानि स्वस्वकालेषु प्रमादादकृतानि चेत् ॥ अतीतानि न कार्याणि प्रत्यब्दं मासिकं विना ॥ सत्यव्रतः ॥ ऊनमा
सेषु नित्येषु तथा नैमित्तिकेषु च ॥ उत्कर्षं चापकर्षं च न कुर्यादष्टकासु च ॥ अथ जीवत्पितृकविषयं ॥ पितामह

हस्थितेयस्यपितायदिविपद्यते॥ द्वौपिंडौवेकनामानौवैकश्चप्रतितामहे॥सत्यव्रतः॥ द्वौपिंडौपितृनाम्नेनदद्या
ज्जीवपितामहः॥प्रपितामहस्यैकैकंपितुप्रत्यब्दिकादिषु॥ अथश्राद्धदिनेवैश्वदेवसंग्रहे॥ वृद्धावादौक्षयेचां
तेदर्शमध्येतुकुर्वते॥महालयेचपिंडांतेवैश्वदेवंचतुर्विधं॥ मध्यइतिदर्शे॥ अग्नौकरणानंतरंवैश्वदेवपृथक्पाके
नवैश्वदेवंकार्यं॥बलिहरणादिकंश्राद्धांतएव॥ तथास्मृतिः॥ पित्रर्थान्निर्वपेत्पाकंवैश्वदेवार्थमेवच॥वै
श्वदेवंनपित्रर्थंनदर्शंविश्वदेविकं॥सत्यव्रतः॥ अग्नौकरणहोमंतुकृत्वाकुर्यात्दशाहुतीः॥पृथक्पाकेनवै
दर्शेविधिरेषउदाहृतः॥अग्नौकरणासंभवेविशेषमाह॥दर्शेविसर्जनादर्वाक्॥ उत्तरांचमनात्परं॥वैश्व
देवंततःकुर्यात्केचिदेवंवदंतिहि॥अनाहिताग्निर्यो दर्शेश्राद्धंकृत्वाविधानतः॥पितृशेषेणवैकुर्याद्वैश्व
देवंततोद्विजः॥ अथाहिताग्निविषयं॥ पक्षांतंकर्मनिर्वर्त्यवैश्वदेवंतुसाग्निकः॥पिंडयज्ञंततोकुर्यात्ततो
न्वाहार्यकंबुधः॥प्रत्यब्दंमासिकंचैवश्राद्धंकृत्वाविधानतः॥तच्छेषेणैवकुर्वीतवैश्वदेवंद्विजोत्तमः॥च
शब्दादेकादिष्टपिज्ञेयं॥ मांडव्यः॥ यद्येकस्मिन्नहन्येवंश्राद्धानिस्युर्बहूनिच॥कृत्वाश्राद्धानिसर्वाणिवैश्व
देवंचरेदथ॥ अथदौहित्रश्राद्धे॥ सत्यव्रतः॥ मातामहाविपद्येतयदिचेत्पुत्रवानपि॥कुर्यान्मातामहश्रा ५७

षडेते पितृपूर्वकं ॥ प्रयोगपारिजाते ॥ बर्बरा केरवारं तु केतकी तुलसी तथा ॥ ताजी दर्शनमात्रेण निराशाः पि
तरो गताः ॥ मातादिः ॥ पीतोच्छिष्टं तु पानीयं पीत्वा च ब्राह्मणः क्वचित् ॥ त्रिरात्रं तु व्रतं कार्यं वामहस्तेन वा पु
नः ॥ तथा चलिंगे ॥ अनास्येन न पिबेत्तोयं तिष्ठन्न जलमापिबेत् ॥ वामहस्ते न शाय्यायां तथैव भ करेण वा ॥
इति श्रीनारायणभट्टविरचितायां धर्मप्रवृत्तौ नानाविधश्राद्धप्रकरणं ॥ अथ शौचविधिः ॥ जातके मृतके चै
व द्विविधं सूतकं स्मृतं ॥ स्रावः पातः प्रसूतस्य त्रिविधं सूतकं स्य तु ॥ मासत्रये चतुर्थे च गर्भस्य स्राव इष्यते ॥ पातः
स्यात्पंचमे षष्ठे प्रसूतिः सप्तमादिषु ॥ समसंख्यादिनं मातुः स्रावे सूतकमिष्यते ॥ स्नानेनैव तु शुध्यंति
सपिंडाश्चापि पूर्वयोषितः ॥ पाते मातुर्यथाशस्त्रात्तावद्देयदिनं भवेत् ॥ सूतकं तु सपिंडानां पितुश्च त्रिदिनं भवेत् ॥
प्रसूतौ चैव सर्वेषां दशाहं सूतकं भवेत् ॥ क्षयस्य द्वादशाहं च विट्शूद्रयोः पक्षमासके ॥ त्रिदिनं यत्र विप्रा
णां क्षत्राणां स्याच्चतुर्दिनं ॥ वैश्यानां पंचदिनं तत्र शूद्राणां च दिनाष्टकं ॥ नाभिच्छेदनतः पूर्वं जीवं जाते मृ
ते यदि ॥ मातुः पूर्वमतो न्येषां पितुश्च त्रिदिनं समं ॥ मृतस्य प्रसवे चैव नाभिच्छेदनतः परं ॥ मातुः पितुश्च ५८
सर्वेषां जातीनां पूर्वसूतकं ॥ सर्वेषामिति दशाहमित्यर्थः ॥ मृतके मृतकान्ने तुल्यं नाधिकं तस्मात्तकात् ॥

ने च सूतके सूतके न च ॥ शावेन सूतकं शुध्येत्सूतिः शातिसूत्या न शुध्यति ॥ सूतिरिति जातकं शावमिति सू
तकं चेत्यर्थः ॥ न त्वल्पमधिकं जाता छावमल्पं भवेद्यदि ॥ शुध्यते जातके नैव तुल्ये धिक्ये स्वकालतः ॥ जातसू
तकान्न तुल्यं नाधिकं तस्मात्तकात् ॥ शावमल्पं यदि भवेज्जातसूतके नैव शावं शुध्यति तुल्यं वाधिकं वा शावं चे
त्स्वकाले नैव शुध्यतीत्यर्थः ॥ तुल्यं तुल्ये न शुद्धिः स्यादल्पं चैवाधिके तत् ॥ शुद्धिरल्पे नाधिकस्य कस्यचिद्भवेत्तक
दाचन ॥ दशाहे स्त्रमयादर्वाग्द्वितीयं सूतकं यदि ॥ पूर्वेण सूतके नैव द्वितीयं तु विनश्यति ॥ रात्रौ चेत्प्रथमे यामे द्वि
तीयं सूतकं भवेत् ॥ ऊर्ध्वं दिनद्वयं प्रोक्तं धर्मराजादयो पि च ॥ अर्धरात्राद्यधो पि चेत्सूतके तत्रापि दिनद्वयमे
वेत्यर्थः ॥ तृतीये प्रहरे वापि यदि स्यात्सूतकं पुनः ॥ तदा त्रिरात्रमाशौचं सर्वेषामेव निश्चितं ॥ सूतिका या य
थाशौचं तथा चैवाभिदृश्यते तु ॥ मृतस्य च सूतस्यापि पूर्वमाशौचमिष्यते ॥ यावत्सूतकमस्पृश्या माता
प्राक्स्नानतः पिता ॥ सर्वेषां तु सपिंडानामस्पृश्यत्वं न सूतके ॥ यावद्दाशौचमस्पृश्या माता वृत्ते तस्यैव सुताः ॥
सपिंडास्तावदस्पृश्या यावद्यावदस्थिसंचयः ॥ यत्रोपनयनात्पूर्वं पुत्रो यदि विपद्यते ॥ पित्रोस्त्रिदिनमाशौ
चं दशाहाज्जननात्परं ॥ मृतश्चानुपनीतश्चेद्दशाहानांतरं यदि ॥ ब्राह्मणं विष्णुमुद्दिश्य चतुर्थे हनि भोजये

त॥पुत्रइत्यत्रकन्यायाउपलक्षणं॥आदंतजन्मनोनश्येदाचूडान्नैसिशिकीस्मृता॥त्रिरात्रमाव्रतादेशादि
५९ तिभेदस्तुगोत्रिणां॥मरणंकन्यकायाश्चेद्यावद्वर्षत्रयंभवेत्॥सद्यःशुद्धिःसपिंडानांतदूर्ध्वमहरेवतु॥पुत्रिकाशौ
चमापित्रोःत्रिरात्रमितिगम्यते॥निक्षिपेत्तुवितंप्रेतंनदाहोनोदकक्रिया॥ऊर्द्ध्ववार्षिकंप्रेतंनदहेन्नख
नेद्भुवि॥पूर्णेद्विवर्षेप्रेतंदहेदित्यादि॥काश्यपः॥एकाहमपिनूनंस्याद्विवर्षस्यतुवैयदि॥निक्षिपेत्तुवि
तंप्रेतंनदाहोनोदकक्रिया॥असंस्कृतसपिंडानांमरणंश्रूयतेयदि॥नकुर्यात्स्नानमात्रेणचआतिक्रांतेतुसूत
के॥असंस्कृतसपिंडानामित्यनुपनीतज्ञानामित्यर्थः॥पंचत्वंयदिचेद्गच्छेत्सपिंडोह्यसंस्कृतः॥तत्रस्नानेन
शुद्धिस्यादितिप्राहुर्मनीषिणः॥वाग्दानानंतरंयायंयदिकन्याप्रमीयते॥अशौचंत्रिदिनंतत्रपितृपत्न्यो
श्चवैकुले॥कन्याशौचंविवाहोर्ध्वंपितृगोत्रेनविद्यते॥पुनश्चत्रयपर्यंतविवाहात्प्रथमेवहि॥दत्तानारी
पितुर्गेहेसूर्येनाथप्रियेतवै॥अबंधुवर्गमेकेनशुचिस्तज्जनकत्रिभिः॥जनकग्रहणंमातापित्रोश्चस्वसोद
राणामुपलक्षणं॥पित्रोर्गेहाद्दत्तोन्यत्रयदिकन्याप्रमीयते॥तत्रस्यात्पक्षिणीपित्रोर्नान्येषामितिनि ५९
र्णयः॥शावाशौचमतोन्येषांपित्रोःशावेनशुध्यतिपित्रोःशावमथान्येषांपित्रोःशावेनशुध्यति॥

संयावद्देवर्त्ततेपिता॥प्रतिपद्याश्विनेशुक्लेकर्तमात्रेपिमातुले॥दैहित्रकुर्वतेश्राद्धंसपिंडीपार्वणेनच॥व्याघ्रपा
दः॥कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विनेसिते॥सपित्तोपिसपिंडंतुजीवत्यपिचमातुले॥दौहित्रारव्यंतुयच्छ्राद्धं
कश्चिद्देशेप्रचक्षते॥सर्वत्रनायमाचारोवदंतिमुनयोहितत्॥पुत्राभावेपत्न्याभावेपिबहुकर्तृविषयंआचार्यः
पुत्राश्चबहवोयस्यकर्तृराभ्रातृजादयः॥यदिस्युःकेनव्याख्यातापुत्रस्यताचवैक्रियाः॥एकएवतुकुर्वीतप्र
त्यद्देप्रेतकर्मच॥भ्रातृजोज्येष्ठएवापिप्रसुवेबहुकर्तृषु॥गर्गः॥ज्येष्ठश्चैत्तंनिधोनस्यादनुजोवापिसत्क्रिया॥
यस्यातिप्रियतमोयस्यसोपिवाबहुकर्तृषु॥व्याघ्रः॥पुत्रत्वभावोयस्यापिप्रियकारीचपालितः॥सएवकु
र्यात्सत्यद्दमपुत्रस्यचवैक्रिया॥वृद्धशातातपः॥यज्ञोपवीतंविप्राणांस्कंधेनैवचधारयेत्॥गंधादिपिहृजनार्थं
वदेवेत्र्येपित्र्येचकर्मणि॥उपवीतंकटिकृत्वाकुर्यादंगधानुलेपनं॥एकवस्त्रंचयोश्नीयात्तन्निराशाःपितरोगताः॥
ललाटेपुंड्रकंदृष्ट्वास्कंधेमालांतथैवच॥निराशाःपितरोयांतिदृष्ट्वातुवृषलीपतिं॥व्यासः॥आस्यनिमंत्रि
ताविप्राःमाल्याशिरसिधारयेत्॥स्कंधेतुधारयेद्देवंपैत्रकेषुकदाचन॥तुलसीकुसुमपुष्पाणिकेतकीकरवीरयाः॥
जाजीदर्शनमात्रेणनिराशाःपितरोगताः॥अगस्त्यंभृंगिराजंचशतपत्रंश्चचंपकेः॥तिलैश्चतिलपुष्पाणि

दकदानानि कुर्यान्मातृक्रियां ततः॥ पैतृकात्सपिंडीकरणमित्यर्थः॥ मातुर्दशाहमध्ये तु मृतश्चेद्यदि वै पिता॥ पितुर्मरण
६० मारभ्य दशाहं शावकं भवेत्॥ एकमेव पितुश्चाद्यं कुर्यादेकादशेऽहनि॥ ततो वै मातृकं श्राद्धं कुर्याद्वाद्यादिषोडशं॥ अ
वशिष्टं दशाहांतं कृत्वा कर्म विधानतः॥ मातृकं सकलं चैव सपिंडीकरणं च हि॥ ततः कुर्यात्पितुः पुत्रः षोडशं च सपिंडिना॥
तयोः स्यादेककाले वा सपिंडमिति केचन॥ देशांतरे कृते पित्रोः पुत्रेण प्रेतकर्मणि॥ एकस्मिन्नेव काले चेन्मरणं श्रूय
ते तयोः॥ दूरस्थो पाचरेत्पुत्रोप्यशौचमुभयोः समं॥ कुर्यादेकादशाहे तु तयोः श्राद्धं पृथक्पृथक्॥ पितृदशाहमध्ये
चेन्मरणं श्रूयते यदि॥ कृतिक्रियाया मातुश्चेत्पित्रोशौचेन शुध्यति॥ असंस्कृताया मातुश्चेन्मरणं श्रूयते यदि॥ पितु
र्दशादिनादूर्ध्वं मातृकं पक्षिणी भवेत्॥ कृत्वा कृप्रतक्रियामादौ मातुरेवाथवा पितुः॥ मरणं श्रूयते तत्र मातुः क
र्मकथं भवेत्॥ पितुः श्रवणमारभ्य दशावकं भवेत्॥ अशौचानंतरं कुर्यान्मातृकं सकलं सुतः॥ अवशिष्टं च यत्कि
चित्प्रेतकर्माथ वै पितुः॥ कुर्यादाह्निकं यच्छ्राद्धमन्यथाकृतकर्मणः॥ पैतृकं सकलं प्रेतकर्म कृत्वाथ मातृकं॥
अशौचं पक्षिणी मातुः कुर्यात्प्रेतक्रियादिकां॥ देशांतरगते बहुकालः॥ दूरदेशं गते वार्ताजीवतः श्रूयते न चे
त्॥ यदि पूर्ववयस्कस्य यावत्स्याद्दृष्टविंशतिः॥ यथा मध्यवयस्कस्य ह्यब्दा पंचदशैव तु॥ तथापरवयस्कस्य या ६०
वद्द्वादश वत्सरं॥ अत ऊर्ध्वं प्रेतकर्म कार्यं तस्य विधानतः॥ कृत्वा षडब्दं षडब्दं वा प्रायश्चित्तस्य शक्तितः॥ प्रेतकार्ये

कृते यस्य यदि चेत्पुनरागतः॥ घृतकुंभे न संस्नाप्य सर्वौषधिभिरप्यथ॥ संस्कारान्सकलान्कृत्वा मौंजीबंधनमा
चरेत्॥ पूर्वपत्न्या सहैवास्य विवाहः कार्य एव हि॥ अथ द्वादशाब्दादूर्ध्वमवलोकनं॥ दंपतिपुत्रपित्रोश्च स्वसारो
भ्रातरो तथा॥ पितृव्यमातुलौ चैव दौहित्रभागिनेयकौ॥ पुत्रिकापितरौ चैव भगिनीभ्रातरौ तथा॥ द्वादशाब्दे व्यती
ते तु दूरदेशं गते यदि॥ एतेषामेकमेकोपि नान्योन्यमवलोकयेत्॥ इच्छंति केचिदाचार्या अन्योन्यमवलोक
नं॥ शिवालये थवा तीर्थे स्नात्वा प्रज्वाल्य दीपकौ॥ शिवं संपूज्य विधिवद्बहुभोतो देवमध्यतः॥ धृत्वा कांस्यमयं
पात्रं सजलं रत्नपूरितं॥ शांतिदैर्मंत्रघोषैश्च द्विजैश्च अवलोकयेत्॥ अननं चैकमेकस्य दृष्ट्वा सम्यकृत्रि
वंनमेत्॥ ब्राह्मणेभ्यो यथाशक्त्या दद्यात्पात्रं सदक्षिणं॥ अन्येभ्यश्चाथ विप्रेभ्यो यथा वित्तानुसारतः॥ ते
भ्योपि दक्षिणां दत्वा पूजयेच्च पुनः शिवं॥ नत्वा देवं द्विजान्सूर्यमागस्त्यस्य च मंदिरं॥ ततो व्याहृतिभिर्होमं
ज्ञातमष्टोत्तरं तिलैः॥ कृत्वाथ भोजयेद्विप्रान्यथा वित्तानुसारतः॥ बांधवैः सह भुंजीत सर्वारिष्टप्रशांतये॥ इ
त्थं यः कुरुते मर्त्यो तस्यारिष्टं न विद्यते॥ आमुष्का मीनरश्चैतमकृत्वा नावलोकयेत्॥ पूर्वावलोकिकानां तु
विधिरेष उदाहृतः॥ नैवेद्यापूर्वदृष्टानामिति प्राक्कर्मनीषिणः॥ अथानुगमनं॥ प्राणत्यजति या नारी कर्त्ता

रमनुवैमृतं॥तथाएवतथाकुर्यात्पितृवत्प्रेतसत्क्रियां॥अग्निश्चरुस्तथाहोमोत्कपस्छानंतथैवच॥सकृदेवहिकर्त्त
व्योविनापिंडतिलोदकं॥उत्तरीयंशिलापात्रमग्निश्चैवतथाचरुः॥एकएवभवेत्कर्त्तादंपत्योरनुयायिनोः॥नवश्राद्धंस
६३ पिंडंचषोडशादिकमेवच॥तयोःश्राद्धंसुतःकुर्याद्दंपञ्चश्यकृथक्॥ ॥अथमातृविषयं॥सापत्नमातृविषयं
दशाहाच्चबहिष्कृतं॥प्रथमाब्दे व्यतीते वात्रिदिनं चाथपक्षिणी॥यावत्प्रथमाब्दस्त्रिंतमाशौचंतदूर्ध्वंपक्षिणी॥
पुत्रत्यासापत्नमातृविषयंएतत्॥अपिशब्दाद्दत्तीतेत्वेतिरात्रमुक्तं॥तदुपत्नवत्याएवतथाच॥पितृपत्नामपेतायाम
पुत्राभ्यांतुवैयदि॥संवत्सरेव्यतीतेपित्रिरात्रमशुचिर्भवेत्॥पुत्रंस्योपनयनादूर्ध्वंमरणंश्रूयतेयदि॥दशाहास
रतोयावद्दग्धस्यात्त्रिदिनंभवेत्॥पुनर्दाहः॥दशाहात्परतोयस्यपुनर्दाहोभवेद्यदि॥आनेकाब्देपिसर्वेषांत्रिदि
नंसूतकंभवेत्॥पूर्वाशौचंगृहीतानामाशौचंचैवविद्यते॥गृहीतस्यापिवैकर्त्तुस्त्रिदिनंशावकंभवेत्॥पुत्रोयदि
भवेत्कर्त्तापुनर्दहनकर्मणि॥अथप्रकृतंगृहीतंवेद्दशाहंशावकंभवेत्॥केचिद्विशेषमाह॥ग्राहपिपूर्वमाशौ
चंपितुश्चासंकृतस्यतु॥दाहादिपुनराशौचंदशाहमितिकथ्यते॥पुत्राणामिदमाशौचंमन्येषांत्रिदिनंभ
वेत्॥ग्राहिणंतुनवेस्यात्ताकर्त्तुर्वैत्रिदिनंभवेत्॥असपिंडाशौचं॥पुत्रीगृहेयवान्यत्रप्रवृत्तौपितरौयदि॥ ६१
दशाहाभ्यंतरेपुत्र्यास्त्रिरात्रंशावसूतकं॥पित्रोर्दशादिनादूर्ध्वंमरणंदत्तकन्यका॥श्रूयतेयदिचेतस्याप

पित्रोःशावमथान्येषांपित्रोःशावेनशुध्यति॥पित्रोःशावमथान्येषांनैवाशौचेनशुध्यति॥दशाहाभ्यंतरंपि
त्रोर्मरणंश्रूयतेयदि॥अवशिष्टदिनैःशुध्याःपुत्राश्चैवाथगोत्रिणः॥दशाहान्मरणंपित्रोर्बहिश्चेच्छ्रूयतेयदि॥
श्रवणादिदशाहांतुपुत्राणांतद्भवेदथ॥ऊर्ध्वंचज्ञातिमरणंदशाहाच्छ्रूयतेयदि॥सवासाजलमाप्लुत्यस्या
दाशौचंयथोदितं॥मासत्रयेत्रिरात्रंस्यात्षण्मासेपक्षिणीभवेत्॥अहस्तुनवमादर्वाक्ऊर्ध्वंस्नानेनशुध्य
ति॥एकदेशमिदंप्रोक्तमाशौचंपूर्वसूरिभिः॥देशांतरभवेद्यत्रस्नानमात्रेणशुध्यति॥देशांतरलक्षण
माह॥महानद्यंतरंयत्रगिरिर्वाव्यवधायकः॥वाचोयत्रविभिद्यंतेतत्तुदेशांतरंस्मृतं॥त्रिंशद्योजनदूरंवाप्य
स्येकदेशभेदतः॥प्रोक्तंमुनिभिराशौचंसपिंडानामिदंभवेत्॥पुत्रविषये॥पितरौचेन्मृतस्यातांदूरस्थोपिहि
पुत्रकः॥श्रुत्वातद्दिनमारभ्यदशाहंसूतकीभवेत्॥पत्न्याअपितथाशौचंभवेदेवंविनिश्चितं॥पत्न्याशौचंभ
वेद्भर्तुरेवंमुनिरब्रवीत्॥दूरस्थोपिधनंभर्तुर्दशाहाच्छ्रूयतेबहिः॥भार्याकुर्यादघंपूर्णंपत्न्याश्चापिपतिस्तथा॥
मातापित्रोर्यथाशौचंदशाहंक्रियतेसुतैः॥जनकेषपिदंपत्योःस्वार्थेकुर्यात्परात्परं॥पितुर्दशाहमध्येचेन्माता
यदिम्रियतेतदा॥दहनंत्राग्निनापीतनकुर्यादुदकक्रियां॥पैत्रकादूर्ध्वमेवास्यान्माताशौचंतुपक्षिणं॥विधायो

क्षिण्यशौचमिष्यते॥ स्वसंगृहे मृतो भ्राता भ्रातुर्वाथ गृहे स्वसा॥ आशौचं त्रिदिनं तत्र पक्षिण्येवापरत्र तु॥ भगिनीसूत
कं चैव भ्रातुश्चैवाथ सूतकं॥ नैवास्याद्भ्रातृपत्न्यास्तु तथा च भगिनीपतेः॥ मरणं श्रूयते भ्रातुर्दशाहात्परतो यदि॥ दिनमेकं
स्वसुः प्रोक्तं स्नानं स्याद्भगिनीपतेः॥ तस्यैकं दिनमाशौचं तत्पत्न्याः स्नानमुच्यते॥ भगिन्याश्चात्मनः पित्रोर्मातामहस्य त
त्सुतः॥ म्रियेत दत्तकन्यायाः स्नानं तेषां विधीयते॥ अस्यार्थः॥ आत्मनो भगिन्यः मातापित्रोः भगिन्यः मातामहान्
कारान्मातामही तत्सुतः इति मातामहसुतः एते म्रियेत चेद्दत्तकन्यायाः विवाहितायाः स्नानमात्रमेव दत्तकन्यामरणे तेषां
मपि भगिनीत्रय मातामह मातामही मातुलानामपि स्नानमात्रमेवेत्यर्थः॥ अभिप्रायः॥ पितृष्वसृपतिर्मातुष्वसृभ
र्तामृतो यदि॥ दशाहाभ्यंतरे स्नानाच्छुद्धिरूर्ध्वं न किंचन॥ मातामहो मातुलश्च म्रियते नाथ तस्त्रियः॥ दौहित्रो भागिने
यस्तु पितुर्मातुश्च वै स्वसा॥ स्वगृहेष्वहमाशौचं परि तस्यात्तु पक्षिणं॥ श्रुतिं बहिर्दशाहाच्चेत्स्नानेनैव तु शुध्यति॥ स्वगृ
हे इति आशौचेनो गृहे॥ नम्रत्तस्य गृहे॥ जामाता श्वशुरश्वश्रूम्रियते स्वगृहे यदि॥ आशौचं त्रिदिनं तत्र परवेश्मनि पक्षि
णी॥ श्रोत्रियाचार्य शिष्यश्च त्विगुणध्यायायाश्च वै गुरुः॥ मित्रश्चैव सहाध्यायी मृतश्चेत्स्वगृहेष्वहं॥ स्वगृहात्परगृह
मपि॥ गृह्यते परगृहे पक्षिणीत्युक्तत्वात्॥ मरणात्वसपिंडानां दशाहाद्बहिः श्रुते॥ सद्यःस्नानेन शुद्धिः स्यादितिप्रा
हुर्मनीषिणः॥ असपिंडा इति ज्ञातयो न भवंति सपिंडाः॥ तस्यैव यस्य यत्प्रोक्तमाशौचं वान्यगोत्रिणां॥ द्वित्रिवारा
त्रिरेकाच पक्षिणीत्यभिधीयते॥ अहोरात्रमिति प्रोक्तं कौशिकात्यभिधीयते॥ आसाय महरेवस्या त्सद्यस्तु काल

उच्यते॥ एवं विचार्य निर्णीतमाशौचं मुनिभिः स्मृतं॥ आतुरस्नानं॥ आतुरस्नानमुत्पन्ने दशवारमनातुरः॥ स्नात्वास्नात्वा
स्पृशेदेनं ततः शुध्येत् स आतुरः॥ ज्वराभिभूतायानारी रजसा च परिप्लुता॥ कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा॥ चतु
र्थेहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं॥ सा सचेलावगाह्यापः स्पृष्ट्वा स्नायात्पुनः पुनः॥ अंते च वाससां त्यागः ततः शुद्धा भवेत्तु
सा॥ रजस्वलामरणं॥ पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां॥ वस्त्रांतरकृतां कृत्वा तां दहेद्विधिपूर्वकं॥ सूतिका
यां मृतायां तु कथं कुर्वंति याज्ञिकाः॥ कुंभे सलिलमादाय पंचगव्यं तथैव च॥ पुण्याभिरभिमंत्र्यापो वाचा शुद्धिं लभेत
तः॥ तेनापि यित्वा तु दाहं कुर्याद्यथाविधि॥ अन्यपक्षः॥ दशाहाभ्यंतरे चेव म्रियते तत्र सूतिका॥ कथं तस्य भवेच्छुद्धिर्दा
हकर्म कथं भवेत्॥ शूर्पेण स्नापयेद्विप्रो दशवारं ततो जलैः॥ पंचपल्लवसंयुक्ते पंचगव्ये कुशोदकैः॥ कारयित्वा ततः स्ना
नमभिषिंचेत्कुशोदकैः॥ दाहयित्वा विधानेन मंत्रैर्वत्पैतृमेधिकं॥ गर्भिणीमरणं॥ प्रवक्ष्यामि क्रमेणैव शौचं
को हं द्विजन्मनां॥ गर्भिण्यां तु मृतायां तु कथं कुर्वंति मानवाः॥ गर्भिण्या मरणे प्राप्ते षण्मासाभ्यंतरे यदि॥ सहैव द
हनं कुर्याद्गर्भ देवं न कारयेत्॥ प्रेतां श्मशानं नीत्वाथ भर्ता वा पुत्र एव वा॥ छेदयेदूर्ध्वं षण्मासाद्गर्भिण्या मरणं
यदि॥ नाभेरधो वामभागे गर्भच्छेदो विधीयते॥ शनैस्तु छेदयेद्गर्भं पुत्रो वाप्यन्य एव वा॥ गर्भिण्यां तु मृतायां तु
संस्कुर्यादुदकेन तां॥ आपोहिष्ठादिभिर्मंत्रैः प्रोक्ष्य गर्भो समाहिता॥ नीत्वा श्मशानं षण्मासादूर्ध्वं भर्ता विदायते॥
शिशुमादाय जीवंतं दापयेत्स्तनमन्यया॥ यस्तेस्तनं इत्यनया व्याहृत्या गृहमानयेत्॥ उदारं वा तृणं कृत्वा शेष

कृमृते यदि ॥ तस्य दुर्मरणं प्राकुरित्येवं पूर्वकीर्त्तयः ॥ अस्नाताचाप्यकृत्वा च ह्यदत्वान्नं तथा द्विजः ॥ एवं विधस्य विप्रस्य
सर्वदा सूतकं भवेत् ॥ व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा ॥ क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥ व्यसनास
क्तचित्तस्य पराधीनस्य नित्यशः ॥ श्राद्धत्यागविहीनस्य भस्मांतं सूतकं भवेत् ॥ स्वाध्यायजपहोमादिनाशौचं वर्जयेत्स
दा ॥ संध्यां तु मनसा कुर्यादर्घ्यमात्रं समंत्रकं ॥ ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां ॥ नैवाशौचं भवेत्तेषां पितु
श्च मरणं विना ॥ काशीखंडे ॥ सत्रिणां दीक्षितानां च यतीनां ब्रह्मचारिणां ॥ एतेषां सूतकं नास्ति ऋत्विजां कर्म कुर्वतां ॥
जनने मरणे चैव नाशौचं ब्रह्मचारिणां ॥ पित्रोर्मरण एवं स्यादाशौचं ब्रह्मचारिणां ॥ दशवारं निमज्ज्याप्सु प्रतिप्र
णवसंयुतः ॥ पंचगव्येश्च संशोध्य नद्यातीर्यादिकेपि वा ॥ केशवादिश्च संप्रोक्ष्य चतुर्विंशतिनामभिः ॥ हेममौक्ति
करत्नाद्यैः संयुक्तानि च कारयेत् ॥ कृष्णाजिनेन संवेष्ट्य सप्त सूत्रं तु कारयेत् ॥ वेष्टयेत्ताम्रपात्रेण ह्यथवा मृगचर्मणा ॥
सत्कृतानामेतेषामस्थ्नां स्पर्शनदोषस्तु न विद्यते ॥ असंस्कृतानि चास्थीनि निस्पृशेद्ब्राह्मणः क्वचित् ॥ अस्थिनिक्षेपः ॥
यावदस्थि मनुष्याणां गंगातोये च तिष्ठति ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ दशाहाभ्यंतरे वापि गंगायां
स्थापितेयदि ॥ अर्धोदय मृताया वत्ता वपुण्यमवाप्नुयात् ॥ वत्सरात्प्रथमादर्वाक् तत्तीर्थे चोस्थीनि क्षिपेत् ॥ वि
नागंगामयास्थानि द्वितीये दिने निक्षिपेत् ॥ स्नानं कृत्वा ततः स्थाप्य केशवाद्यैश्च नामभिः ॥ प्रक्षाल्य पंचगव्येश्च
पुष्पैश्च समुपार्जयेत् ॥ धेनुं दत्वाथ विप्राय लब्धाज्ञां सुसमाहितः ॥ उद्धरेत्तिलनाम्नानि सुतं कल्पं यथाविधि ॥

६३

८५

अघमर्षणमंत्रेण धर्मायेति नमोस्त्विति ॥ विसर्जयेज्जलेस्थीनि नमो नारायणाय च ॥ अथ गुर्वादिलक्षणं ॥ यज्ञकादी
नि कर्माणि यः करोति यथाविधि ॥ संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ कुलधर्मात्समायातो नरस्य यस्य परस्परं ॥
पुरोहितः स विज्ञेयः सर्वसंस्कारकर्मसु ॥ उपनीय ततो वै शिष्यं तथा चाध्यापयेद्द्विजः ॥ संकल्पं संहरहस्यं च तमाचा
र्यं प्रचक्ष्यते ॥ एकदेशं च वेदस्य वेदांगान्यपि वा दयि ॥ योध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥ अग्न्याधानं पा
कयज्ञमग्निष्टोमादिकान्मखान् ॥ यः करोति वृत्तो यस्य स तस्यर्त्विगिहोच्यते ॥ पिता वै गुरुरित्येवं ततश्चैव पुरोहितः ॥
आचार्यो वेददश्चापि गुरुस्तस्याच्चतुष्टयं ॥ इति अशौचप्रकरणं ॥ अथ श्राद्धविधिरभिधीयते ॥ तत्र कर्तृनियम
माह ॥ दंतधावनमभ्यंगं नखकेशनिकृंतनं ॥ कर्ता कुर्वीत पूर्वेद्युः भोक्ता चैव परेहनि ॥ दंतधावनतांबूलं क्षौरा
भ्यंगमभोजनं ॥ रत्योषधपरान्नं च श्राद्धकर्ता विवर्जयेत् ॥ शुचीन्निमंत्रयेद्विप्रो दैवे त्रीन्विप्रान्पितृकर्मणि ॥ दैवे पित्र्ये
थ वैकैकं सपिंडीकरणं विना ॥ सायमौपासनं कृत्वा स्वयं भुक्त्वा ततो द्विजान् ॥ उपगम्य स्वयं शिष्यः सुतो वाश्रद्धयान्वि
त्र तः ॥ श्राद्धं श्वो भविता तान्वै वद्भिर्दीयतां क्षणः ॥ एवमामंत्र्य नियतांस्तोमनो वाक्कायकर्मभिः ॥ भोक्तुर्भोजयितुश्चैव
ब्रह्मचर्यं मतः परं ॥ श्राद्धाहे वाथ कुर्वीत पूर्वेद्युर्यदि संभवः ॥ परेद्युरथवा प्रातः कुतपे वानिमंत्रयेत् ॥ दत्वा दैवे
क्षणं चाहो पित्र्ये चैवापसव्यतः ॥ स्नात्वा मध्याह्निकीं संध्यां कृत्वाहूय निमंत्रितान् ॥ नतमित्यादिकान्मंत्रान्ब्राह्मणैः
सह संपठेत् ॥ प्रायश्चित्तानि [illegible] तं तु सकृत्तिलोदकं ॥ कुर्याच्छ्राद्धेषु सर्वेषु तीर्थे नैव कदाचन ॥ ब्राह्मणो मं
त्रपूतेश्च हिरण्यकुशोज्जलैः ॥ सर्वमभ्युक्षयेद्देशं ततः शुद्धो दशं शयः ॥ ब्रह्मदंडार्थमादाय हिरण्यं सकुशं तिलान् ॥ र
स च्छ्य

त्रिःप्रदक्षिणमावृत्य समस्तेः तिपठन् द्विजान्। द्रव्यं निवेद्य विप्राणां पुरतोथ स्वशक्तितः॥ तेभ्यश्चैव लभेदाज्ञां मनोवाक्का
यकर्मभिः॥ नत्वा पितरमुद्दिश्य श्राद्धं वामुकसंज्ञकं॥ कर्तुमधिकारो स्तु भवंतोथ ब्रुवंतिति॥ कालश्च मुख्यकालो
स्तु पाकादिनां पवित्रता॥ कर्माणि मंत्रिता [illegible] ष्टा अत्कचुस्त [illegible] तथैव च॥ द्विराचम्य ततः कृत्वा प्राणायामं संकीर्त्य द्वि मथावरेत्
जः॥ संबंधनामगोत्राणि रूपाश्चैवानुवादयेत्॥ एवं सर्वत्र नामादि पूर्वं देवौ संकीर्त्य प्राचीनावीत्यतः परं॥ नामगोत्रं समुच्चार्य तु
रूपं च श्राद्धकर्मणि॥ प्रेतकर्मणि गोत्रादिनाम संकीर्त्य द्विजः॥ संबंधनाम गोत्राणि रूपांश्चैवानुवादयेत्॥ एवं सर्वत्र नामादि
तैलाभ्यंगे जलेपि च॥ संकल्पे वासने पाद्ये पिंडे वाछादने क्षणे॥ अन्ने चावाहने क्षय्ये नामान्येषु समुच्च [illegible] त्॥ पितॄणां त्वेवं वेदे रे
वानामूर्ध्व नहविषा [illegible] तथा॥ सद्यः श्राद्धविधानेन करिष्ये युष्मदाज्ञया॥ देवेक्षणा ततो दद्यात्सव्येनैव तु दैविकं॥ पितॄणामप
पसव्येन सर्वं स्यात्पैतृकं च यत्॥ गोमयेन वकुर्वीत प्रागणे मंडलद्वयं॥ श्राद्धकाले तु विप्राणां पादप्रक्षालनाय च॥ मं
डलं चतुरस्रं स्याद्दैवे प्राग् दशासमिते॥ पिताक्षिपेत्र केवृत तया मध्ये षडंगुलं॥ देवानां मंडले चैव प्रागग्रौ द्वौ कुशौ यवान्॥ गं
धपुष्पाक्षिपे [illegible] पित्र्ये दक्षिणाग्रान् कुशांस्तिलान्॥ मंडलात्पश्चिमे देशे ब्राह्मणा स्वागतं [illegible] ते॥ तत्रैव विसृजेत्पाद्यं क्षालनं मंडले
परि॥ दद्यान्मंत्रं समुच्चार्य दैवे च पितृकर्मणि॥ दत्वा पाद्यं पठेन्मंत्रं शन्नो देवीरभिष्टये॥ पादमूलेपि तु स्थानं पादमध्ये पिता
महः॥ प्रपितामहः पादाग्रे पादप्रक्षालयेत्क्रमात्॥ शीर्षं स्वस्य जलैः सिंचेत्तत्स्थाना द्विनिर्गते॥ दक्षिणा संस्तरे शालकर्तुर्ब्रह्म
णा मुख मीक्षणे॥ कर्त्ताचम्य कुशान्न्यस्मो विसृज्याथ द्विराचमेत्॥ विसृज्जेत्सु द्विजादर्भान् आचम्य स्वस्वमंडले॥ ईशान्यामा
चमेत्कर्त्ता मंडला [illegible] र्मणि॥ देवाश्चैव ततः पूर्वं पितृविप्रास्तथोत्तर॥ दैवकर्मण्युदक् संस्थान् प्राङ्मुखानुपवेशये

श्राद्धक

९४

दाज्येन पूरयेत्॥ मृदभस्म कुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः॥ स्नापयित्वा विधायान्यद्वस्त्रेत च तयादहेत्॥ मृतेप
त्यो दशाहे स्त्री स्पृशते वा रजस्वला॥ भूत्वा शुद्धा यथाकाले स्नात्वा सूत्रं विमोचयेत्॥ सूत्रं मंगलसूत्रमित्यर्थः॥ महान
द्यः॥ गोदावरी भीमरथी कृष्णावेणी सरस्वती॥ तुंगभद्रा सुप्रयोगा कावेरी सप्तनामका॥ दुग्धोदा नलीनारे वाचारि
सीता कलस्वना॥ एता अपि महानद्यः सिंहमूलाद्विनिर्गता॥ अथ पर्वताः॥ श्रीशैलो हिमवान्मेरुमैनाको मल
यस्तथा॥ ऋषभः कुटकोलश्च महेंद्रो द्रोणसंज्ञकः॥ चित्रकूटश्च कूटश्च हेमकूटस्तथैव च॥ गोवर्धनश्च कर्णश्च नील
श्च कुलभस्तथा॥ सह्य विंध्याश्च मर्यादा विख्याताः पर्वता अमी॥ तत्रश्चैव तथा प्रोक्ता ये चान्ये गिरिसंज्ञकाः॥ महानद्यंतरं
यत्र गिरिर्वा व्यवधायकाः इत्युक्तवान्॥ अथ दुर्मरणं॥ विद्युत्तोयाग्निचंडालसर्पपाशद्विजादिभिः॥ दंष्ट्रिव्याघ्रपशुभ्य
मरणं पापकर्मणां॥ आत्मानं घातयेद्यस्तु विषशस्त्रादिनायदि॥ स्वेच्छया मृत्युमाप्नोति स याति नरकं ध्रुवं॥ क्षिपेदस्थी
नि गंगायां चारीरं वाप्यसंस्कृतं॥ नदी धन्यासु वा तीर्थे दुमे तस्य नरस्य च॥ वर्षादूर्ध्वं भवेत्तस्य प्रायश्चित्तं विधानतः॥ ना
रायणबलिं कृत्वा पालाशविधिमाचरेत्॥ प्रेतकर्म ततः कुर्याद्दाहादिसकलं हितम्॥ षोडशादि सपिंडं च ततस्त
स्योपतिष्ठते॥ देशकालभयाद्वापि सद्यः कर्तुमुपक्रमेत्॥ प्रायश्चित्तं हि द्विगुणं विधायाथोर्ध्वदेहिकं॥ मृतस्या
निच्छया सद्यः कर्तव्या प्रेतसत्क्रिया॥ प्रायश्चित्तविधिं कृत्वा नैवेच्छया मृतस्य तु॥ शस्त्रादिना हते सप्तदिनादर्वा

त्॥ उदङ्मुखांस्तथा पित्र्ये प्राक्संस्थाननुपवेशयेत्॥ आपानायम्यसंकल्प्य स्वयं चैवोपविश्य तु॥ ततस्त्रिष्टेत्क रिष्ये इहं प्रक्रांतं श्रा
द्धकर्म च॥ प्राचीनावीत्यपहता इति मंत्रं समुच्चरन्॥ नैर्ऋतीं दिशमारभ्य सर्वदिक्षु क्षिपेत्तिलान्॥ पितृणां पुरतः प्रोक्ष्य मंत्रे
णोदीरितामिति॥ उदक्संस्थं तथा देवगात्र्यत्र्यापो क्षयेदथ॥ संस्मृत्य पुंडरीकाक्षं पाकादि प्रोक्ष्य वारिणा॥ श्राद्धकाले ग
यां ध्यायेत् प्राचीनावीत्यदङ्मुखः॥ उपविष्टः स्वदेशस्थो पाणिदेवानामभिसन्मुखः॥ आसनादि यथाचारः कर्म कुर्यात्तथैव
हि॥ देवानां दक्षिणो दद्यात्कं बलादि कुशासनं॥ पितृणामासनं दद्याद्वामभागे यथोचितं॥ अर्घ्यस्यादासनात्पूर्वं पृच्छा
दावाहनं भवेत्॥ यथाचारस्तथा कुर्यात्तद्भाष्यकारोऽब्रवीदथ॥ विश्वेदेवास इत्यस्य द्विराद्वृत्तिर्भवेदिह॥ विश्वेदेवाः स्थ शृणुतेति
सकृन्मंत्रमुदीरयेत्॥ आगच्छंतु महाभागा विश्वेदेवा महाबलाः॥ ये अत्र विहिताः श्राद्धे सावधाना भवंतु ते॥ अर्घ्यार्थं द्वे स
मासाद्य देवपात्रे यथाविधि ते॥ सौवर्णं राजतं ताम्रं तदभावे थपर्णके॥ अर्घ्यार्थं द्वे प्रकुर्वीत देवपात्रे थपेत्तके॥ त्रीणि वे वार्घ्य
पात्राणि पर्णाभ्यामुभयत्र तु॥ देवे पित्र्ये च पर्णाभ्यामर्घ्यपात्राणि कारयेत्॥ पर्णयोरेकतो मूले कृत्वा तु तानयः क्रमात्॥ प्र
विशंति यथा पात्रे समूलान्यंगुलानि हि॥ मानं स्यादर्घ्यपात्राणां देवे पित्र्ये च कर्मणि॥ देवानामर्घ्यपात्रस्याः चतुरंगु
लविस्तृतं॥ उन्नत्वा च पित्र्ये वृत्तं पेतकं गुलिपंचकं॥ अधः प्रसार्य प्रागग्रौ द्वौ दक्संस्थौ कुशौ च वै॥ द्वौ द्वौ तु तौ बिलस्या ग्र
तामर्घ्यपात्रं तथोपरि॥ गायत्र्या प्रोक्ष्य चोत्तानं कुर्यात्पात्रे च पेतके॥ उपरिस्थाव अधः कार्या वधस्थो नतयोपरि॥ शंनो
देवीति वै मंत्रं सकृदुच्चार्य पूरयेत्॥ प्रतिपात्रे यवोऽसीति मंत्रात्ते निर्वपेद्यवान्॥ गंधपुष्पकुशादीनि प्रक्षिपेदर्घ्यपात्रयोः॥

श्रा

हस्तेहस्तं पिधापयेत्॥ पितृपात्रे प्रसिंचार्घ्यशेषं पात्रद्वयोस्थितं॥ अनक्ति पुत्रकामस्तु मुखमेकैकं तैर्जलैः॥ दत्वार्घ्यं
संस्रवांस्तं पात्रे कृत्वा विधानतः॥ पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥ न्युब्जं पितृपात्रं स्यादासमाप्तेर्न चाल-
येत्॥ उत्तानं चाल्यते येन पिहितं तन्न चालयेत्॥ नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपातितं॥ आवृतास्तत्र तिष्ठंति पितरः शौ-
नकोब्रवीत्॥ उद्धृते यदि तत्पात्रं विवृतं वाथ दा भवेत्॥ अभोज्यं तद्भवेच्छ्राद्धं क्रुद्धैः पितृगणैर्गतैः॥ प्राचीनावीत्यपो
दत्वा पितृपूर्वं तिलैः क्रमात्॥ अर्चये छिरआरभ्य नमो वइति मंत्रतः॥ प्राचीनावीत्यथेदानीं गंधं माल्यं सुधूपकं॥
दीपं वस्त्रं यथाशक्ति देयं वार्यंतरांतरा॥ कुर्वीत भोजनार्थं हि मंडलानि यथाक्रमं॥ दैविके चतुरस्रे तु पित्र्ये वृ-
त्तानि वै यतः॥ क्षिपेद्दैवे यवान् दर्भैः पित्र्ये सकुशांस्तिलान्॥ मंडले दैविके पात्रं सौवर्णं राजतान्यथ॥ तदभावे
तु पर्णानां भाजनानि न्यसेत्तथा॥ आग्नेयादिपरिस्तीर्य पितृपूर्वं तिलोदकैः॥ कुशैस्तिलैर्भस्मनाद्भिर्मध्ये मध्ये
जलेन तु॥ करशुद्धिं ततः कुर्यात्ततो यं मंडले क्षिपेत्॥ दैवे वा यव्यमारभ्य परिषिंचेज्जलेन च॥ कुशैः पात्रं यवे श्वैवभ-
स्मना करशोधन॥ पितृयज्ञवरोर्ध्वमधृत्याभ्युज्य सर्पिषा॥ अग्नौ करिष्यइत्येतान् पृष्ट्वा क्त क्रियतामिति॥
अग्नौ करिष्ये करवै करवाणीति वा पितॄन्॥ क्रियतां तेः कुरुष्वेति कुर्वित्युक्ते यथाक्रमं॥ प्राचीनावीति नैव स्यादनुज्ञा-
वाकृतिद्वयं॥ सोमायेति तु मंत्राभ्यां गृह्याग्नौ जुहुयाद्धविः॥ अग्न्यभावे तु गृह्यस्य जुहुयात्पितृपाणिषु॥ अभ्य-
स्य पितृपात्रेषु हुतशेषं च यद्धुतं॥ कुशै राजन्यगृहीत्वा तु मूर्धानं दिव इत्यृचा॥ देवपूर्वाणि सर्वाणि भाजनान्यभिघा-

रयेत्॥ आमावस्वित्यादिकान्मंत्रान्सूक्तानि च जपेत्स्वयं॥ सव्येनैवोत्ततो न्नादि विधिना परिवेषयेत्॥ अन्नं च पायसं भ
क्ष्यं घृतं च व्यंजनादिकं॥ स्रूप मंत्रे प्रदातव्यं सर्वस्योद्धव पूर्वकं॥ कर्तुर्दक्षिणतो दैवे पायसादि तु वेषयेत्॥ त
था वामतः स्वस्य पैत्रके परिवेषयेत्॥ पितृणां भाजनस्थेषु प्राचीनावीतिनत्यथ॥ अन्नेषु परिविष्टेषु कुर्तत्रोपं
स्रात्यथ॥ देवपात्रस्थितं चान्नं गायत्र्या चाभिमंत्रयेत्॥ उद्दिश्य चान्नं विश्वेभ्यो दास्यमानमथापि वा॥ द
त्वा जपेत्ततो मंत्रं ये देवासो दिवीत्यृथ॥ पितृभ्यो पितथा दत्वा ये चेह इति जपेदथ॥ तिष्ठं कुर्यादुपस्थानं देवता ने
भ्य इति क्रमात्॥ नमः दृत्यादिभिर्मंत्रैः सव्येनैव द्विजस्तुतिः॥ तिथिवारादिकान्स्मृत्वा गृहीत्वा सतिलं जलं॥
पितॄन्देवान्समुद्दिश्य क्रियमाणेन वै मया॥ श्राद्धेनैव पितुश्चास्मात् पितॄणां चैव मे वहि॥ ब्रह्मलोकनिवासि
त्वनि नयेत्सतिलं जलं॥ ब्राह्मणैः प्रोक्ष्य यित्वान्नं गायत्रीं समुदीरयेत्॥ परिषेचनमन्त्रस्य कारयेद्धूवपूर्वकं॥
चित्रगुप्तबलिं चैव न दद्या श्राद्धभुं द्विजः॥ अन्नं न वाथ वाज्येन जले नान्येन वापि च॥ सकृद्धुत्वा मगायत्रीं
मित्राद्विषु वेवे मधु॥ भाजनेष्वपसव्येन दद्यात्सव्येन दैविके॥ तथैवापोशनार्थं हि पित्रादि द्विजपाणिषु॥
निनयेत्सुजलं चाथ सव्येनैव तु दैविके॥ तिष्ठन्नेव स्मरेत्यादानै शाना दैष्णुदक्षं स्तः॥ तत्सह वामतं चास्तु
जुषध्वं हि यथासुखं॥ उक्तो मृतोपस्तरणमसि स्वाहापि विवेदया॥ वाग्यतो भोजनं कुर्युर्लब्धं यच्च यथारुचि॥
र भुंजानां श्रावयेद्विप्रान्राक्षोघ्नान्पितृलिंगकान्॥ पुरा पापपवित्राणि ऋचो ... पितृस्तुताः॥ यावदुष्णं

स्वरूणः पितृपिंडस्याप्रजापतिः पितामहे॥ प्रपितामहपिंडेग्निरिक्षेताः पिंडदेवताः॥

भ्यस्त्वां स्वेतिना मादिमंत्राभ्यां तैलमंजनं॥ दद्याद्दशामथैतद्वइति पिंडेष्वतः परं॥ दद्यात्पिंडे बहुलोमानि प्रकोष्ठानि यानि
६७ च॥ पंचाशद्वर्षादूर्ध्वमर्वाङ्नैवेति हृत्तिकृत॥ दत्वापिंडत्रयं याथ सव्ये नैवमुद्रजयेत॥ गंधपुष्पादिकैश्चैव पिंडाधिष्ठा
देवताः॥ यत्किंचित्पक्वन्नं गेहे भक्ष्य भोज्यादिकं च यत्॥ अनिवेद्य न भोक्तव्यं पिंडेभ्योपि कदाचन॥ नमोवइत्युपस्थाय मनो
न्विति लक्षेनव॥ पवाल मति मंत्रेण पिंडांस्तान्प्रवाहयेत॥ औपासनादिकं गच्छेज्जपेदस्मे ममिच्छं॥ यदंतरिक्षमे तुमन्त्रं नां
से तमं जपद्दवं॥ तिथिवारादिकानुक्त्वा पितृनुर्वं बहुच्चरेत॥ पितॄणां ब्रह्मलोका स्तुइत्युक्ता निनयज्जलं॥ आचांतानीत्वो
ध्यर्थं पापीन्प्रक्षालयेद्दथ॥ मध्ये मध्ये जलं चैव दद्याद्दक्षकुशाक्षतान॥ पुनर्दयं जलं देवपितॄणामपसव्यतः॥ ज
लं दद्यात्तिलान्दर्भा नक्षतान्पूर्ववज्जलं॥ दृष्ट्वा भुक्तवतोस्मद्भ्रातापि समभिवादयेत॥ प्रत्यक्षुल्ले ततो विप्रानपि था
त्व प्रसादास्त्वित्यथ॥ पितृप्रसादतलिब्धान्संगृह्य स्वयमक्षतान्॥ धारयेच्छिरसि स्वस्य स्वगोत्रस्याभिवृद्धये॥ चाल
यित्वाथ पात्राणि स्वस्तीत्यथ समुच्चरेत॥ दद्याद्दक्षय्यमुदकं दैवे पित्र्ये यथाक्रमं॥ अन्नप्रकिरणं केचिद्दैवे वदंति सू
न रयः॥ पात्रस्थानेषु सर्वेषु यथाचारो भवेदिह॥ अन्नप्रकिरणार्थं यत्तदानीयजलप्लुतं॥ आचांतानां समीपेषु ह्यन्नतः
प्रकिरेद्भुवि॥ असंस्कृतेन मंत्रेण पितॄणां प्रकिरेद्भुवि॥ असोमपाश्च मंत्रेण देवानां प्रकिरेद्भुवि॥ उत्तानं प्रथमं पात्रं कृत्वा
यज्ञोपवीत्यथ॥ दत्वाच दक्षिणां शक्त्या विसृजेद्दोस्तु धोच्यते॥ अवशिष्टं तु यत्किंचिदर्घ्ये पात्रस्थितं जलं॥ पिंडानां पुरतः
सिंचेद्दास्वधोच्यतामित्यथ॥ अनुज्ञया तु विप्राणां ततः पिंडान्समुद्धरेत॥ ऊर्जं वहंतीरित्यादिभिर्मंत्रैः पिंडस्थाने जलं क्षि ६७
ये पेत्॥ स्वस्ति॥ त्युच्चारेत्कर्ता ब्राह्मणैः शोभनं हविः॥ ततो विसर्जयेच्छ्राद्धे वाजे वाजे वतेत्यृचा॥ उत्तिष्ठंतिति वा मासंस्पृश्य

विप्रस्यवैपितुः॥ सहैव पितरो देवैः संस्थानं गंतुमुच्यते॥ आमावाजस्य प्रसव इति मंत्रं समुच्चरन्॥ त्रिःप्रदक्षिणमावृत्य मंडलस्था
न्द्विजानथ॥ पवित्रग्रंथिमुत्सृज्य मंडले विसृजेज्जलं॥ दक्षिणाभिमुखस्तिष्ठन्याचेतमानूवरान्पितॄन्॥ दातारो नोभिव
त र्धंतां वेदाः संततिरेव नः श्रद्धा च नो मा व्यगमद्बहु देयं च नोस्त्विति॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि॥ याचितारः
श्च नः संतु मा च याचिष्म कंचन॥ याचितारप्रतिब्रूयुस्तथैवास्त्विति ते द्विजाः॥ स्वादुषंसदस्येतो श्राद्धकर्ता पठेदथ॥ अ द
क्षतान्प्रक्षिपेत्स्या दृषिहे वसंतयेत्य्चा॥ लभेदथाशिषस्तेभ्यः संतुष्टेभ्यो यथारुचि॥ आयुः प्रज्ञां धनं विद्यां स्वर्गं
मोक्षं सुखानि च॥ प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः॥ घृतेनाभ्यज्य वैपादान्विप्राणां क्षालयेनेद्य॥ मर्दयेद्भक्ति
भावेन तत्श्चैव विवादयेत॥ अद्यमे सफलं जन्म भवत्पादाब्जवंदनात्॥ अद्यमेवंशजाः सर्वे याता वो नुग्रहाद्दिवं॥ पत्रशा
कादिदानेन क्लेशिता यूयमीदृशाः॥ तत्क्लेशजातं चित्ते तु विस्मृत्य क्षंतुमर्हथ॥ वशिष्ठ सदृशाः विप्राः सूर्य प्रवेस
मातिथिः॥ आसनादे नमस्कारो भवद्वन्तत्कार एव च॥ यस्य स्मृत्याच नामोक्त्या तपो यज्ञक्रियादिषु॥ न्यूनं संपूर्णतां या
ति सद्यो वंदे तमच्युत। मंत्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः॥ श्राद्धं संपूर्णतां याति प्रसादाद्भवतां मम॥ जप
न्मंत्रं वसिष्ठासो देवान्वसिष्ठ इत्यथ॥ इडा पितृभ्य इत्येतामुच्चैर्गाथां पठेदथ॥ क्षमध्वं भो द्विजन्मानः पितृयज्ञेस्मा द्यैव
कृतान्तु संपूजेपा नीद्यासीमात मनुब्रजेत॥ ध्रियते चेत्पिता यस्य विद्यमाने पितामहे॥ पैतृकादिषु नामानि कथमेव उ
रेदिति॥ द्विवार पितृनामेव पैतृकादिषु वैयतः॥ प्रपितामहनामस्यादेकवारमिती हतु॥ अनेन विधिना श्राद्धं कुर्यात्सजी
व पितामहः॥ स्यात्पिंडद्वयं पित्रे चाथैकं प्रपितामहे॥ ॥ इति श्रीनारायणभट्ट विरचितायां धर्मप्रवृत्तौ श्राद्धप्रकरणं समाप्तं॥

अथ श्राद्धोपयोगि वचनानि लिख्यंते ॥ प्रत्यब्दं विधिना पित्रोः श्राद्धं कृत्वा द्विजोत्तमः । कुर्यात्तं च महायज्ञानिति यज्ञविदो विदुः ॥
पित्रोः प्रत्यब्दं कृत्वा श्राद्धं विधिवत् समाप्य च ॥ कार्याः पंच महायज्ञा नित्या इति शाकलायनः ॥ दद्याद्विसर्जितान् पिंडान् गुरवे द
क्षिणान्वितान् ॥ तदभावे न्यथान्यस्मै विप्राय वाप्सु वा क्षिपेत् ॥ पिंडांस्तु गोद्विजेभ्यो वै दद्यादग्नौ जले पि वा ॥ प्रक्षिपेत्सत्सु
विप्रेषु द्विजोच्छिष्टं निमज्जयेत् ॥ पात्राणि चाल येच्छ्राद्धे स्वयं शिष्योथवा सुतः ॥ न च स्त्री भिन्नि बालो वा न चान्येन क
दाचन ॥ मद्याग्निजविप्रेभ्यो जले नेतु निक्षिपेत् ॥ विकिरं तु द्विजोच्छिष्टं भूमौ स्वालालु निक्षिपेत् ॥ संकल्पादौ यदा शौ
चे पिंडदाने विसर्जने ॥ अर्चनांते च विकिरे मंत्रमानं भवेदिह ॥ संकल्पादौ तु यद्भीत्याज्या विप्राघ्रिशोधने ॥ अर्चनादौ
तायेत्याज्या श्राद्धविसर्जने ॥ विसर्गश्चलकश्चैव विकिरे पंक्तिचारिणं ॥ करशुद्धिरपोशानं पितृपर्वणि षट् सदा ॥ स्वा
गते स्वस्तिवचने गोत्रे शेषे प्रदक्षिणे ॥ अर्घ्ये च दक्षिणादाने षट्सु सव्यं विधीयते ॥ आवाहने च पिंडे च श्राद्धानुवाद
ने क्षणे ॥ अन्नाच्छादनपादेषु नामान्यक्षय्यतुच्चरेत् ॥ आवाहनासने पाद्ये धूपे चन्नदाने तथैव च ॥ अक्षय्ये पिंडदाने च ना
सामान्येषु समुच्चरेत् ॥ अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा ॥ पिंडदाने चतुर्थी स्याच्छेषाः संबुध्ययः स्मृताः ॥ अन्न
दाने विशेषस्यादादौ संबुद्धिरुच्यते ॥ प्रथमाद्या चतुर्थिश्च यथा लिंगविभक्तिकः ॥ घृतलपाद शौचं चैव विष्टरे नोपवेसन ॥
मंत्रस्याहतयांजुष्ठ वर्जयेदाश्वलायनः ॥ अन्नस्यहि चतुर्भागं पिंडानां परिसेचनं ॥ बहुचानो बकुर्वीत पिंडपात्रम भोक्तु
मुख ॥ दीयमानं तु यच्चान्नं गायत्र्याभ्याक्ष्य वारिणी ॥ स्वाच्छाद्ये निधायान्नमन्नस्यापरिवेकुशान् ॥ परिविष्टं च य
द्यास्यमंगुष्ठेन द्विजस्य तु ॥ स्पर्शयेत्काञ्छितंतिलं तोयं श्राद्धे प्रकल्पयेत् ॥ अन्नादि सकलं देयविराजं देवपूर्वकं ॥

हविर्गुणा न वक्तव्याः पितरो यावतर्पिताः ॥ पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ॥

२किंचित्

भवत्यन्नं यावद्भुंजी तवाग्यतः ॥ पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणाः ॥ भोजनस्य तु पर्याप्तं किंचिद्देयं ततो धिकं ॥
यद्यद्भुक्तं ततः किंचिदुच्छिष्टभागिनो ॥ इच्छातस्तेषु विप्रेषु गायत्रीं समुदीरयेत् ॥ तृप्ताः स्थ इति तान् पृष्ट्वा देवांश्राद्ध पितॄ
नपि ॥ तेषु श्रावयेच्छ्रोमधुवाता ऋतायते ॥ अश्नन्निति वचनान् विप्रान् संपन्नमिति पृच्छत ॥ क्रियतामन्नशेषं कि
तेचेष्टैः सहभुंजतो ॥ तदा स्वीकं सर्वमाकिंचिकिंचित्कृतं चयत् ॥ सार्ववर्णिकमन्नाद्य मानीयाप्लाव्य वारिणा ॥ स
मुत्सृजेद्भुक्तवतामग्रतः प्रकिरेद्भुवि ॥ पुरतश्चति तानुदर्भान् प्रोक्षयेत्पितृभाजनात् ॥ ये अग्निदग्धा मंत्रेणतु व्य
न्नं प्रकिरेदथ ॥ यजमानकुले जाता इति मंत्रं समुच्चरन् ॥ भुक्तशेषं त्यजेद्भूमौ ब्राह्मणाः स्वस्य दक्षिणे ॥ मापान्नं पा
यसं चान्नं भक्ष्य भोज्यादि कं च यत् ॥ यद्यद्भुक्तं द्विजैः श्राद्धे सर्वं पिंडार्थमुद्धरेत् ॥ मापाः सर्वत्र वै ग्राह्या देवे पित्र्ये
च कर्मणि ॥ प्रेतपिंडे चनग्राह्याइत्येवं कौशिको ब्रवीत् ॥ उत्तराचमनात्पूर्वं पिंडदानं भवेदिह ॥ पश्चाद्धापिवदंत्यन्ये केचि
त्तत्त्वविदो जनाः ॥ पिंडदानमनाचांतेष्वाचांतेष्वथ वा भवेत् ॥ अभोनि नयना यंत पितृयज्ञं समापयेत् ॥ सन्निधौ वे च गृह्या
ग्निरथवाच्छिष्टसंनिधौ ॥ पिंडदानं भवेत्तत्र दृष्टिकारवचो यथा ॥ अर्वाग्गस्मालिखे न्नेतां नाम पहताइति ॥ अस्यु स्वतामवस्तीयक्ष्य
र्यस क दाछिन्नं हि षा ॥ लेखया पिंड दद्यात्तुष्णुधं ताभितितु त्रिति ॥ पितृनामा नजानीयात्तत त्यादिवदंक्रमात् ॥ नि तान
पितर इति तानतुमंत्र्य तु ॥ अप्रदक्षिणमावृत्य हक्रदकू प्राणान्नियम्य च ॥ अभ्यावृत्यामंत्र्य मीहंतत्य मं त्रतः ॥ चरुशेषं
षमवघ्रायनिनयेत्स्वे वेज्जले ॥ आघ्रायाथ चरोः शेषमाचमेदुपवीतिकः ॥ निनयेदपसव्येन शुंधतामित्यपाथ वै ॥ अ

यद्यद्भुक्तं ततः किंचित् किंचित् पिंडार्थमुद्धरेत् ॥ पितृयज्ञे चरोरन्नमुद्धृतं प्रक्षिपेदथ ॥ १ ॥
तत्र पिंडत्रयं दद्यात्सराचीनेनपाणिना ॥ पिता इमध्यमेतनोक्षिपेद्दोक्तैमंत्रतः ॥ २ ॥

उक्तोयं मुनिभिः श्राद्धे विधिर्वाजसनेयिनां॥ प्रेतकार्येषु सर्वेषु सपिंडीकरणे तथा॥ पार्वणे वस्तु सर्वे रंभादयन्यत्रादौ प्रोक्त
रेषिवा॥ क्रतुदक्षौ वसुसत्यौ कामकालौ धनुर्धरौ॥ पुरूर्वाद्रवसौ वावेति विश्वेदेवास्मृतादश॥ यज्ञे देवौ क्रतुदक्षौ बुध्या
सत्यवसुस्मृतौ॥ सपिंड्यां कामकालौ तु तीर्थे चैव धनुर्धरौ॥ पुरूर्वाद्रववोश्चैव प्रत्यब्दे चैव पार्वणे॥ अन्यथा कुरुते
यस्तु श्राद्धं तस्य वृथा भवेत्॥ विभक्तिलिंगानज्ञात्वा श्राद्धे संकल्पमाचरेत्॥ हव्यं देवा नगृह्णंति कव्यं च पितरस्तथा॥
भुंक्तयः श्राद्धकन्मार्यायदि पक्ता द्विजन्मनां॥ सयाति नरकं घोरं पितृभिः सह मज्जति॥ अज्ञानात्कुरुते श्राद्धं योभि
श्रवणवर्जितं॥ श्राद्धं हंता भवेत्कर्ता निराशाः पितरो गताः॥ ब्राह्मणेभ्योक्षतान्लब्ध्वा आशीर्वचनसंस्तुतं॥ धारयेच्छिरसि
स्वस्य श्राद्धे न प्रेतकर्मसु॥ द्वाभ्यामेव वृहत्पर्णाभ्यां मर्घ्यपात्राणि पैतृके॥ सपिंडीकरणे प्रेतकार्ये छेकेन चैव हि॥ श्राद्धे प्रत्य
ब्दिके पूर्वं तर्पणं क्रियते यदि॥ पितरस्तेन तृप्यंति ततोन्नं नलभंतिते॥ नित्यं कर्म कथं श्राद्धे कारुण्यानां यदाब्दिके॥ अब्दि
का तर्पणं पूर्वं कुर्याछ्राद्धमतः परं॥ कारुण्यकन्यपायेन वैश्वदेवमतः परं॥ धर्मज्ञैर्विधिरुक्तोयं मातृके पैतृके नर॥ ऊ
र्ध्वपुंड्रं त्रिपुंड्रं वा ललाटे यस्य दृश्यते॥ कुर्दुश्चैवाथवा भुंक्तुं निराशाः पितरो गताः॥ रंगवल्या कृतारस्वांस्कंधे माला द्विज
स्य च॥ ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः॥ तुलसी बिल्वपत्रं च रक्तपुष्पाणि केतकी॥ जाजीदर्शनमात्रेण निराशाः
पितरो गताः॥ घटानादव्यवाद्यं च हुंकारहास्यरोदने॥ अवाच्यवचनश्रुत्वा निराशाः पितरो गताः॥ पितृहा मंत्रहीनेष्टं त्यसमुद्ध
त्यकृताशनात्॥ शेषं महानसे कृत्वा तत्र पाकं समाचरेत्॥ यदि स्याल्लौकिके पाके स्तुतोन्नं तत्र हूयते॥ शालाग्नौ यदि
चेदन्ने होमं तत्र न कारयेत्॥ होम इति [illegible] वैश्वदेवः॥ श्राद्धे वस्त्रादिकं चैव विप्रेभ्यो दीयते तथा॥ पिंडेभ्यो पितृतथा दद्या

दन्यथानिष्फलं भवेत्॥ पितृयज्ञविधानेन श्राद्धपाकपरिक्रिया॥ गृह्याग्नौ स्यात्क्षपादत्वात्तद्धोमश्चं न विद्यते॥ कर्मप्रा
रब्धमारभ्य भवेद्यावद्द्विसर्जनं॥ यदि स्यात्सूतकं मध्ये त्वासीमांतं न सूतकं॥ सूतकात्प्राक् समारब्धं कुर्याछ्राद्धीयमं बहिः॥
असमाप्ते न दोषः स्यादन्यकर्मसु सूतकं॥ स्नात्वा कुर्वीत तत्पाकं श्राद्धे पत्नी विधानतः॥ पुनस्नायात तस्यैव धारयेदन्यदंबरं॥ सं
सृष्टं भ्रातृभियुक्तो ज्येष्ठः कुर्यात्समंत्रकं॥ सकलं पैतृकं पित्रोरनुज्ञास्यत दाज्ञकः॥ तिथिवारानुस्मृत्वा पितृच्छुद्दिश्य वै त
तः॥ सज्येष्ठाः अनुजाः सर्वे निनयेयुस्तिलोदकं॥ संसृष्टेषु गतेज्येष्ठो वहिःश्राद्धं कनीयसा॥ न कार्यमाज्ञया कर्ममि
त्याहुः केपि संकटे॥ आज्ञया क्रियमाणे तु ज्येष्ठश्चेन्मध्य आगतः॥ ज्येष्ठः कुर्याच्चितच्छेषं पिंडदानादिकं च यत्॥ पिंडदा
नमघो ज्येष्ठे क्रियमाणे तु कर्मणि॥ कनिष्ठाश्चागताः पिंडे निनयेयुस्तिलोदकं॥ क्रियते यस्य वै श्राद्धमज्ञातिः कस्यचिद्यदि॥
निमंत्रयेन्न तु ज्ञातिं न ज्ञातिः सस्य चान्नतु॥ यत्र वै पच्यते पाकं पृहद्शालान्वितं गृहे॥ सांगणं पितरस्तस्य विकिरंतिह्य
कुत्सिते॥ मंत्रानुच्चार्य कर्ते चेच्छ्राद्धकर्म समाचरेत्॥ नैवोच्चारे द्विजो भोक्ता वृथा स्यादुत्तरे यदि॥ न जपेयुर्द्विजामंत्रान्
भोक्तारः श्राद्धकर्मणि॥ स्वादोः स्वकं जपं यस्ते न तत्त्वयमदव्यनं॥ अथ समस्तपित्रर्चनविधिः॥ देवानादौ समभ्य
र्च्य पितृवर्गमथार्चयेत्॥ मातृवर्गं ततो माता महादेश्च यथाक्रमं॥ पितृवर्गं मातृवर्गं वर्गं मातामहस्य च॥ एवं नैयिता
यकारुण्यानवर्ये योरिति शौनकः॥ अन्यपक्षः॥ देवानभ्यर्च्य पित्रादिवर्गं वर्गं समार्चयेत्॥ तीर्थे महालये चैव द्वि
लाद्वादशदैवत॥ पितृवर्गं तथा मातुर्वर्गं मातामहस्य च॥ पत्न्यादेर्वर्गस्य नामानुच्चारयेत्क्रमात्॥ संकल्पे वि
धिरेषः स्यात्तथानुवाचने॥ तीर्थे महालये चैवमर्चयनं स्यात्पृथक्पृथक्॥ स्वस्याशक्तविषये तु॥ रोगादिना

यथाश्राद्धं स्वयंकर्तुमशक्यते॥ ऋत्विजेन बाह्यशिष्येण ज्ञातिना वापि कारयेत्॥ एकादसीश्राद्धभोजनं॥ कौशिकः
श्राद्धं कृत्वा तु यो विप्रो मोहादुपवसेद्यदि॥ राक्षसं भवति श्राद्धं सोपि गच्छेदधोगतिं॥ एकादस्यां यदा श्राद्धं भवेद्य
दि कथं च हि॥ कृत्वा तु भवसेच्छ्राद्धं विधुरो विधवापि च॥ श्राद्धं कृत्वा गृहस्थो वै नैव कुर्यादुपोषितं॥ पितृशेषसमर्थ्य
यादेकादस्यान्न दुष्यति॥ होमोहादुपवसेच्छ्राद्धं कृत्वा वै हरिवासरे॥ समृद्धा नरकं यान्ति पितृभिः सह मज्जति॥
एतत्स्मार्त्तविषयं॥ ॥ वैष्णवविषयकं एवः॥ एकादस्यां यदा श्राद्धं प्रत्यब्दं यदि वाप्यपि॥ कार्यमेव हितं छ्राद्धंचोप
वासः कथं भवेत्॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्॥ कृत्वात्पवसेच्छ्राद्धं शेषमाघ्राय वैचरेः॥ स्कांदे
तएवोपवसेयुश्चैवेद्वैष्णवा हरिवासरे॥ कृत्वा तु विधिना श्राद्धमाघ्राय पितृसेवितं॥ श्राद्धं कृत्वा समाघ्राय पितृशेष
विधानतः॥ उपवासं ततः कुर्यात्केचिदेवं विदुर्बुधाः॥ न्ययागतं धनं तद्दत्तं ज्ञाननिष्ठे तिथिप्रियः॥ श्राद्धं कृत्सत्यवादीत्व
गृहस्थोपि विमुच्यते॥ पितृयज्ञात्परो धर्मो पितृयज्ञात्परंतपः॥ पितृयज्ञात्परं कर्म नचैवास्तीह भूतले॥ एकादश्यां यदा
रामश्राद्धं नैमित्तिकं भवेत्॥ तद्दिने तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्॥ ये कुर्वन्ति महीपाल श्राद्धं त्वेकादसीदिने॥ त्र
यस्ते नरकं यान्ति दाता भोक्ता परेतकः॥ **इति श्राद्धपद्धतिः समाप्ता॥** अथ दानविधिः॥ तत्र तावद्दानप्रशंसामाह
श्रुतिः॥ दक्षिणावतामिदिमानि चित्रेति॥ उच्चादिवि दक्षिणावंतो अस्थुरिति॥ तस्माद्दानं परमं वदंति॥ इत्यादीनि व
चनानि॥ तथा च याज्ञवल्क्यः॥ देशकाल उपायेन द्रव्यं यत्तु श्रद्धया समन्वितं॥ पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणं॥ न

विद्ययाकेवलयातपसाकेवलेनहि ।। विद्यातपोभ्यांयुक्तंयत्तद्धिपात्रंप्रचक्षते ।। पात्रेदत्तंतुयत्किंचिच्छुचिर्भूत्वासमाहि
तः ।। ज्ञेयंतत्सर्वमक्षय्यंमहादानादिकंचयत् । ददातिप्रत्ययंयस्तुहिरण्यादिकमेवच ।। भुक्ताभोगान्यथाकामानुसाश्नुते
पदमव्ययं ।। हिरण्यमन्नमुदकंफलपुष्पादिकंचयत् ।। यत्किंचिल्लभ्यतेह देयंयथावित्तानुसारतः ।। दानेनैमित्तिकेदद्यात्सुसं
कल्प्ययथाविधि ।। नित्यदानेतुनैवस्यात्संकल्प्यादिफलादिके ।। सर्वत्रप्राङ्मुखोदातागृहीतास्यादुदङ्मुखः ।। सज
लंदक्षिणायुक्तंदद्याद्विप्रकरेसदा ।। वित्तंविप्रकरेदानंसद्यःशतगुणंभवेत् ।। आलस्यादथवालोभान्निष्फलंस्याद्दि
नात्परे ।। यच्चसंकल्पितंद्रव्यंतद्दिनेचेन्नदीयते ।। द्विगुणंस्याद्द्वितीयेह्नित्रितीयेत्रिगुणंभवेत् ।। अथगोदाने ।। गवाम
गेषुतिष्ठंतिभुवनानिचतुर्दश ।। यस्मात्तस्माच्छिवंमेस्यादतःशांतिंप्रयच्छमे ।। कपिलेसर्वदेवानांपूजनीयासिरोहिणी ।।
तीर्थदाभूतमेनित्यमतःशांतिंप्रयच्छमे ।। कल्पवैधेनुनमस्तुभ्यंब्रह्मविष्णुशिवात्मके ।। जन्मप्रभृतिपापानिकृत्स्नानिनश
यमेसदा ।। अथभूदाने ।। सर्वेषामाश्रयाभूमिर्वराहेणसमुद्धृता ।। अनंतसस्यफलदाअतःशांतिंप्रयच्छमे ।। यस्यांरोहिं
तिबीजानिकालेनैवमहीतले ।। तत्प्रसादाच्चसकलाममसंतुमनोरथाः ।। दात्तान्यन्यानिसर्वाणिकनकादीनियानि
च ।। तानिभूमिप्रदानेनकलांनार्हंतिषोडशीं ।। तिलदाने ।। महर्षेर्मंत्रसंभूताःकस्यपस्यतिलाःस्मृताः ।। तस्मात्तिल
प्रदानेनममपापंव्यपोहतु ।। हिरण्यदाने ।। हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ।। अनंतपुण्यफलदम
तःशांतिंप्रयच्छमे ।। आज्यदाने ।। कामधेनोःसमुद्भूतंसर्वयज्ञेषुसाधनं ।। देवानामाज्यमाहारमतःशांतिंप्रय
च्छमे ।। वस्त्रदानं सीतवातोष्णसंत्राणंलज्जायारक्षणंतथा ।। देहालंकरणंवस्त्रमतःशांतिंप्रयच्छमे ।। पीतांब ८०

नोरथाः॥ गोवर्धनगिरेर्भूरिः समये हरिरक्षिताः॥ चणकाः सर्वपापघ्नाः मम शांतिं०॥ अग्निगर्भाः ज्ञेयाः सौम्या बलारोग्य
यशःप्रदाः॥ कुलित्थाः सर्वपापघ्नाः मम शांतिं०॥ निष्पावा निर्मिताः पूर्वं लोकानां चहितायवै॥ दानेनानेन मे यस्मात्ततः शां
तिं० पूर्वं मे चहियज्ञार्थं ब्रह्मणा निर्मिताः पुरा॥ अनेन यवदानेन शांतिरस्तु॥ प्रियंगवः प्रिया यस्माद्देवानां वै यज्ञसाध
नाः॥ तस्मात्प्रियंगुदानेन शांतिरस्तु॥ श्यामाकास्तु सदा पुण्या निर्मिता ब्रह्मणा पुरा॥ दानेनानेन वै यस्माद्ततः शांति॥०
कोद्रवा निर्मिता देवैः प्राणिनां च हितायवै॥ यस्मात्तेषां प्रदानेन शांतिरस्तु॥ मस्तरा पुष्टिदा लोके ब्रह्मणा निर्मिता हि
ताः॥ तस्मादेषां प्रदानेन शांतिरस्तु०॥ वनविध्वंसकाल्लिंका बलदारोगनाशनाः॥ सर्वेतिलकाद्दानेन सर्वदास्ते प्रदोम
म॥ इति नानाधान्यादिदानं॥ अथान्नदानं॥ अन्नं ब्रह्ममयं साक्षाल्लोकानां प्राणरक्षणं॥ अन्नदाने नवै कामान्
भुक्त्वा सायुज्यमाप्नुयात्॥ जल॥ जलं ब्रह्ममयं नित्यं जीवनं सर्वकारणं॥ जलदाने नवै यस्माद्वांछितं फलदायकं॥
सूर्यमंडलसंभूता सर्वमंगलदायकं॥ मंटक्याः सर्वदोषघ्नाः अतः शांतिं० नैलौनिसमुद्भूतं विष्णोस्तुष्टिकरं परं॥ नव
नीतप्रदास्यामि प्रीतिं मे देहि सर्वदा॥ प्राणिनां जीवनं क्षीरं पितृदेवप्रियं सदा॥ कांतिकं मेदं पुष्टिदं नित्यमतः शांतिं०
दधिक्षीरोद्भवं देवपितृणां तृप्तिकारकं॥ अतस्तत्प्रदानेन मम शांतिं०॥ तक्रं दधिसमुद्भूतं प्राणीनां शांतिदं परं॥
अतस्तक्रप्रदानेन मतः शांतिं०॥ अथपुष्पदानं॥ मनोहराणि पुष्पाणि सदा देवप्रियाणि च॥ अतस्तेषां प्रदानेन शांति
र०॥ फलानि मधुकाराणी देवानां द्विजप्रियाणि तु॥ अतस्तेषां प्रदानेन शांतिर०॥ प्रियं स्वादुकरं नित्यं फलदानमनो
हरं॥ तेनमे सफलात्वाप्तिर्भवेज्जन्मनि जन्मनि॥ छत्रदानं संपदां भूषणं छत्रं वर्षातनिवारणं॥ अनेन प्रीतिदं य ७१

क
स्मादतः शांतिं प्रयच्छ मे॥ उपानहौ प्रदास्यामि शिलाकंटकरक्षणे॥ पादसंरक्षणार्थाय गृहाण त्वं सुखाय मे॥ वारिपात्रं पूरि
तं पात्रं तापत्रयहरं शुभं॥ पितृणां पुष्टिदं त्वस्य गृहाण त्वं सुखाय वै॥ व्यजनं वायुदैवत्यं सर्वकालसुखप्रदं॥ अस्य दाने
न वै शांतिः सर्वदास्तु गृहे मम॥ इदं गृहं गृहाण त्वं सर्वोपस्कारसंयुतं॥ तव विप्र प्रदानेन मम संतु मनोरथाः॥ काष्ठानामु
त्तमं क्षेत्यं महादेवेन निर्मितं॥ गंधप्रकिरणं पुण्यं मतः शांतिं० शिबिका सुखदा नित्यं महादेवसदा प्रिया॥ संप्र
दानेन वै तस्याः शांतिर०॥ मंचकं॥ मंचको रोगनाशघ्नः सर्वसौख्यप्रदायकः॥ संप्रदानेन चैतस्या शांतिर०॥ सुखदं
शयनं यस्मात्क्लेशनस्यं प्रियं सदा॥ दानेनानेन सौभाग्यं सर्वदास्तु गृहे मम॥ मृदुनिर्बीजकार्पासपूरितं सुखदं स्व
पां॥ कशिपोश्च प्रदानेन सुखं स्यात्सर्वदा मम॥ तांबूलं सुखदं लोके सर्वदा मंगलप्रदं॥ प्रियं वै बहिर्देवानामतः
शांतिं प्रयच्छ मे॥ तिलपात्रं॥ तिलपात्रं सदा पुण्यं सुवर्णतिलपूरितं॥ दानेनानेन मे नित्यं सर्वारिष्टं प्रशाम्यतु॥ सर्वदे
वमयं धान्यं सर्वप्रीतिकरं महत्॥ प्राणिनां जीवनं धान्यं मतः शांतिं प्रयच्छ मे॥ दासीदानं॥ दासीयं प्रत्यहं गेहे मार्जना
दिक्रियाकरी॥ संप्रदानेन वै चास्याः सुखसंपत्सदास्तु मे॥ शय्यादानं॥ तांबूलपुष्पसहितं नानापरिमलैर्युतं॥ व
स्त्रेण छादिता शय्या नानारत्नसमन्वितं॥ धूपदीपान्वितं भव्यं भाजनं कांस्यनिर्मितं॥ मृत्स्याभयतो दीपं व्यजनं च
सुगंधिदं॥ सजलं कलशं दंडवेणावच यथा तथा॥ स्थापितं सिरसो भागे पाददेशे शिष्टुपानहौ॥ कर्पूरेलालवंगादि द्र
व्यप्रीतिकरं महत्॥ प्रसार्याथ नवं तत्र कशिपुं चोपबर्हणं॥ कशिपोश्च प्रदानेन सुखं स्यात्सर्वदा मम॥ पुरतो गंधपात्रा
णि तथा चैवासनं न्यसेत्॥ दृष्टदेशे तु वै छत्रं न्यसेत् द्विजो समाचरेत्॥ ततो विप्रं समभ्यर्च्य दानं दद्याद्यथोचितं॥ न्त्रा
भनं मंचकं न व्यपट्टेन वसमावृतं॥ प्रसार्याथ नवं तत्र कशिपुं चोपबर्हणं॥ सोपस्कारं समायुक्तं नानारत्नोपशोभि

तं॥ पुष्पतांबूलसहितं नानापरिमलान्वितं॥ मंचकोरोगनाशस्याद्दुःस्वप्नक्षयनं ततः॥ मृदुनिर्बीजकार्पासं तांबूलं च
शुभप्रदं॥ शय्यास्थानात्मने मूर्तिर्गौरीशंकरयोः प्रियः॥ दानेनास्याः सुखं चास्तु शांतिर्मे च सदाऽव्ययं॥ दीपोज्ञानदो नित्यं
देवतानां प्रियः सदा॥ दानेनास्य भवेत्सौख्यं शांतिर्मे वांछितं फलं॥ सज्ज्योतिर्गुणपात्रं च दीपवाहसमुन्नतं॥ सुखदं चास्य द
नेन शांतिरस्तु॥ गौरीप्रियहरिद्रा च नित्यं कल्याणदायकं॥ दानेनास्याः सुखं शांतिः संपदस्तु सदा मम॥ कुंकुमं शोभनं दिव्यं
सर्वदा मंगलप्रदं॥ दानेनास्यास्तु सदा सौभाग्यं शांतिरस्तु मे॥ सिंदूरं शुभदं चैव गयाधीनाथ प्रियं सदा॥ दानेनास्य गृहे शां
तिः सुखं चास्तु सदा मम॥ कस्तूरी भाग्यदा भव्या सर्वदेवप्रिया सदा॥ दानेनास्याः सुखं भाग्यं शांतिरस्तु॥ कलशं शुभदं
भव्यं जलेन परिपूरितं॥ दानेनास्यास्सदा सौख्यं शांतिरस्तु गृहे मम॥ गंधो मनोहरो भव्यः शांतिकः सुखदः सदा॥ संप्रदा
नेन चैवास्य शांतिरस्तु॥ पुष्पाणि सुखदानीह यथा प्रीतिकराणि च॥ संप्रदानेन चैतेषां शांतिरस्तु॥ पुष्पाणि सुखदा
नीह यथा प्रीतिकराणि च॥ संप्रदानेन चैतेषां शांतिः॥ कर्पूरं रुचिरं विप्र गृहाण मंत्रपूजितं॥ पुष्पगंधास्थितां सा
मरूमलाप्रियतामिति॥ भयनाशकरो दंडो वैष्णवो देवनिर्मितः॥ दानेनानेन चैवास्य शांतिरस्तु॥ संपदां भूषणं छत्रं सदा
तपनिवारणं॥ तस्मादस्य प्रदानेन शांतिरस्तु॥ सौभाग्यद्रव्यदानं च स्त्रीभिः कार्यं प्रयत्नतः॥ सभर्तृकाभिः संक्रांतौ फ
लीदीनां तथैव हि॥ दानं षोडशसंख्यानं एकैकस्य फलस्य च॥ हेमराजतकांस्यानां भाजनानि यथा भवेत्॥ सगुड
सतिलं युक्तं प्रीतिकरं नृणां॥ वर्धितं च गृहाणेदमतः शांतिः॥ हिरण्यादीनि पात्राणि भांडानि मृन्मयानि च॥ गृहाणानि च
यस्माच्छक्रः प्रियतामिति॥ गोधूमं जनितं पिष्टं शिलायंत्रविनिस्सृतं॥ द्विजश्रेष्ठ गृहाणेदमतः शांतिः॥ तंडुलाः शालि ७२
जास्तु तस्माः सजलाम्रपर्णसंस्थिताः॥ संप्रदानेन चैवास्य शांतिरस्तु॥ सौवर्णभाजनं कांस्यं पायसान्नादिपूरितं॥ दान

रं सदा पुण्यं देवानां परमं प्रियं॥ दानेनानेन मे पापं हरत्वं हेमसन्निभं॥ रक्तवस्त्रं महापुण्यमादित्यस्य प्रियं सदा॥ शुभ
दं सर्वदेवानामतः शांतिं प्रयच्छ मे॥ कृष्णवासः प्रियं मर्त्यो सर्वारिष्टनिवारणं॥ भयनाशकरं पुण्यमतः शांतिं प्रयच्छ मे॥ मनोहरं
कृष्णवस्त्रं बलभद्रप्रियं महत्॥ आयुर्वर्धय मे नित्यं ब्रह्मणा निर्मितं पुरा॥ षण्मुखस्य प्रियं नित्यं चित्रवस्त्रं मनोहरं॥ तस्मादस्य
प्रदानेन शांतिरस्तु सदा मम॥ पट्टकूलं सदा पुण्यं पवित्रं कांतिदं शुभं॥ सर्वदेवप्रियं यस्माद्दत्तः शांतिं प्रयच्छतु॥ काटजं
तरसं पुण्यं मटव्यं द्रुमसंभवं॥ पवित्रं सर्वदा यस्माद्दत्तः शांतिं प्रयच्छ मे॥ कंबलदानं॥ हिमनाशकरं पुण्यं कंबलं बल
वर्धनं॥ दानेनानेन वै यस्माद्दत्तः शांतिं प्रयच्छ मे॥ ऊर्णादानं॥ ऊर्णजं चाविकं पुण्यं सर्वलोकप्रियं शुभं॥ सदा पवित्रं परमम
तः शांतिः॥ गुडदानं॥ गुडमिक्षुरसोद्भूतं रसानां परमं वरं॥ दानेनानेन मे यस्माच्छांतिरस्तु सदा गृहे॥ शर्करादानं॥ शर्क
रेक्षुरसोद्भूता सदा स्वादुकरा शुभा॥ दानेनानेन मे नित्यमतः शांतिः॥ रौप्यदानं॥ पितॄणां वल्लभं यस्माद्धरिष्योर्वै शं
करस्य च॥ रजतं पातु मां नित्यं शोकसंसारसागरात्॥ लवणदानं॥ अन्नाद्यस्वादुता यां तिल वर्णा नरसाश्रये॥ नित्यं ल
वणदानेन मम संतु मनोरथाः॥ नानाधान्यदानं॥ ब्रह्मणा निर्मिताः पूर्वं व्रीहयो यज्ञसाधनाः॥ अनेन व्रीहदानेन म
म संतु मनोरथाः॥ व्रीहिजास्तंडुलाः शुभ्राः पितृदेवद्विजप्रियाः॥ दानेनानेन मे संतु सर्वकामाश्च संपदः॥ गोधूमदानं
धान्यचूडामणिर्जंबूद्वीपे गोधूमसंज्ञकाः॥ गंधर्वधनसौख्यानामतः शांतिः॥ यावनालदानं॥ यावनालाः प्रि
यकाः कोतिपुष्टिफलप्रदाः॥ दानेनानेन मे यस्माच्छांतिरस्तु सदा मम॥ यस्माद्देहहितार्थाय विष्णोर्देहसमुद्भवाः॥
पितृतृप्तिकरा माषाः प्रयच्छंति मनोहराः॥ मुद्गबीजानि चैव यस्मात्प्रियाणि परमेष्ठिनः॥ तस्मादेषां प्रदानेन मम संतु

ब्रह्मणानिर्मितंपुरा॥ मेषदानेनवैदेवेशांतिःसुखंचास्तुसदाममः॥ छागप्रियोहियज्ञानांमयाकृतिलेव्यवस्थितः॥ अस्यचैवप्रदाने
नमतःशान्तिंप्रयच्छमे॥ देवताप्रतिमादानं॥ मृत्युंजयमहादेवगौरीशश्चवृषवाहन॥ संप्रदानेनतेशंभोममसंतुमनोर
थाः॥ शिवनामभिःशिवश्चैवसाक्षान्नारायणोपिच॥ दानेनास्यहरिहरौप्रसन्नौचसदाममः॥ शालग्रामशिलापुण्याभु
क्तिमुक्तिप्रदायिनी॥ शालग्रामप्रदानेनमसंतुमनोरथाः॥ चक्रांकितसमायुक्ताशालग्रामशिलाशुभा॥ दानेनैवभवेत
स्याउभयोर्वांछितंफलं॥ शंखःशुभकरोनित्यंसर्वमंगलदायकः॥ तस्मात्तस्यप्रदानेनशान्तिरस्तु॥ घंटदेवप्रियानित्यंमहा
नंदकरीशुभा॥ अस्यदानेनमेशांतिःसर्वदासंपदंसुखं॥ नारायणजगन्नाथश्रीपतेगरुडध्वज॥ तवमूर्तिप्रदानेनप्रसन्ना
भवसर्वदा॥ ग्रहाणामधिपःसूर्यपद्महस्तप्रभाकर॥ दानेनास्यरवेःशांतिःसुखंचास्तुसदामम॥ गणनाथोविघ्नहरोगौरी
सुनुरभीष्टदः॥ अस्यदानेनमेशांतिःप्रसन्नोस्तुविनायकः॥ आदिमायामहाशक्तिर्विश्वमायाजगन्मयी॥ दानेनास्याः
प्रसन्नास्तुसर्वदाशांभवीमम॥ सरस्वतीजगन्माताशब्दब्रह्माधिदेवता॥ पुस्तकस्यप्रदानेनरक्षमांपरमेश्वरि॥ सोपस्कर
समायुक्ताभिन्नामूर्तिसदक्षिणा॥ गृहाणत्वंद्विजश्रेष्ठमेमसंतुमनोरथाः॥ देशकालउपायेनद्रव्यंश्रद्धासमन्वितं॥
पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणं॥ नविद्ययाकेवलयातपसाकेवलेनहि॥ विद्यातपोभ्यांवृत्तंयत्तद्धिपात्रंप्र
चक्षते॥ पात्रेददतुयत्किंचिच्छुचिर्भूत्वासमाहितः॥ ज्ञेयंतत्सर्वमव्ययंयन्महादानादिकंचयत्॥ ददातिप्रत्यहंय
स्तुहिरण्यादिकमेवच॥ भुक्तभोगोन्यथाकामान्स्यैश्रुतंपदमव्ययं॥ दानंनैमित्तिकंदद्यात्ससंकल्पयथावि
धि॥ नित्यदानेननैवस्यासंकल्पादिफलादिकं॥ अथगोदानविधिः दानमेतत्समाचष्टेपावनंपरमंमहत्॥ स

७३

मानंसर्ववर्णानांगवांदानमनुत्तमं॥ चतुर्वर्गफलायालंश्रृणुष्वंनृपपुंगव॥ शालासरसिवानद्यांपंचगव्येनसंगमी॥ नेनैव
स्नापरस्ताप्रूजयेद्विधिवत्ततः॥ सयवांश्चतिलान्हुत्वापंचगव्यंतिलान्वितं॥ समिधंग्नौव्याहृतिभिःमूलमंत्रेणवाथवा॥ अ
ष्टोत्तरसहस्रंतुहुत्वागांनप्रदापयेत्॥ सोपस्करांसवत्सांचघंटाभरणभूषितां॥ गंधेहरिद्रापिष्टेश्चमुखंपुच्छंप्रपूजयेत्॥ अ
ग्नेपादादिपंचांगांसंप्रक्षाल्यशुभोदकैः॥ आगावइतिमंत्रेणगायत्र्यावाप्रपूजयेत्॥ आदौगोरग्रपादाभ्यांशृंगाभ्यांचपृष्ठतः॥
स्कंदाभ्यांचपुच्छाभ्यांसर्वांगेभ्योनमोइति॥ छालेषुतेषुगंधांश्चप्रदद्यान्मंत्रतःक्रमात्॥ अक्षतान्पुष्पाणिप्रक्षिपेच्छुद्धमान
सः॥ सर्वगंधसमायुक्तंमिंद्रासुरवंदिते॥ सवत्सगोगृहाणेमंधूपंमंगलकारकं॥ आनंदकृत्सर्वलोकेदेवानांचसदाप्रिये॥
गोत्वंपाहिजगन्मातर्दीपोयंप्रतिगृह्यतां॥ आच्छादनंगवेदद्यात्सभ्यक्षौमंमृदुनिर्मलं॥ सुरभिर्वस्त्रदानेनप्रयतां
परमेश्वरी॥ सुरभेत्वंजगन्मातर्देविविष्णुपदेस्थिते॥ सर्वदेवमयेग्रासंमयादत्तमिदंग्रसा॥ दंतेषुमौक्तिकंदद्याद्धलाटे
ताम्रपैपल॥ उरसीरमपादेचधृतमधुसदाममः॥ हृदयेचंदनंदद्याज्जघयोरीक्षुदंडकं॥ सुवर्णश्रृंगीरौप्यसुखुरौतथालांगुलि
दक्षिणां॥ वस्त्रैभिन्नातुदातव्यादोहनंकांस्यपात्रकं॥ ब्राह्मणाप्रपूजयित्वातुवस्त्रालंकारभूषिणेः॥ गावःसुरभयानित्यं
गावोगुग्गुलगंधिकाः॥ गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत्॥ अयमेवपरंगावोदेवानोहविरुत्तमं॥ पावनंसर्व
लोकानांरक्षंतिचवहंतिच॥ हविषामंत्रपूतेनतर्पयंत्यमरादिकान्॥ ऋषीणामपिहोतृणांगावोहेमप्रतिष्ठिताः॥ सर्वेषा
मेवभूतानांगावःशरणमुत्तमं॥ पवित्रंपरमंगावोमंगलंसर्वमुत्तमं॥ नमोगोभ्यःश्रीमतिभ्यःसौरभेयीभ्यएवच॥ न
मोब्रह्मसुताभ्यश्चपवित्रेभ्योनमोनमः॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश॥ यस्मात्तस्माच्छिवंमेस्याद्दिहलोकेपरत्रच॥

गावोमेमग्रतःसंतु गावोमेसंतु पृष्टतः॥ गावो मेहृदयेसंतुगवांमध्येवसाम्यहं॥ प्राङ्मुखगामि मांस्थाप्यसवत्सांतांसुपूजयेत्॥
पुछदेशेतुदातावेस्नातोबुधि शिखोभवेत्॥ उदङ्मुखस्तुविप्रस्यतात्रलक्षणलक्षितः॥ अन्यपात्रंकरेकृत्वाकन्याकेनसमन्वि
तं॥ निक्षिप्यपुछंतस्मिंस्तुघृतदुग्धंप्रगृह्यते॥ सकिल्लंविप्रपाणौतुप्रागग्रंतुविधापयेत्॥ जलकुशान्वसलिलंगृहीत्वादानमार
भेत्॥ अनेनैवतुमंत्राणांपात्रहस्तेजलंक्षिपेत्॥ यज्ञसाधनभूतायाविश्वस्याद्यप्रणाशनं॥ विश्वरूपपरोदेवप्रीयतामन
यागवा॥ अत्रजेतुतताधेनुततांधेनुब्राह्मणेनसमन्वितं॥ गोपतीनांततोविद्याज्जपेतलग्नयतःशुचिः॥ जलशायीब्रह्मरूपी
लापद्मनाभःसनातनः॥ अनंतभोगशयनःप्रीयतांपरमंपिता॥ इतिसंप्रार्थ्यतांदद्याद्ब्राह्मणायवेदपारगे॥ सर्वपापविनिर्मुक्तः
सोश्नुतेपदमव्ययं॥ ददातियःसवत्सांगांसर्वान्कामान्समश्नुते॥ इहलोकेषुसंप्राप्यविष्णुसायुज्यमाप्नुयात्॥ इति
गोदानविधिः॥ अथोभयमुखीगोदानं॥ सालंकृत्वासवत्सांचगांयेत्रीयःप्रयच्छति॥ विप्रायवेदविदुषेविष्णु
लोकंसगच्छति॥ हेमशृंगीरौप्यखुरांसुशीलांवस्त्रसंयुतां॥ कांस्यपात्रप्रदत्तव्यंक्षीरिणीगौःसदक्षिणां॥ यावद्वत्स
स्यपादौद्वौमुखंयोन्यांप्रदृश्यते॥ तावद्गौःपृथिवीज्ञेयायावद्गर्भंनमुंचति॥ संपृज्यतासपसवांयःकरोतिप्रद
क्षिणां॥ सप्तद्वीपकलापृथ्वीसप्रदक्षिणकृद्भवेत्॥ संपूजितामिमांगायोददात्यभूयतेसुखी॥ सागरान्तमहीदान
फलंप्राप्यलभेत्सुखं॥ सालंकृतांगृहीपामांददात्यभयतोमुखी॥ विष्णुसुपीद्विजश्रेष्ठत्राहिमांभवसागरात्॥ म
हिषीदानं॥ कार्पासबीजपिण्याकंहरिद्रागौरमृत्तिका॥ सिंदूरतैलमाज्यंचरज्जुलंगुलकंतथा॥ नीलवस्त्र
नृणाभारंरक्तपुष्पंचचंदनं॥ घंटकांस्यमयंपात्रंताम्रपात्रंतथैवच॥ यज्ञोपवीताभरणमामंचैवसदक्षिणं॥ आ
दौसंपाद्यवैतानिमहिषीदानमाचरेत्॥ पुण्यकालेथवादेशेदेहव्याधिसमुद्भवेत्॥ कर्तव्यंमहिषीदानमपमृ

७४

दुष्क

नास्यचसौभाग्यंशांतिर०॥ इतिसुवर्णादिपात्रदानं॥ जन्मांतरसहस्रेषुयत्कृतंसुकृतंमया॥ स्वर्णपात्रप्रदानेनमपपापंव्यपो
हतु॥ कन्यादूषयतःपापंपरदारादिमर्षणात्॥ रौप्यपात्रप्रदानेनपापंगच्छतुमेसदा॥ परापवादंदयेशून्यंदुष्टमांसस्यभक्षणं॥ पी
पापंगोत्रोच्छितंताम्रपात्रंप्रदानेनश्यतु॥ मयापापान्यनेकानिकामाकामकृतानिच॥ कांस्यपात्रप्रदानेनतानिनश्यंतुमे
सदा॥ ज्ञानाज्ञानकृतंपापंमयालोहकृतंचिरात्॥ लोहपात्रप्रदानेनममपिंडाद्व्यपोहतु॥ स्कंदीप्तिकरंतोग्रमारोग्यंबलवर्ध
नं॥ तस्मादस्यप्रदानेनप्रीयतांमेदिवाकरः॥ कांस्यंब्रह्मशिवश्चसाक्षात्कांस्यमेतद्विभावसुः॥ कांस्यंविष्णुमयंयस्माद्दत्तः
शांति०॥ रत्नानि॥ यस्मात्सर्वेषुरत्नानिदेवाःसर्वेव्यवस्थिताः॥ रत्नदानेनमेशांतिंप्रयच्छंतुसदासुराः॥ माणिक्यंपद्मरागंच
वैडूर्यंवज्रमेवच॥ गोमेदांमंकरंकांतिंपुष्परागंचमौक्तिकं॥ हरितंचनवैतानिरत्नानितिवदंतिह॥ मौक्तिकंभूषणंविष्णोः
श्रियागौर्याःशिवस्यच॥ दानेनास्यशिवंमेस्तुपरत्रेचसुखंसदा॥ प्रवालंपुष्टिकंकांतिवर्धनंशुभदंसदा॥ दानेनास्यसुखं
चैवशांतिर०॥ मांगल्यमणयोलक्ष्म्याःप्रियागौर्याश्चसर्वदा॥ दानेनैषांसुखंशांतिसौभाग्यंत्वंसदास्तुमे॥ नैलंपुष्टिक
रंनृणांलक्ष्मीदंमंगलप्रदं॥ दानेनास्यास्तुमेशांतिःसर्वारिष्टप्रशाम्यतु॥ कर्णपात्रंसदास्त्रीणांभूषणंमंगलप्रदं॥ दानेना
स्यसुखंशांतिःसौभाग्यस्तुसदामम॥ गजादिदानं॥ ऐरावतोचतुर्दंतोगजानानायकश्चयः॥ दिग्गदंतिनांपूज्यत
मोत्रणंक्षमयतुप्रभुः॥ सुप्रतीकंगजेंद्रत्वंसरस्वत्याभिषेकंच॥ इंद्रस्यवाहनश्रेष्ठंसर्वदेवैश्चपूजितं॥ गजेंद्रमत्तमातंगरिपुसै
न्यविनाशक॥ तस्यदानेनमेशांतिःसर्वदास्तुसुखंशिवं॥ अश्वोहिवाहनंभानोःकारणंहिशतक्रतोः॥ संप्रदानेनमेवा
स्यशांतिरस्तुसदागृहे॥ वृषभोधर्मएवस्यान्महादेवप्रियःसदा॥ संप्रदानेनचैवास्यशांतिर० अजोग्निवाहायज्ञार्थेब्र

त्कनिवारकं॥ गणेशं च मयं मृत्कं संपूज्य होमयेद्यथा॥ व्याहृतिभिश्च तिलाज्येन शतमष्टतरं कुनेत्॥ यमं चैव तथा मृत्कं तत
न्मंत्रेण होमयेत्॥ यमं संतर्प्य महिषीमद्भिः प्रक्षालयेद्यथा॥ यमहिष्टमनेन बमं त्रेणाथ प्रपूजयेत्॥ सर्वांगौरवं कुर्यात्पाद
दिषु च यथाक्रमं॥ यमप्रियं महाघोरं महिषी व्याधिनाशनी॥ त्वं मृत्कं भयतं भीतं मामं रक्ष समुद्धरे॥ गोरोचनं ललाट
त्वं श्रृंगयो गोरमृत्तिका॥ कंठे दसिंदूरं मुदरे हरिद्रालेपनं भवेत्॥ कृष्णवस्त्रं कंठे देशे कंठे रक्तं प्रसारयेत्॥ श्रृंगे हेमं खु
रे रौप्यं गंधपुष्पैः समन्वितं॥ त्रिः प्रदक्षिणमावृत्य महिषीं दक्षिणामुखी॥ ब्राह्मणं पूजयेद्भक्त्या वस्त्रालंकारभूषणैः॥ तां
दद्यात्प्राङ्मुखः कर्त्ता स्थितायोदङ्मुखाय च॥ कार्पासबीजपिण्याकतृणोदकसमन्वितं॥ सुनेत्रां सुस्रृंगीं श्यामामंगैः सं
पूर्णविग्रहां॥ पयस्विनीं सुसीलां च दारिद्र्यतिमिरापहां॥ हेमश्रृंगीं रौप्यखुरीं कांस्यघंटासमन्वितां॥ शेषलांगुलसंयु
क्तां ताम्रदोहनसंयुतां॥ समंताद्दीसंयुक्ता सप्तधान्यसमावृत्तां॥ ससामराष्ट्रतां रम्यां सालंकृतसदक्षिणां॥ महिषीं व
छसंयुक्तां सुशीलां च पयस्विनी॥ नीलवस्त्रवृत्तां चाहं दास्यो मृत्कहराय च॥ यमवाहनमहिषी मृत्करूपेण संस्थिता॥
सर्वव्याधिहरा नित्या मतः शांतिं प्रयच्छ मे॥ सरत्नसजलं पुछं धृत्वा विप्रकरे र्पयेत्॥ कांस्यपात्रं तस्य पाणौ दद्याद्दानं
सदक्षिणां॥ मृत्करूपेग्रहणो मां महिषीं द्विजसत्तमः॥ मृत्कोः संत्राहि मां घोराङ्कुछलयत्रवापि च॥ ततो बर्हिर्द्विजो
गच्छन्निस्त्ये तु दस्युत्तमं॥ यः करोति नरस्तस्य न मृत्कं न भयं क्वचित्॥ इति महिषीदानं॥ अथ ऋतुपरत्वे दानान्या
ह॥ सदा दद्याद्वसंते च जलं स्वादु सुशीतलं॥ गंधपुष्पादिकं चैव ब्राह्मणेभ्यो विशेषतः॥ ग्रीष्मे चोपानहौ छत्रं मं
न्नपानादिकं च हि॥ दद्याद्वर्षे नवं वेश्म सर्वोपस्कारसंयुतं॥ दद्या छरदि वासांसि नवानि विविधानि च॥ हेमंते पित

याचेवप्रपद्यादिधनादिकं ॥ चित्रान्नं शोशिरे दद्यात् सर्पदधिपयोन्वितं ॥ ऋतुधेवं च सर्वेषु केचिदिच्छंति सर्वदा ॥ नशक्नोत्य
समर्थश्चेद्दातुमिच्छन्नरोयदि ॥ पुण्यकालेथवा दद्याच्छक्तं वित्तादिकं यदि ॥ पुण्यकालः सविज्ञेयः श्चित्तं वित्तं यदा भवेत् ॥
अनित्यं च शरीरं स्यात्तस्माद्दानं समाचरेत् ॥ दाताभुक्ता हभोगीश्च सर्वान् कामान् यथेप्सितान् ॥ पुत्रपौत्रैः परिवृतः ततो
मोक्षमवाप्नुयात् ॥ इतिश्री धर्मप्रवृत्तौ दानप्रकरणं समाप्तं ॥ ॥अथ द्रव्यशुद्धिः ॥ याज्ञवल्क्यः ॥ भूशुद्धिर्मार्जनाद्दा
हात्कालाद्गोक्रमणात्तथा ॥ सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात् ॥ चंडालाध्युषिते यत्र यत्र मूत्रादिसंगितः ॥ एवं
कश्मूलभूयिष्ठाम्लसंध्या प्रकीर्तिता ॥ श्वसूकरखरोष्ट्राद्यैः संस्पृष्टं दुष्टतां व्रजेत् ॥ अंगारतुषकेशास्थिभस्माद्यैर्मालि
नां भवेत् ॥ यत्र वा स्यादमेध्यासामृत्यं वा प्रसवोपि च ॥ पंचधा वा चतुर्धा वा भूर्वर्ह्नि विशुध्यति ॥ इति भूमिशुद्धिः ॥
अथ गृहशुद्धिः ॥ गृहशुद्धिं प्रवक्ष्यामि तं तस्य शवदूषितं ॥ प्रोत्सृज्य मृन्मयं भांडं सिद्धमन्नं तथैव च ॥ गृहादपास्य
तत्सर्वं गोमयेनोपलेपयेत् ॥ अद्भिः संप्रोक्ष्य चैवाथ छागेनाघ्रापयेत्तथा ॥ ब्राह्मणैर्मंत्रपूतैश्च हिरण्यकुशवारिणा ॥
सर्वमभ्युक्षयेद्वेश्म ततः शुध्येदसंशयः ॥ इति गृहशुद्धिः ॥ अथ पात्रशुद्धिः ॥ निर्लेपिकांचनं भांडमद्भिरेव विशुध्यति ॥
अब्जमश्ममयं श्चैव राततं जतं चानुपस्कृतं ॥ चरुस्रुक्स्रुव सस्नेहपात्राण्युष्णेन वतु वारिणा ॥ सलेपानां मलेपानां वा
रिणा शुद्धिरिष्यते यज्ञसाधनभूतानां पात्राणां चैव सर्वदा ॥ स्फयाद्दीनां च सर्वेषां वारिणा शुद्धिरिष्यते ॥ गवाघ्राता
नि कांस्यानि शूद्रोच्छिष्टानि यानि च ॥ शुध्यंति दशभिः क्षारैः श्वकाकोपहतानि च ॥ भस्मना शुध्यते कांस्यं सुरया
यन्न लिप्यते ॥ आमिषेण तु यल्लिप्तं तत्तु नर्दहिन शुध्यति ॥ सुतिकोच्छिष्टभांडस्य सुरामद्यहतस्य च ॥ त्रिःसप्त मार्जना
च्छुद्धिर्नतु कांतस्यतापनं ॥ सूतिकाश्वानविण्मूत्ररजस्वलाहतानि च ॥ प्रक्षेप्यान्नितान्यग्नौ यद्यप्याचेद्द हेदपि ॥

सुवर्णरौप्यशंखाश्मशुक्तिरत्नमयानिच॥ कांस्यायसताम्रपात्राणित्रपुसादीनियानिच॥ निर्लेपनानिशुध्यंतिकेवलेनजलेन
जलेनतु॥ शुद्धोच्छिष्टानिशुध्यंतेत्रिधाक्षाराम्लवारिभिः॥ अहलक्तत्र दिग्धांचैवसकलंसंमार्जनाच्छुचिः॥ चतुर्थेनतुयद्भूतंचषु
ड्गिस्तत्रमार्जिनं॥ अग्नौप्रक्षिप्यगृह्णीयाद्धस्तेप्रक्षाल्ययत्नतः॥ गोसंगममनुसंस्पृष्टंतत्पात्रंशुचितामियात्॥ गंडूषंपादशौ
चंचयत्कुर्यात्कांस्यभाजने॥ षण्मासंभुविनिक्षिप्यउद्धृत्यपुनराहरेत्॥ लोहानांदहनाच्छुद्धिर्भस्मनागोमयेनवा॥
दहनात्तननाद्वापिशैलानामंगसापिच॥ काष्ठानांतक्षणाच्छुद्धिर्मद्भोमयजलेनपि॥ एवंभोजनपात्राणांप्रोक्तंयत्पूर्व
सूरिभिः॥ संहतानांतुपात्राणांयद्येकमुपहन्यते॥ तस्यैवशोधनंप्रोक्तंसामान्यद्रव्यशुद्धिकृत्॥ इतिपात्रशुद्धिः॥
अथधान्यशुद्धिः॥ व्रीहयःप्रोक्षणाद्दद्धिशाकमूलफलानिच॥ तस्मात्तस्यापहाराद्धानिरस्तकृषिंकरणेनवा॥ गृहेवाहेसमुत्पन्ने
दग्धेचमानुषपशौ॥ अभोज्यस्ताद्गताव्रीहिः॥ धातुद्रव्यस्यसंग्रहः॥ मन्मयेनावदानानावधौतुविचत्तिष्ठति॥ यवमाषति
लानांचनदोषोमनुरब्रवीत्॥ नचात्रप्राणिनोयत्रकेवलंगृहदीपनं॥ तत्रद्रव्याणिसर्वाणिगृह्णीयादविचारयन्॥ धान्य
प्रगल्भणानांचकाष्ठानांचैवसर्वदा॥ क्लिन्नानांचापिक्लिन्नानांमारुतेनैवशुध्यति॥ इतिधान्यशुद्धिः॥ अथान्नशुद्धिः॥
पक्षिजग्धंगवाघ्रातंमवधूतमवक्षुतं॥ दूषितंकेशकीटैश्चमृत्प्रक्षेपणशुध्यति॥ इवद्रा ऐयंविवाहेषुयज्ञेषुप्रकृतेषु
च॥ काकैःश्वभिश्चसंस्पृष्टमन्नंतान्ननिवर्जयेत्॥ तन्मात्रमन्नमुद्धृत्यशेषसंस्कारमर्हति॥ ब्रह्मांडेयेचद्विजानीयाल्ल
तिषन्नेषुवेयतः॥ पक्वंद्रोणाधिकंस्तन्नंकाकेश्चैधृपघातितं॥ ग्रासमुद्धृत्यतन्मात्रंयच्चलालाकृतंभवेत्॥ हेमाद्रेके
नचाम्बुस्पृश्यराजस्तेनाम्बुनायवा॥ अग्निज्वाल्यंयसंस्पर्शात्स्वर्णामधुसर्पिषा॥ द्रव्यापांलवंतनेवधनानाप्रोक्ष्य

पान्नच॥ छागेन मुपसंस्पृष्टमृन्नं तच्छुचिना भियात्॥ श्रवणं घृततैलानां प्लावनं गोरसस्य च॥ भांडानि प्लावयेदीक्षाकमूलफ
लानि च॥ द्रव्याणां चैव सर्वेषां शुद्धिरुत्प्लवनं स्मृतं॥ प्रोक्षणं संहतानां च दारवाणां च तक्षणं॥ घृतं चैव तु दधि क्षीरं तथैवेक्षुर
सो गुडाः॥ शुद्धभांडस्थितं तत्क्रतथा मधु न दुष्यति॥ आममांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः॥ म्लेच्छभांडस्थिता द्रव्या
भिष्युताः शुचयः स्मृताः॥ निर्यासानां गुडानां च लवणानां तथैव च॥ कुसुंभकुसुमानां च वस्त्राणि स्वांडालवायसैः॥ स्पर्शने
विहितं द्रव्यं सोमसूर्यादिमारुतैः॥ उच्छिष्टेन तु संस्पृष्टं द्रव्यं हस्तोकयं च न॥ अनिधाये वतं द्रव्यमाचांतः शुचिमाप्नुयात्॥
इत्यन्नशुद्धिः॥ अथ जलशुद्धिः॥ अविगंधा रसोपेता निर्मला स्थिवीगताः॥ अक्षीणाश्चैव गोपानादापः शुद्धिक
राहिते॥ भूमिस्थमुदकं मेध्यं वैतृष्ण्यं यत्र गोर्भवेत्॥ अत्यावेदमध्येवतह्रदे वर्द्धिलोयतं॥ उद्धृता वा प्रदत्तास्तुः शुद्धपा
त्रे तथा विधिः॥ एकरात्र्योषितास्त्याज्यत्यजेदापसमुद्धृताः॥ अस्पृश्यस्याजितडानि नदी वापि सरांसि च॥ चांडालादिसु
विस्पर्शनतीर्थं परिवर्जयेत्॥ वापीकूपतटाकेषु मानुषं श्रीयते वपि॥ अस्थिचर्मविनिर्मुक्ते स्थिरकालं वसेद्यदि॥ उ
द्धरेदुदकं सर्वं पंच पिंडं मृदस्तथा॥ प्रक्षिपेत्तं च गव्यं तु ततः शुद्धिमवाप्नुयात्॥ श्वभिः श्वपाकचंडालैर्दूषितेषु
विशोधनं॥ घटानां शतमुद्धृत्य पंचगव्यं क्षिपेत्ततः॥ उपानच्छुष्कविण्मूत्रस्त्रीरजोमद्यमेव च॥ एभिर्विदूषितं कूप
कुंभानां षष्टिमुद्धरेत्॥ जलाशये स्वल्पजले स्थावरे च महीतले॥ कूपवत्कथिता शुद्धिर्महत्सु च न दूष्यते॥ चंडा
लभांडसंस्पृष्टं पीत्वा कूपगतं जलं॥ गोमूत्रयावकाहारस्त्रिरात्रेणैव शुध्यति॥ अजा गावो महिष्यश्च ब्राह्म
पाश्च प्रसूतिका॥ दशरात्रेण शुद्धिः स्याद्भूमिस्थं च नवोदकं॥ इति जलशुद्धिः॥ अथ वस्त्रशुद्धिः॥ अहतं नव ७६

परान्नं परिपुष्टता ॥ असच्छास्त्राधिगमनमाकरेष्वधिकारिता ॥ भार्याविक्रयणं चैवामेकैकमुपपातकं ॥ महापातकतु
ल्यानि पापान्युक्तानि यानि तु ॥ तानि पातकसंज्ञानि तन्न्यूनमुपपातकं ॥ ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः ॥ जै
ह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं परं ॥ खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ॥ संकरीकरणं प्रोक्तं मत्स्याहि
वधो ऽपि च ॥ कृमिकीटवयोहत्या मद्यानुगतभोजनं ॥ मलिनीकरणं प्रोक्तमुक्तादन्यत्प्रकीर्तितं ॥ अथ प्रा
यश्चित्तं ॥ शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् ॥ ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥
तच्चरेद् ब्रह्महा सर्वं व्रतं द्वादशवार्षिकं ॥ समाप्ते तु शतं दद्याद् गवामस्मिन् व्रते सति ॥ अज्ञात्वा ब्राह्मणं हत्वा सामा
न्यं द्विजसत्तमे ॥ प्रायश्चित्तमिदं कुर्याद्विधिना द्वादशाब्दिकं ॥ ब्राह्मणस्य परित्राणाद् गवां द्वादशकस्य वा ॥ तथा
श्वमेधावभृतस्नानाद्वा शुद्धिमाप्नुयात् ॥ दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा ॥ दृष्ट्वा पथि निरातंकं कृ
त्वा तु ब्रह्महा शुचिः ॥ आनीय विप्रसर्वस्वं हृतं घातित एव वा ॥ तन्निमित्तं क्षतः शस्त्रैर्जीवितोऽपि विशुध्यति ॥ अ
रण्ये नियतो जप्त्वा त्रिः कृत्वा वेदसंहितां ॥ शुध्येत वा मितभोजी त्वा प्रतिस्रोतः सरस्वतीं ॥ संग्रामे वा हतो लक्ष्मी
भूतः शुद्धिमवाप्नुयात् ॥ मृतः कल्पः प्रहारार्त्तो जीवन्नपि विशुध्यति ॥ जातिमात्रं यदा हन्यादज्ञात्वा ब्राह्मणा
ग्रजः ॥ प्रायश्चित्तं तदा कुर्यादिदं पापविशुद्धये ॥ प्राणान्तिकं च यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः ॥ तत्कामिका
नि विषये विज्ञेयं नात्र संशयः ॥ कामतो वा यदा हन्याद् ब्राह्मणं ब्राह्मणस्तदा ॥ चरेद्व्रतं घोरं यावत्प्राणपरि
क्षयः ॥ रतिपूर्वं यदा हन्याद् ब्राह्मणं जातिमात्रकं ॥ गोसहस्रं तदा दद्यादथवा स्वर्णिताजपन् ॥ विधेयं प्रथमा दृष्ट ७८

तु द्वितीये द्विगुणं भवेत् ॥ तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ॥ मातरं पितरं हत्वा सोदर्यं भ्रातरं तथा ॥ गुरुं हत्वा श्रो
त्रियं वा चाहिताग्निमथापि वा ॥ अज्ञानतो यदा हन्याद्द्विगुणं व्रतमाचरेत् ॥ तदात्मनं दहेदग्नौ निहन्याद्यदि कामतः ॥
एतदुक्तं ब्राह्मणस्याद्विगुणं क्षत्रियस्य तु ॥ वैश्यस्य त्रिगुणं प्रोक्तं शूद्रादीनां चतुर्गुणं ॥ यागस्थं क्षत्रविट्घाती चरेद् ब्राह्म
णहव्रतं ॥ गर्भहा च यथावर्णं तथात्रेयीनिषूदकः ॥ चरेद्व्रतमहत्वापि घातार्थं समुपागतः ॥ द्विगुणं सवनस्थं तु ब्राह्मणं व्रतमादि
शेत् ॥ अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ॥ प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो व्याधित एव वा ॥ महापातकसंयुक्तो दैवाद्स्यादि
ग्निमानपि ॥ पुत्राद्यैः पालयेदग्निं युक्त आदोषसंक्षयात् ॥ इति ब्रह्महत्याप्रायश्चित्तं ॥ अथ सुरापानप्रायश्चित्तं ॥ गौ
डी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ॥ तथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ॥ सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ॥
तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥ मधुकं चैक्षवं क्षीरं तालं खर्जूरपानसं ॥ न पिबेत् द्विजो मद्यं मैलेयं नारिकेल
जलं ॥ सुरां बुद्ध्वा तु गोमूत्रपयसामग्निसन्निभं ॥ सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमाप्नुयात् ॥ बालवधाद्राजवधाद् ब्रह्महत्याव्र
तं चरेत् ॥ पिण्याकं वा कणान्वापि भक्षयेत्तु समा निशि ॥ अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव वा ॥ पुनःसंस्कारमर्हन्ति त्रयो
वर्णा द्विजातयः ॥ पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् ॥ इहैव सा शुनी गृध्री सूकरी चैव जायते ॥ पतत्यर्धं शरीर
स्य यस्य भार्या सुरां पिबेत् ॥ आपः सुराभाजनस्था मद्यभाण्डस्थितास्तदा ॥ प्राजापत्यं चरेत्पीत्वा छर्दितोपवसेद्दिनं ॥ इति
सुरापानप्रायश्चित्तं ॥ अथ सुवर्णे ॥ ब्राह्मणः स्वर्णहारी तु सुराज्ञे मुसलमर्पयेत् ॥ स्वकर्म ख्यापयंस्तेन हतो मुक्तो
ऽपि वा शुचिः ॥ अनिवेद्य नृपे शुद्ध्यै सुरापानव्रतं चरेत् ॥ आत्मतुल्यं सुवर्णं वा दद्याद्विप्राय तुष्टिकृत् ॥ सुवर्णं तु षोडशा

माषपरिमितं॥अपहृत्तोसुवर्णस्यमाषमात्रंद्विजाधमः॥गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुध्यति॥स्तेयब्रह्मस्वाहृते
तुसुवर्णाहरणेकृते॥पश्चात्तापेनदातव्यंतस्मैद्येकोदशाधिकं॥रौप्यंहृत्वाद्विजोमोहात्चरेच्चांद्रायणव्रतं॥गद्याणपाद
शकादूर्ध्वंद्विगुणंत्रिगुणंचरेत्॥गुरुतल्पोपिभाष्येणनदोस्वप्यादयोयमे॥प्लमिर्ज्वलन्तिवाश्लिष्येन्मृत्युनाविशु
ध्यति॥स्वयंवाशिश्नवृषणादुत्कृत्याधायवांजलौ॥नैर्ऋतिंदिशमातिष्ठेदानिपाताद्विजिह्मगः॥पितृभार्यांतुविज्ञायस
वर्णांयोधिगच्छति॥जननींयाप्यविज्ञायमृतशुद्धिमवाप्नुयात्॥गुरोःक्षत्रकृतांभार्यांपुनर्गत्वालमागतः॥अंडमा
त्रंसमुत्कृत्यशुद्धोजीवन्मृतावपि॥गुरोर्भार्यांतुवैश्यांपुनर्गत्वाद्यकामतः॥लिंगाग्रंछेदयित्वातुततःशुद्धस्तुकिल्बि
षात्॥पुनःशुद्धांगुरोर्मत्वायदिविप्रोविमोहितः॥ब्रह्मचारीत्वदुष्टात्माद्वादशाब्दंव्रतंचरेत्॥एतदोषविशुद्ध्यर्थंस्तकपृति
तिसमुदाहृता॥स्त्रीणामपिप्रसक्तानांएषएवविधिःस्मृतः॥ अथसंसर्गप्रायश्चित्तं॥ योयेनपतितेनैषांसंसर्गंया
तिमानव॥समस्यैवव्रतंकार्यंतत्संसर्गविशुद्धये॥येभिस्तुसंविशेद्योवैवत्सरसोपितत्समः॥कन्यांसमुद्वहेदे
षांसोपवासामकिंचनां॥सल्लापस्पर्शशयनाहत्तसह्यानात्सहाशनात्॥याजनाध्यापनाद्यौनात्पापंसंक्रमतेनृ
णां॥याजनंयोनिसंबंधःस्वाध्यायःसहभोजनं॥कृत्वासद्यःपतत्येवपर्वतेननसंशयः॥संसर्गमाचरन्विप्रःपतिताद्वि
चकामतः॥पंचाहंद्वादशाहंवाद्वादशाहमथापिवा॥मासार्धमासमेकंवामासमात्रमथापिवा॥अब्दार्धमब्दमेकंवाभवेदू
र्ध्वंतुतत्समः॥पंचाहंतुचरेत्कृच्छ्रंदशाहेतप्तकृच्छ्रकं॥पराकस्त्वर्धमासस्यान्मासेचांद्रायणंचरेत्॥मासत्रयेतुकु
र्वीतकृच्छ्रचांद्रायणोत्तरं॥षण्मासिकेतुसंसर्गेषडब्दंव्रतमाचरेत्॥ इतिमहापातकप्रायश्चित्तं॥ अथोपपा

७१

मपस्तेयीतथैवगुरुतल्पगाः॥एतेमहापातकिनोयस्तैःसहसंभवेत्॥हंतामंत्रोपदेष्टाचतथासंप्रतिपादकाः॥प्रोत्साहकःसहा
यश्चतथामार्गानुदर्शकः॥अनिषेद्धाक्षमोयस्तुसर्वेब्रह्महणःस्मृताः॥अकार्यकारिणामेषांप्रायश्चित्तंप्रकल्पयेत्॥
आक्रुष्टस्ताडितोवापिधनैर्वाविप्रयोजितः॥यमुद्दिश्यत्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं॥असंबंधनयःकश्चिद्द्विजःप्राणा
न्परित्यजेत्॥तस्यैवतुव्रतापनुत्तयंपरिकीर्तयेत्॥गुरूणामध्यधिक्षेपोवेदनिंदासुहृद्वधः॥ब्रह्मत्यासविज्ञेयमधीत
स्यचनाशनं॥यज्ञविवाहेकार्येचतन्यस्मिन्धर्मकर्मणि॥विघ्नंसमाचरेद्यस्तुतमाहुर्ब्रह्मघातकं॥निषिद्धभक्षणंजै
ह्म्यमुत्कर्षणवचोनृतं॥रजःस्वलामुखास्वादःसुरापानसमंभवेत्॥अश्वरत्नमनुष्यस्त्रीभूधेनुहरणंभवेत्॥निक्षेपस्य
चसर्वहिसुवर्णस्तेयसंमितं॥सखिभार्याकुमारीषुस्वयोनिष्वंत्यजासुच॥सगोत्रासुसुतस्त्रीषुगमनंगुरुतल्प
गं॥पितुःस्वसारंमातुलानींस्नुषामात्स्वसामपि॥मातुःसपत्नींभगिनींमाचार्यतनयांतथा॥आचार्यपत्नींस
कृतांगच्छेस्तुगुरुतल्पगः॥छित्वालिंगंवधस्तस्यसकामायास्त्रियस्तथा॥ अथोपपातकानि॥ गोवधोव्रात्यतास्ते
यमृणानांचानपक्रिया॥अनाहिताग्नितापुण्यविक्रयःपारवेदनं॥भृतादध्ययनादानंभृतकाध्यापनंतथा॥पा
रदार्यंपारिवित्त्यंवार्धुष्यलवणक्रिया॥स्त्रीशूद्रविट्क्षत्रवधोनिंदितार्थोपजीवनं॥नास्तिक्यंव्रतलोपश्चसुतानांचै
वविक्रिया॥धान्यकुप्यपशुस्तेयमयाज्यानांचयाजनं॥कन्यायादूषणंतस्यैवकौटिल्यंव्रतलोपनं॥आत्मनोर्थक्रि
यालंभमद्यपःस्त्रीनिषेवणं॥स्वाध्यायाग्निसुतत्यागोबांधवत्यागएवच॥इंधनार्थंद्रुमच्छेदःस्त्रीहिंसौषधिजी
वनं॥हिंस्रयंत्रविधानंचव्यसनान्यात्मविक्रयः॥शूद्रसख्यंहीनसख्यंशूद्रयोनिनिषेवणं॥तथैवानाश्रमेवासः

निरतादांतास्तेषापापंनिवेदयेत्॥एकोवावदविधर्मयन्याचष्टेसमाहितः॥सविज्ञेयोपरोधर्मोनाज्ञानांनियुतेनतु॥विज्ञा
प्यनखरोमाणिप्रचाप्यस्नानमाचरेत्॥केशानांवपनंकृत्वाप्रायश्चित्तंसमाचरेत्॥केशानांरक्षणार्थायद्विगुणंव्रतमा
चरेत्॥राज्ञावाराजपुत्रोवाब्राह्मणोवाबहुश्रुतिः॥सर्वान्केशान्समुद्धृत्यछेदयेछंगुलद्वयं॥सर्वत्रैवहिनारी
णांशिरसोमुंडनंस्मृतं॥भस्मगोमयमृद्वारिपंचगव्यादिकल्पितैः॥मलापकर्षणंकार्यंबाह्यशौचापसिद्धये॥सम्य
कृस्नात्वाशुचिर्भूत्वामार्द्रवासाःसमाहिताः॥प्रदक्षिणंत्रयंकृत्वापापानितुनिवेदयेत्॥सभानव्याप्रवेष्टव्यावक्त
व्यंवासमंजसं॥अबुद्ध्वन्विष्टवान्वापिनरोभवतिकिल्बिषी॥योज्ञात्वाधर्मशास्त्राणिप्रायश्चित्तंप्रयच्छति॥प्रायश्चि
त्तीभवत्युतोवक्तारंकिल्बिषंव्रजेत्॥अनर्चितामनाहूतमष्टंचयथाविधिः॥प्रायश्चित्तंनदातव्यंज्ञानविद्भिरपि
द्विजैः॥प्रायश्चित्तमकुर्वाणाःपापेषुनिरताःसदा॥अपश्चात्तापिनःकष्टान्नरकान्यांतिदारुणान्॥तामिस्रलोहशं
महानिरयशाल्मली॥रौरवंकुड्मलंकृतिमृत्तिकंकाष्ठसूत्रकं॥साघातंलोहितोदंचसविषंसंप्रतापयेत्॥महानरक
काकोलंसंजीवनमहापथं॥अविचिरंधतामिस्रंकुंभीपाकंतथैवच॥असिपत्रवनंचैवपत्तनंचैकविंशतिः॥म
हापातकजैर्घोरैरुपपातकजैस्तथा॥अनुयांतितथामर्त्याःप्रायश्चित्तानराधमाः॥विहितस्याननुष्ठानान्निंदितस्यच
सेवनात्॥अनिग्रहाच्चेंद्रियाणांनरःपतनमिच्छति॥तस्मादेनेनकर्तव्यंप्रायश्चित्तंविशुद्धये॥एवमस्यांतरात्माच
लोकश्चैवप्रसीदति॥प्रायश्चित्तेरपेत्येनोयदज्ञानकृतंभवेत्॥कामतोव्यवहार्यस्तुवचनादिहजायते॥ब्रह्मह

श्वेतं सद्दृढं नान्यधारितं ॥ पवित्रं तद्विजानीयाद्वस्त्रं सकलकर्मसु ॥ वस्त्रं मृद्भस्मसा शुध्येद् दुष्कं चैव जलमेव च ॥ रज्वादिकं
च दुष्टं चेत्यजेत्तन्मात्रमेव च ॥ यदि मूत्रपुरीषाभ्यां तेन सा रुधिरेण वा ॥ चैलं समुपहन्येत तदद्भिः प्रक्षालयेद्द्विजः ॥ अद्भिस्तु
प्रोक्षणं शौचं बहूनां धान्यवाससां ॥ प्रक्षालनेन त्वल्पजानं मृद्भिः प्रशौचं विधीयते ॥ ऊर्णाकौशेयकुतुपपट्टक्षौमदु
कूलजाः ॥ अल्पशुद्धा भवेत्येते शोषणप्रोक्षणादिभिः ॥ तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः ॥ तिलका
मुपधानं पुष्परक्ताम्बुरं तथा ॥ शोधयित्वातपे तत्किंचित्कं संमार्जयेन्मुहुः ॥ पश्चात्तु वारिणा प्रोक्ष्य विनियुंजीत कर्मणि ॥ चैल
वत्समपां शुद्धिर्वेदलानां तथैव च ॥ शाकमूलफलानां तु धान्यवच्छुद्धिरिष्यते ॥ अविकंपकुदुलं च पवित्रं चैव सर्वदा ॥
अमेध्यलेपने चेत्स्यात्तावत्प्रक्षालनं स्मृतं ॥ जलभस्महरिद्राभिलेपनं कथ्यते बुधैः ॥ तैलगोमयगोमूत्रैश्चर्मणां
शुद्धिरिष्यते ॥ पत्रपुष्पकुशादीनि धृत्वा वासो प्रयुज्यते ॥ एषामाव मन्येस्याच्छुद्धिरेवं वदुर्बुधाः ॥ रथ्याकर्दमतोया
निनावः पथितृणानि च ॥ मारुतेनैव शुध्यंति पक्केष्टकचितानि च ॥ इति वस्त्रशुद्धिः ॥ अथ देहशुद्धिः अद्भिर्गा
त्राणि शुध्यंति मनः सत्येन शुध्यति ॥ विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥ अजाश्वा मुखतो मेध्या गा
वो मेध्याश्च पृष्ठतः ॥ योषितः सर्वतः शुद्धाः कारुहस्तः शुचिः सदा ॥ एवं संक्षेपतः प्रोक्ताः सर्वेषां शुद्धिरन्यथा ॥ वि
याशुद्धिरन्येषां स्मृतितोन्यतः ॥ इति श्रीसर्वशुद्धिकरणं समाप्तं ॥ अथ प्रायश्चित्तं ॥ कृतानां चैव पापानां ज्ञा
नतो ज्ञानतोपि वा ॥ उच्यते पापिनां शुध्यै प्रायश्चित्तविनिर्णयः ॥ वेदवेदांगतत्त्वज्ञाः धर्मशास्त्रविशारदाः ॥ स्वधर्म

नोद्विजः॥ अवकीर्णे वर्जशुध्यर्थं चांद्रायणमथापिवा॥ तएतच्चांद्रायणं कामकृते ज्ञेयं॥ कामकृते तु दद्यात्रिरात्रं वोपोष्य हृषभैकादशास्तु गाः॥ उपपातकशुद्धिस्यादेवं चांद्रायणेन वा॥ इत्युपपातकप्रायश्चित्तं॥ क्षत्रियस्य वधं कृत्वा षडब्दं व्रतमाचरेत्॥ अब्दं वैश्यवधे तद्वद्धाष्टम्शूद्रवधे चरेत्॥ अंत्यजानां वधं कृत्वा ह्यब्दमेकं समाचरेत्॥ अपदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्॥ हस्तिनं तुरगं छागं महिषं शुष्ककास्तथा॥ मृगं वरोहिणं हत्वा चरेच्चांद्रायणद्वयं॥ अजाविके खरं श्वानं शृगालं सूकरं तथा॥ मार्जारं नाशकं हत्वा प्राजापत्येन शुध्यति॥ कपोतबककाकानां गृध्राणां मूषकस्य च॥ वधे दृषां प्राणिनां च पादकृच्छ्रं समाचरेत्॥ वनस्थानू प्राणिनो हत्वा प्राणायामेन शुध्यति॥ अस्थिन्वि हत्वधे विप्रः किंचिद्दद्याद्द्विशुध्ये॥ सावित्रीपतितायस्य दशवर्षाणि पंच च॥ सशिखं पवनं कृत्वा व्रतं कुर्यात्समाहितः॥ एकविंशतिरात्रं च पिबेत्प्रस्रतिपावकं॥ भोजयेच्च हविष्यान्नं ब्राह्मणान्सप्त पंच च॥ ततो यावकशुद्धिस्य तस्योपनयनं स्मृतं॥ एतदुपनयस्य परमकालात्सर्वकाले ज्ञेयं॥ अतऊर्ध्वं व्रात्यस्तोमः व्रात्यस्तोमाद तत्केचेति वचनात्॥ गजाश्वस्यापि हरणे मणीनां तस्य च॥ धनापहरणे चैव कुर्यात्सांवत्सरं व्रतं॥ धान्यान्यधनचौराणि कृत्वा कामाद्द्विजोत्तमः॥ स्वजातीयगृहे धेनकृच्छ्रेन विनश्यति॥ मनुष्याणां च हरणे रत्नानां च तथा च वै कूपवापीजलानां च शुद्धिं चांद्रायणं चरेत्॥ धान्यानां हरणे कृच्छ्रं तिलानां मैदवं स्मृतं॥ सर्वेषां धातुजातीनां पाराकं हरणे चरेत्॥ दशगद्याणकादूर्ध्वं द्विगुणं व्रतमाचरेत्॥ असहस्रात्तु त्रिगुणं मध्ये हमविधिस्मृतं॥ विक्रये च हृतं प्रोक्तं हरेद्द्विगुणहितत्॥ हरणाद्दशगुणं दत्वा प्रायश्चित्तं समाचरेत्॥ यद्यत्तद्यत्परद्रव्यमपहृत्याथ किल्बिषी॥ तदेव द्विगुणं तस्य दत्वा कृच्छ्रार्धमाचरेत्॥ अजाविषट्कका र्पासताम्र ८०

धान्ये तिलादिषु॥ चतुर्गुणमृणं दत्वा प्राजापत्यं समाचरेत्॥ गोहर्तुः सप्तकृच्छ्रं स्याद्दर्धहस्य सहारके॥ चतुर्गुणमृतं दत्वा व्रतस्यैकादशोत्तरं॥ भक्षताल्या प्रहरणे यान शय्यासनेषु च॥ पुष्पमूलफलानां च कृच्छ्रं सांतपनं चरेत्॥ यस्य यस्य तु वर्णस्य वृत्तिच्छेदं समाचरेत्॥ अपहृत्य च वर्णानां भूमिं विप्रः प्रमादतः॥ प्रायश्चित्तं प्रवधे प्रोक्तं ब्राह्मणानमृतं चरेत्॥ कालत्वा धायकर्माणि सम्यक्कुर्याद्द्विधानतः॥ तदकुर्वं त्रिरात्रेण मासि मासि विध्यति॥ अनाहिताग्नो पित्रादौ यद्येमाणः कृतो यदि॥ सौहिव्रात्येन पशुना जपेत्तं निष्क्रियायतु॥ सुरालवण मद्यानां कृत्वा क्षीरस्य विक्रियं॥ लाक्षायाश्चैव मांसस्य तिलानां च घृतायवे॥ विक्रेता प्राणिनां चैव कुर्यात्कृच्छ्रं महाव्रतं॥ तैलप्रध्वादिसोमानं चरेच्चांद्रायणं व्रतं॥ दध्नश्चेक्षुरसस्यैव गुडखंडादिविक्रिये॥ सर्वेषां स्नेहपक्कानां प्राजापत्यं समाचरेत्॥ भक्ष्यान्नानां च सर्वेषां प्राजापत्यं समाचरेत्॥ उपवासं तु तक्रस्य नक्तं कांजिकविक्रिये॥ पुगीफलमातुलिंगद्राक्षाखर्जुरमेव च॥ एतेषां पादकृच्छ्रं स्याद्धान्यादीनां च विक्रिये॥ रौप्यादीनां महाहेम कार्पासस्यांबरस्य च॥ विक्रियं चित्रवस्त्राणां प्राजापत्यं समाचरेत्॥ कस्तूरीकादिगंधादिविक्रिये कृच्छ्रमाचरेत्॥ नीलं तु विक्रिये घस्रत्याद्दिदेशाव्रतं चरेत्॥ वातश्चाश्वतराणां च गजानां मैदवं स्मृतं॥ गोविक्रयं द्विजः कुर्यात्प्राजापत्यं समाचरेत्॥ चांद्रायणं प्रकुर्वीत एकाहोदेदविक्रिये॥ सर्वासामेव विद्यानां पादकृच्छ्रं समाचरेत्॥ कामतः परिवित्तिस्य रक्तं चरेदब्दं व्रतं द्विजः॥ तमाहेस्य तु कन्यां तां ज्येष्ठाय चोपपादयेत्॥ अज्ञात्वा परिवेत्तु कृच्छ्रमेव द्वयोः स्मृतं॥ अतिकृच्छ्रं चरेद्दाता होता चांद्रायणं चरेत्॥ अथागम्यागमने॥ रेतःसिक्त्वा कुमारीषु स्वये

निषंत्यजासु च॥ सपिंडापत्यदारास्त प्राजापत्यं विधीयते॥ व्रतस्थां विधवां गत्वा चाज्ञात्वात्र्यब्दमाचरेत्॥ गुरोर्दुहितरं गत्वा तथै
व मुनयो ब्रुवन्॥ चांडालीं पुंश्चलीं म्लेंछीं रक्तपां च भगिनीं सखीं॥ मातापित्रोः स्वसारं च निक्षिप्तां शरणागतां॥ मातुलां
नीं प्रव्रजीतां स्वगोत्रां नृपयोषितां॥ सखिभार्यां गुरोर्भार्यां भ्रातृभार्यां तथैव च॥ पितृव्यपत्नीं तनयां धात्रीं चैव गतस्य
च॥ आसां गत्वा द्विजो मोहात् षडब्दं व्रतमाचरेत्॥ कामतश्च सकृद्गत्वा द्वादशाब्दं व्रतं चरेत्॥ द्वितीये द्विगुणं प्रोक्तं तृतीये
त्रिगुणं स्मृतं॥ ज्ञात्वा तु कामतः कृत्वा हत्वा मेढ्रं निकृंतयेत्॥ अभ्यासात्कामतो गत्वा निष्कृतिर्नैव विद्यते॥ चांडालां
त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च॥ पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति॥ रजकश्चर्मकारश्च नटो बुरुड एव च॥
कैवर्तमेदभिल्लाश्च ह्यंत्यजाः सप्त कीर्तिताः॥ रजस्वलां द्विजो गत्वा त्र्यब्दं कृच्छ्रं समाचरेत्॥ कामतो कामतो विप्रः प्राजापत्यं
समाचरेत्॥ दिवा च गमनं विप्रः स्नात्वा तु वसेद्दिनं॥ अहोरात्रं तूपोष्यादौ प्राजापत्यं तु पर्वणि॥ ब्राह्मणीं ब्राह्मणो गत्वा
त्र्यब्दं कृच्छ्रं समाचरेत्॥ पशुवेश्यादिगमने प्राजापत्यं विशुध्यति॥ शूद्रादिगमने विप्रः प्राजापत्यं समाचरेत्॥ गर्भपातं स
कृत्कृत्वा शूद्रहत्याव्रतं चरेत्॥ शूद्रीं शयनमारोप्य ब्राह्मणो यात्यधोगतिं॥ तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते॥
अभ्यासे तु गुणावृद्धिर्मासादर्वाक् विधीयते॥ ततो मासगुणावृद्धिर्यावद्वत्सरो भवेत्॥ ततः संवत्सरगुणा यावत्तावत्तपः स
माचरेत्॥ तावत्कृच्छ्रं प्रकुर्वीत षडब्दं कामतश्चरेत्॥ ब्राह्मणी कामतो गच्छेत् क्षत्रियं वैश्यमेव च॥ गोमूत्रं यावकं मा
सार्द्धं तार्ध्यं च विशुध्यति॥ विप्राः शूद्रेष्यसंस्कारा न चेत्तस्मात्प्रसूयते॥ प्रायश्चित्तं स्मृतं तस्याः षडब्दं व्रतमुत्तमं॥ क्षत्रिये
द्रस्य संपर्के परं चांद्रायणत्रयं॥ चांद्रायणं चरेत्कृच्छ्रं चरेद्वैश्यास्य संगमे॥ शूद्रं गत्वा चरेद्वैश्या त्कृच्छ्रं चांद्रायणं॥ ८१

तकप्रायश्चित्तं॥ बाल्यात्प्रभृति यत्पापं अज्ञात्वा चोपपादितं॥ षडब्दे नैव शुध्येत महतः पातकात्ततः॥ उपपातकमभ्यस्तं महापा
तकतां व्रजेत्॥ द्वादशाब्दं व्रतेनैव तस्य शुद्धिस्तु नान्यथा॥ कृतोपवासो वसेद्गोष्ठे चर्मणा तेन संवृतः॥ चतुर्थे ह्नि हन्यश्नी
यात्क्षारलवणमतं॥ गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेंद्रियः॥ दिवानुगच्छेत्तां गास्तिष्ठन्नूर्ध्वं रजः पिबेत्॥ तिष्ठंतीष्वनु
तिष्ठेत व्रजंतीष्वप्यनुव्रजेत्॥ आसीनास्तु तथासीत नियतो जितमत्सरः॥ आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भ
येत्॥ पतितां पंकमग्नां वा सर्वप्राणैर्विमोचयेत्॥ उष्णे वर्षति शीते वा मारुते वाति वा भृशं॥ न कुर्वीतात्मनस्त्रा
णं गोरकृत्वा तु शक्तितः॥ अनेन विधिना यस्तु गोघ्नः समनुतां व्रजेत्॥ स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोह
ति॥ वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः॥ अविद्यमाने तत्सर्वं स्वं वेदविद्भ्यो निवेदयेत्॥ गर्भिणीं कपिलां दो
ग्ध्रीं होमधेनुं च सुव्रतां॥ खड्गादिना घातयित्वा द्विगुणं व्रतमाचरेत्॥ पादमेकं चरेद्रोधे पादबंधनमाचरेत्॥ योज
ने पादहीनं स्याच्चरेत्सर्वं निपातिते॥ पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात्॥ निपातयंति यो गास्तु कृच्छ्रं कु
र्युर्व्रतं हि ते॥ अत्यापनासनं दैवतगोश्चरति कथंचन॥ जलौघपल्वले मग्ना मेधीवध्युव्रता वपि॥ श्वपाकादपि ति
ना कस्माद्वापादर्वापि भक्षिता॥ प्राजापत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्तमं॥ शृंगभंगे अस्थिभंगे वा चर्मनिर्मोचने
तथा॥ प्राजापत्येन शुद्धिः स्यात्स्वछासा यदि गौ न वेत्॥ क्षतमुत्पादनं येन कुर्यात्स व्रणरोहणं॥ म्रियते नवति चेत्तेन
गोहत्या तस्य पुष्कला॥ अति दाहति वाहाभ्यां नास्ति बंधदने न वा॥ नदीपर्वतसंरोधे मृते पादं च माचरेत्॥ अ
स्थिभंगं गवां कृत्वा कटिभंगस्तथैव च॥ यदि जीवति षण्मासं प्रायश्चित्तं न विद्यते॥ एतदेव व्रतं कुर्युरुपपातके

त्तरं॥अनुलोम्येनकुर्वीतकृच्छ्रपादंचरेत्पितत्॥बालाञ्चयदिग्च्छीयान्मैथुनंपापकर्मभिः॥सकृत्कृतेसांतपनेकृच्छ्रमप्यवपेत्पुचि॥
कामतःशूद्रसंपर्कोह्यंत्यजैर्वातथैवच॥प्रविशेत्तंप्रदीप्ताग्नौमृत्युनाचविशुध्यति॥यत्पुंसःपरदारेषुसमानेषुगतंस्मृतं॥व्यभिचा
राद्यत्पुंसःस्त्रीतद्दोषंसमाचरेत्॥कथंचित्ब्राह्मणींगच्छेत्क्षत्रियोवैश्यएववा॥चतुर्वर्षषडब्दंवाप्रायश्चित्तंविधीयते॥शूद्रस्तुब्रा
ह्मणींगच्छेत्कथंचित्कामतोहितः॥द्वादशाब्दंव्रतेनैवतस्यशुद्धिस्तुनान्यथा॥कामतोब्राह्मणींगच्छेच्छूद्रोवाह्यंत्यजोपिवा॥प्रवि
श्येत्तंप्रदीप्ताग्नौमृत्युनाचविशुध्यति॥ ॥अथनानाविधप्रायश्चित्तं॥अग्निहोत्रापविद्धाग्निब्राह्मणःकामकारतः॥चांद्रायणं
चरेन्मासंबालहत्यासमंहितत्॥यावत्यश्चान्यतीतानिनिरग्निस्तुद्विजन्मनः॥तावत्कृच्छ्रंचरेत्सोम्यंविप्रेसर्वंसमर्पयेत्॥गोष्ठे
वसेद्ब्रह्मचारीमासमेकंपयोव्रती॥गायत्रीजाप्यनिरतोमुच्यतेसत्प्रतिग्रहात्॥त्रीणिकृच्छ्राणिचरेद्व्रात्ययाजकोपिचरन्नपि॥ब्रा
व्यंवदन्जीव्यमानःसत्यक्त्वाशरणागतं॥गुरुंहुंकृत्यत्वंकृत्यविप्रंनिर्जित्यवादतः॥बध्वावाचासमाक्षिप्यप्रसादाभोपवसेद्दि
नं॥प्राणायामजलेस्नात्वाखरयानोष्ट्रयानगः॥नग्नःस्नात्वाचभुक्त्वाचगत्वाचैवदिवास्त्रियं॥पतितांद्रव्यमादत्तेभुक्त्वावाब्रा
ह्मणोयदि॥कृत्वातस्यसमुत्सर्गमतिकृच्छ्रंविशोधनं॥विप्रद्दंडोद्यमात्कृच्छ्रमतिकृच्छ्रंनिपातने॥कृच्छ्रातिकृच्छ्रशात्त्यंतेकृच्छ्रं
मांतरशोणिते॥पथिचांडालकूपस्थंकुर्यात्सूर्यावलोकनं॥यदिसंभाषणंचैवगायत्रीतुकृत्तज्जपेत्॥द्विजःश्वांडालभांडः
स्थंसलिलंपिबतेयदि॥षण्मासंतुचरेत्कृच्छ्रंअर्द्धंमन्नस्यभक्षणे॥अज्ञानात्ब्राह्मणोभुंक्तेशूद्रस्यान्नमनातुरः॥तस्य
पापविशुध्यर्थंप्राजापत्यंत्रयंचरेत्॥ज्ञानाच्चेद्ब्राह्मणोभुंक्तेषण्मासंव्रतमाचरेत्॥अपेयानांचसर्वेषांप्राजापत्यंसमाचरे
त्॥शूद्रहस्तेनयोश्नीयात्पानीयंचापिबेत्कचित्॥अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति॥महापापोपपापाभ्यांयोभिशं

सेत्कृछ्रमपरं॥अभक्ष्याभक्ष्यमासीतसजापीनियतेंद्रियः॥ब्राह्मणस्यव्रणद्वारेपूयशोणितसंभवे॥कृमिरुत्पद्यतेयेनप्राय
श्चित्तंकथंभवेत्॥गवांमूत्रपुरीषेणदधिक्षीरेणसर्पिषा॥त्र्यहंस्नात्वोपवासेनस्वर्णदानेनशुध्यति॥स्त्रियःक्षीरंसकृत्पीत्वा
कथंचिद्यदिमोहितः॥पुनःसंस्कृत्यचात्मानंप्राजापत्यंचरेत्ततः॥ब्रह्मचारीनयोश्नीयान्मधुमांसंकथंचन॥प्राजापत्यंच
रेत्कृछ्रंभोजीहोमनशुध्यति॥सूर्योदयेतुयःसेव्यमन्नंवास्तगतेरवौ॥ब्रह्मस्तेनाबुभावेतुह्यहोरात्रोषितःशुचिः॥मिथ्या
भिषंसिनोदोषोद्विमासोष्मृतयादिनः॥मिथ्याशस्तंचदोषंचसमादत्तेमृषावदन्॥क्रोधादुत्कृत्यगम्यत्वंनायर्यितुनरः
कचित्॥प्राजापत्यंचरेत्कृछ्रंतस्यपापस्यशुद्धये॥विप्रस्योक्तोम्रषाभाषंकृत्वातुज्ञापथंमृषा॥ब्राह्मणोघातितोतेन
तीव्रंचांद्रायणंचरेत्॥भिक्षापात्रंगृहीत्वातुपुण्यमंत्रमुदीरयेत्॥प्रतिगृहेषुसर्वेषुष्पष्टाघं-चकाल्पयेत्॥चांद्रायणे
नशुध्येतसर्वोघोत्परिग्रहः॥कृत्वातस्यसमुत्थानंमतिकृछ्रोविषादने॥कृष्णाजिनचशय्यांचगगनमध्वरयंतथा॥लव
णंहिमुखीधेनुंगृहीत्वाव्यश्मांचरेत्॥व्रात्याचाजयनंकृत्वापरेषामंत्यचर्मच॥अभिचाहारादिहीनंचभिःत्रिभिः
कृछ्रैर्विशुध्यति॥शरणागतंसंत्यज्यवेदंविप्लाव्यतद्विजः॥संवत्सरंयावकाहारस्तत्पापस्यविशोधनं॥कन्यादूषी
चसोमस्यविक्रयीनास्तिकस्तथा॥मिथ्यासंशीकृतग्रंथश्चतस्यप्रत्यकप्रकारकः॥मातृपितृस्तुतत्यागीभार्यात्या
गीतथैवच॥असच्छास्त्राभिगातीचतडागारामविक्रयः॥अयाज्ययाजकश्चैवकिंवतःकूटकारकः॥तत्वद्याल
विशुध्यर्थंचरेत्संवत्सरव्रतं॥त्र्यार्कविड्वराहंचखरूनंयामकुक्कुटं॥पलांडुगृंजनंचैवमोहाज्जग्धात्तपेद्विजः॥अ
मत्यतोनिष्कृत्जग्धाकृछ्रंसांतपनंचरे॥चांद्रायणंयतीनांचशेषेद्भपवसेदपः॥संसर्गदृष्टयज्ञान्नक्रियादुष्ट

मकामतः॥ मत्वास्वभावदुष्टंचतप्तकृच्छ्रंसमाचरेत्॥ चांडालपतितानांचउच्छिष्टान्नंभक्षयेत्॥ विण्मूत्रदूषितेचैवकृच्छ्र
मेकंसमाचरेत्॥ माक्षिकंकाणिकंशाकंगोरसंलवणंघृतं॥ हस्तेदत्वानिभुक्त्वातुभोक्तासांतपनंचरेत्॥ अनिर्दिष्टोतिष्ठ
त्तिद्वारेह्यदत्वाश्रोत्रियोद्विजः॥ रुधिरंतद्भवेदन्नंभुक्त्वाचांद्रायणंचरेत्॥ अनाचालपिबेद्यस्तुभक्षयेद्यदिकिंचन॥ अ
पोशानमकृत्वातुभुक्त्वासांतपनंचरेत्॥ सूतिकाघस्तकयज्ञांडंस्पृष्ट्वालत्स्पृष्टिनाथवा॥ तत्स्थंभुक्त्वाद्विजोमोहात्रिरा
त्रेणवशुध्यति॥ चांडालपतितोदक्यावाक्यंश्रुत्वाद्विजोत्तमः॥ भुंजानोपिपिबेत्स्थंदिनमेकमभोजनं॥ यद्वाभोजन
कालेतुघस्तुचिःस्पृशालेद्विजः॥ अशित्वासर्वमेवान्नंत्रिरात्रेणवशुध्यति॥ शूद्रवेश्मनियोभुक्तेपानीयंवापि
बकंचित्॥ अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति॥ घृजहीनेतुयोभुक्तेनरस्त्वाकृतिपंचकं॥ पश्चाद्धूतेनयोभुंक्तेद्विज
श्चांद्रायणंचरेत्॥ सुरांसंस्पृष्टभांडेषुरेतोविण्मूत्रदूषिते॥ जलक्षीरा-पीतेसप्तकृच्छ्रंसमाचरेत्॥ विण्मूत्राद्युप
घातस्थाआपःप्राश्यद्विजोत्तमः॥ तस्यशुद्धिस्त्रिरात्रेणपुनःसंस्कारमर्हति॥ अंत्यजैःखनिताकूपाःतडागावातथै
वच॥ तत्रस्नात्वाचपीत्वाचप्राजापत्यंसमाचरेत्॥ स्पृष्ट्वास्पृष्ट्वाचमदिरांविधिवत्प्रतिगृह्यच॥ शूद्रोच्छिष्टाचपीतायः
कुशवारिबिबेत्यहं॥ अभोज्यान्नंद्विजोभुक्त्वात्रिरात्रेणोवशुध्यति॥ मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवच॥ निराहा
रस्यविप्रस्यनिषिद्धाचरणस्यच॥ अन्नंभुक्त्वाद्विजःकुर्यात्प्राजापत्यंचतुष्टयं॥ महापातकिनस्त्वन्नंकृतघ्नस्यत
थैवच॥ आरूढपतितान्नंचसगोत्राभर्तृरेवच॥ पाषांडिनांश्रितानांचयतेश्चैवतथैवच॥ अतिकृच्छ्रंसकृत्धर्ममधम

चांद्रायणंचरेत्॥ जातिभ्रंशादिकंपापंकृत्वान्यतरतेछया॥ चरेत्सांतपनंकृछ्रंप्राजापत्यमनिछया॥ पादेनब्राह्मणंहत्वा
प्रायश्चित्तंविधिछया॥ त्रिरात्रोपोषितस्नात्वाप्रणिपत्यप्रसादयेत्॥ नीलीरक्तंयदावस्त्रंब्राह्मणोंगेषुधारयेत्॥
अहोरात्रोषितोभूत्वापंचपंचगव्येनशुध्यति॥ रोमकूपयदागछत्तानील्यायस्तुकस्यचित्॥ त्रिवर्णेएषुचसा
मान्यंसप्तकृछ्रंविशोधयेत्॥ नीलीदारुयदाभिद्यब्राह्मणस्यशरीरतः॥ शोणितंदृश्यतेतत्रचरेच्चांद्रायणद्वयं॥
नीलीमध्येयदागछेत्प्रमादाद्ब्राह्मणःक्वचित्॥ त्रिरात्रोषितभुत्कापंचगव्येनशुध्यति॥ अपांक्तेयस्ययःकश्चित्
पंक्तौभुंक्तेद्विजोत्तमः॥ विनायज्ञोपवीतेनभुत्कादिनमभोजनं॥ अनापदिचरेद्यस्तुसिद्धंभिक्षांगृहेवसन्॥ प्रा
जापत्येनशुध्येतस्यापकालेद्विजोत्र्यहं॥ नपंक्तौविषमंदद्यानयाचेतनपादयेत्॥ प्राजापत्येनशुध्येतकृछ्रेणक
र्मणोमुचेत्॥ नदीतरणहर्तुश्चकन्याविघ्नकरस्यच॥ ~~नपंक्तौविषमं~~ समेविषमकर्तुश्चानिष्ठतेनेवशुध्यति॥ हो
मकालेतथादोहेस्वाध्यायेदारसंग्रहे॥ अंतरेणयदागछेद्द्विजःश्चांद्रायणंचरेत्॥ कन्यानांधनलाभानांबुध्या
विघ्नंसमाचरेत्॥ प्रत्यकप्राकृतकुर्यात्ब्रह्मचर्यंतुवार्षिकं॥ वेतनेकारयित्वातुपःपठेत्पावयतिद्विजः॥ द्विजश्चां
द्रायणंकुर्याद्द्विजःपापात्प्रमुच्यते॥ अनिर्वर्त्यमहायज्ञायोभुंक्तेप्रत्यहंगृही॥ अनातुरःसतिधनेचर्षत्र्यब्देन
शुध्यति॥ ब्रह्मचारीश्वनादष्टस्त्र्यहंसःपंथयःपिबेत्॥ गृहस्थंचद्विरात्रंतुवैकाहंयांठिनहोत्रवान्॥ नाभेरूर्ध्वं
चदष्टेव्रतरेवद्विगुणंचरेत्॥ स्यादेतत्रिगुणंप्रोक्तंवक्रमेकेचतुर्गुणं॥ रजस्वलायदादष्टाशुनाजुंबुकरास

यत्पापं यावन्नाख्याय पर्षत्ति॥ पर्षत्सहस्रसंख्यायापापेषु महत्तादिषु॥ उपपापिषु पंचाशत्स्वल्पस्वल्पात्तथार्धकेत्॥
पापप्रसंख्यापयेत्तीलादत्वाप्येषु तत्तयविषु॥ विख्याप्य पापं वक्तुभ्यः शक्त्यादत्वाव्रतं चरेत्॥ आर्त्तानां मार्गमापन्नानां
प्रायश्चित्तानि यो द्विजः॥ ज्ञानन्तो न प्रयच्छति गच्छति समतां नु ते।। मोहाद्वायदि वालोभाभयाद्वापितोपिवा॥ वदंस्तु
दुस्हेयेतु तत्पापं तेषु गच्छति॥ न्यायतो ब्राह्मणःक्षिप्रं क्षत्रियाद् क्षेनसः॥ अनरा ब्रूहिपं कृत्वा व्रतं सर्वसमादिशेत्॥
तथा शूद्रं समासाद्य सदा धर्मपरस्परं॥ प्रायश्चित्तं प्रदातव्यं जपहोमादिवर्जितं॥ कर्मनिष्ठस्तपोनिष्ठः कदाचित्पापभाग
तेः॥ जपहोमादिकं तेभ्यो वा शेषेण प्रदीयते॥ ये नाम धारकाविप्रामुर्खा धनविवर्जिताः॥ कृच्छ्रचांद्रायणादीनि तत्
त्यादद्या द्विशेषतः॥ राजा वा राजपुत्रो वा दन्ये वा द निस्ततः॥ भूमिदानादिकं तेभ्यः सत्केभ्यो षड्गुणं स्मृतं॥ विद्व
द्विप्रनृपस्त्रीणां निष्यन्ते केशवापनं॥ सतां महापातकिनां गोहंतुश्चानुवर्णिनां॥ ॥ इत्युपपातकप्रायश्चि
त्तप्रकरणं॥ अथ कृच्छ्रचांद्रायणादिलक्षणं॥ तत्र व्रतांगभूता ये नियमाश्चोच्यते बुधैः॥ ब्रह्मचर्यं दया क्षांतिर्दा
नं सत्यमलोपता॥ अहिंसास्तेयमाधुर्यं दमश्चेति यमा दश॥ स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः॥ नियमा
गुरुशुश्रूषा शौचाक्रोधाप्रमादता॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन चैकेन पादकृच्छ्रमुदाहृ
तं॥ तथा कथं चित्रिगुणः प्राजापत्योयमुच्यते॥ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः॥ प्रातस्तु द्वादश
ग्रासं सायं पंचदश त्वथ॥ अयाचिते तु द्वौ चाष्टौ पारातिरशनं स्मृतं॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा॥
अयाचिते षोडशाष्टावशक्तस्य उदाहृताः॥ कुक्कुटांडप्रमाणस्तु मयूरांडप्रमाणतः॥ ग्रासप्रमाणं विज्ञेयं तथा

८४

चास्य विशेषमुरवी॥ सायं प्रातस्तथैकैकं दिनद्वयमयाचितं॥ दिनद्वयं च नाश्नीयात्कृच्छ्रार्धं तद्विधीयते॥ एकैकं ग्रास
माश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्॥ अहं चोपवसेदंत्यमतिकृच्छ्रः प्रकीर्तितः॥ त्र्यहमुष्णं पिबेदापस्त्र्यहमुष्णं घृ
तं पिबेत्॥ त्र्यहमुष्णं पयः पीत्वा वायुभक्ष्यो दिनत्रयं॥ अथ तप्तकृच्छ्रशक्तः॥ तप्तक्षीरघृतांबूनामेकैकं प्रत्यहं
पिबेत्॥ रात्रौ हि वोपवासस्तु सप्तकृच्छ्रं समाचरेत्॥ क्षीरं तु द्विपलं तद्वद्घृतमेकपलं स्मृतं॥ जलं तु त्रिपलं ग्राह्यं
परिमाणं प्रकीर्त्तितं॥ कृच्छ्रातिकृच्छ्रः पयसा॥ दिवसानेकविंशतिः॥ द्वादशाहोपवासेन पराकः परिकीर्त्तितः॥ गो
मूत्रं गोमयं क्षीरं दधिः सर्पिः कुशोदकं॥ प्राश्य परेद्युरुपवसेत्कृच्छ्रं सांतपनं चरेत्॥ एकैकं प्रत्यहं पीत्वा त्वेकपवासः
स्ततः परः॥ सप्ताहेन तु कृच्छ्रोयं महासांतपनः स्मृतः॥ ॥ अथ गोमूत्रादिलक्षणं॥ ब्रह्मकूर्चोक्तं ज्ञेयं॥ पिण्या
कमिति तक्रांबुसक्तूनां प्रतिवासरं॥ एकमात्रोपवासश्च कृच्छ्रः सौम्योयमुच्यते॥ एषां त्रिरात्रमभ्यासादेकैकस्य यथा
क्रम॥ तुलापुरुष इत्येष कृच्छ्रः पंचदशाह्निकः॥ गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयं॥ स्तनयत्रास्त्रिरात्रं सप्तरात्रं स
न्नद्यात्॥ स्तनेनैकेन षड्रात्रं त्रिरात्रं वानभुग्भवेत्॥ एतत्सौम्यायनं नाम व्रतं कल्मषनाशनं॥ पर्णोदुंबरराजीवबि
ल्वपत्रं कुशोदकैः॥ प्रत्येकं प्रत्यहं पीत्वा पर्णकृच्छ्रमुदाहृतः॥ एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः॥ क्वथं पीत्वा
पिबेदद्भिः पर्णकृच्छ्रं विधीयते॥ पत्रैर्मतः परकृच्छ्रः पुष्पैस्तत्कृच्छ्रमुच्यते॥ फलैर्मासेन कथितः फलकृच्छ्रो मनीषि
भिः॥ श्रीकृच्छ्रः श्रीफलैः प्रोक्तो मासेनामकलैस्तथा॥ मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन वा॥ तिथिवृध्या
चरेत्पिंडाञ्छुक्ले शिख्यंडसंमितान्॥ एकैकं ह्रासयेत्कृच्छ्रे पिंडं चांद्रायणं चरेत्॥ हविष्यान्नं समश्नीयाद्वायत्र्या

भिसमंत्रितं॥ अमावास्या नश्नीतद्वा परस्त्रीषेवृपांस्पर्शेत्॥ धर्ममाने तथा सोमेयासवर्धंतिसेवद॥ तोयमाने च हीयं
ति एतञ्चांद्रायणं चरेत्॥ अष्टवृष्टे समश्नीयात् पिंडान्मध्यंदिनोस्थितः॥ नियतात्महविष्यस्य यतिचांद्रायणं चरेत्॥ चतुरः
प्रातरश्नीयात्पिंडान्विप्रः समाहितः॥ चतुरोस्तमिते सूर्ये शिशुचांद्रायणं चरेत्॥ त्रीस्त्रीपिंडान्समश्नीयान्नियता
त्मा दृढव्रतः॥ हविष्यान्नस्य वै मासमृषिचांद्रायणं चरेत्॥ यथा कथंचित् पिंडानां चत्वारिंशद्द्वयं स्मृतं॥ मासेनैवो
पभुंजीत चंद्रायणमथापरं॥ अनादिष्टेषु सर्वेषु शुद्धिश्चांद्रायणं स्मृतं॥ धर्मार्थं यश्चरेदेतच्चंद्रस्यैति सलोकता॥ ॥अथ
प्रत्यम्नायः॥ जन्मप्रभृति पापानि कृतानि सबहून्यपि॥ षडब्दैर्नैव शुध्यंति महापातकादृते॥ प्रत्याम्नायगवादेयं म
शीतिर्धेनिनुःशतं॥ दश लक्षाणि गायत्र्यास्तथाष्टौ व्रतमाचरेत्॥ प्राणायामसहस्राणि द्वादश त्रिगुणानि च॥
एवं नरविशेषेण प्रायश्चित्तं प्रकल्पयेत्॥ तिलहोमस्य लक्षं तु सहस्राण्यष्टशीतिच॥ प्रत्याम्नाय समागवो
दक्षिणा हि तथैव च॥ प्राजापत्ये तु शक्तो गां दद्याद्वै शुभलक्षणां॥ तदभावे तु निष्कं स्यात्तदर्धं पादमेव वा॥ विप्रा द्वाद
शाभावा ज्योउपवासास्तथैव च॥ पारायणं संहितायाः समान्याः कुर्मनीषिणः॥ कृच्छ्रादयायुतं चैव प्राणायामशतं
द्वयं॥ तिलहोमसहस्रं तु समान्याः कुर्मनीषिणः॥ उपवासस्तु गायत्र्याः सहस्रं विप्रभोजनं॥ प्राणायामशतं द्वौ च स
मभेतञ्चतुष्टयं॥ अतिकृच्छ्रः पराकश्च तप्तकृच्छ्रस्तथैव च॥ प्राजापत्यत्रयं चैव समेतञ्च चतुष्टयं॥ पुण्यतीर्थे चांद्र
शिरःशतं द्वादशसंख्यया॥ द्विजोजनतीर्थयात्रा प्राजापत्यं समं स्मृतं॥ चांद्रायणं त्रयः कृच्छ्रास्तागायत्र्याद्ययुतं त्र
यं॥ गोदानानि तथा त्रीणि समभेतञ्चतुष्टयं॥ गायत्र्यास्तु जपेत्कोटिं ब्रह्महत्यां व्यपोहति॥ लक्षमाशीतिजपे

तेः॥ पंचरात्रं निराहारः पंचगव्येन शुध्यति॥ प्रेतस्य प्रेतकार्याणि ह्यकृत्वा धनहारितः॥ वर्षाणायद्वहे प्रोक्तं तदर्धं प्रयत्नश्च
रेत्॥ बलाद्दासीकृता ये च म्लेच्छचांडालतस्करैः॥ अशुभं कारिता येन गवादिप्राणिहिंसनं॥ उच्छिष्टमार्जनं चैव तथा त
स्य च भोजनं॥ खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणं॥ तस्त्रीणां च तथासंगं ताभिः साकं च भोजनं॥ मासोषिते द्विजा
तौ हि प्रजापत्यं विशोधनं॥ चांद्रायणं पराकं च वससं वत्सरोषितः॥ ऊर्ध्वं संवत्सरात्कल्पं प्रायश्चित्तं द्विजोत्तमैः॥ संव
त्सरस्त्रिशुभिश्चैव सद्भावसंन्नियति॥ चांडालेन च संस्पृष्टं कांस्यभांडादिकं च यत्॥ तस्मिन् भुक्त्वा चरेत्कृच्छ्रं जल
पानं तु कृच्छ्रकं॥ चांडालश्वपचानां च संचरेत्समुपस्थिते॥ अहोरात्रो त्रिरात्रं स्यात्त्रिरात्रं षडहः स्मृतः॥ याघ्यं चटेम
पापूर्णपर्यसत्पनवहयं॥ अहोरात्रमुपासीत तस्थौ च बांधवैः सह॥ पतितस्योदकं कार्यं सपिंडैर्बांधवैः सह॥ नि
दितेहनि सायाह्ने ज्ञातिभिः ऋत्विग्भिः सह॥ निवर्तते ततस्तस्मात्संभाषणसहासने॥ दायादस्य प्रधाने च यात्रामेव च लौकि
कं॥ एवमेव विधिं कुर्याद्योषित्सु स्वपत्निस्वपि॥ शरणागतस्त्रीबालाघातकान्संदृभेन च॥ दशकाः[illegible]
[illegible]नपत्लेवरेत्॥ लेतुयः पापपक्तिचावक्ष्ययत्नतः॥ प्रायश्चित्तं न दातव्यं यन्न नोक्ता न निष्कृति॥ नयेनिसिंधिमा
त्रातियेनप्राणान्नियुज्यते॥ अर्त्तिवा महतियादिने वत्तद्व्रतमाचरेत्॥ ऊनैकादशवर्षस्य पंचवर्षात्परस्य च॥ चरेद्गुरुसु
हृद्वापि प्रायश्चित्तं विशुद्धये॥ मद्यमांसपुरीषाणां भक्षणे नास्ति कश्चन॥ दोषः स्यात्पंचमाद्वर्षादूर्ध्वं पित्रोः सुहृद्गुरोः॥ यत्र
स्थो कानि पानि कुर्याद्धि श्रवणायदि॥ शौचवक्षोधनं कुर्याद्वर्वाक्ब्राह्मणदर्शनात्॥ लघुदोषे त्वनादिष्टे प्राजापत्यं
समाचरेत्॥ ज्ञात्वा विषेषु दोषेषु शुद्ध्यै चांद्रायणं स्मृतं॥ कृतनिःसंशये पापे न भुंजीतानुपस्थितः॥ भुंजानो वर्ध

कृछ्रस्त्वेकस्तु कथितो होतुधैरपि॥ द्वादश द्विजभोज्यं च कृछ्रस्त्वेक उदाहृतः॥ त्रिंशद्वे विहिते कृछ्राते काद्धः परिकीर्तिताः॥ समुद्रगा
नदीस्नातमेकं स्यात्कृछ्रमेव हि॥ कृछ्रास्ते त्रिंशदेवाष्टाः कथ्यन्ते मुनिभिः सदा॥ षड्गुणीकृत्य तं चाद्रमेके कुर्तु पृथक्पृथक्॥ ष
डब्दविधिना कुर्यात्प्रायश्चित्तं चतुर्विधं॥ साशीति शतसंख्याकः कृछ्रस्त्वब्दस्य चैव हि॥ चतुर्विधानामप्येवं प्रायश्चित्तं विनिर्दि
शेत्॥ एवं कर्तुमशक्तश्चेद्यथावित्तानुसारतः॥ तीर्थानुगमने चैव स्नानहोमजपादिना॥ अत्रापि स्वशक्त्या दानानि कुर्यात्पापक्षया
य च॥ यथोक्तविधिना शक्तो वशक्तो च स्वशक्तितः॥ गां भूतिलं हिरण्याज्यं वासो धान्यं गुडानि च॥ रौप्यं लवणमित्याद्युद्दि
दानानि वै बुधः॥ सालंकृतां सवत्सां च सदक्षिणां पयस्विनीं॥ गां च दद्याद्दशक्तश्चेत्तन्मौल्यं वा स्वशक्तितः॥ निर्वर्तनमिता भू
मिर्द्रोणपात्रयमिता तिलाः॥ सुवर्णनिष्कपादं स्याद्द्रव्यं चैवाढकं स्मृतं॥ सूक्ष्मवस्त्रद्वयं चैव गुडं च फलमष्टकं॥ सार्ध
खारिद्वयं धान्यं व्रीहियुः परिकीर्तितः॥ निष्कत्रयमिदं रौप्यं लवणं सार्धखारिका॥ प्रमापादशदानानां कीर्तयंति मं
नीषिणः॥ बालवत्सकधेनूनां सहस्रं यत्र तिष्ठति॥ तद्दिं निवर्तनं ज्ञेयं इति शातातपोऽब्रवीत्॥ साशीतिशतलक्षं कृछ्रास्तुः एकाद
स्य च वेयता॥ षड्गुणीचकृतं वा तं षडब्दः परिकीर्तिताः॥ हिमांल्लस्नानधान्यानां समानं स्याच्चतुष्टयं॥ इत्यं कर्तुमशक्तश्चेदेके
कं वा पृथक्कृछ्रकं॥ यानि कर्तुं न क्रियते चैषामवशक्तश्च शक्तितः॥ सुवर्णं किंचिद्दत्वा यस्नानान्यपि समाचरेत्॥ कुर्यात्तस्याः
समर्थोपि यथावित्तानुसारसारतः॥ प्रत्याम्नायस्वरूपेण ताम्रकर्षकमासतः॥ निवेद्य कृतपापानि परिषित्सन्निधौ स्व
यं॥ अज्ञापितं तथा लब्ध्वा वपनादिकमाचरेत्॥ स्नात्वा प्राच्यां गगोदानं प्रायश्चित्तनिमित्तकं॥ आदाद्द्यात्तथा चान्ये पु
दीच्यां गनिमित्तकं॥ हवनं पंचगव्यस्य तत्तन्मंत्रपुरःसरं॥ कृत्वा व्याहृतिभिश्चैव तिलाज्यं जुहुयाद्द्या॥ प्रायश्चित्तं पंच
गव्यं प्रणवेनापिबेदतः॥ परिषदुक्तं यच्चेदं प्रायश्चित्तं समाचरेत्॥ पुनः परिषदं नत्वा समभ्यर्च्य स्वशक्तितः॥ संविग्रा ५६

प्यविनिर्मुक्तः पूतो भवति मानवाः॥ प्रायश्चित्तं षडब्दस्याद्युत्तमस्याधिकारिणः॥ द्विगुणं मध्यमस्याय त्रिगुणं चाधमस्य
तु॥ षट्कर्मनिरतो विप्रो उत्तमः परिकीर्तितः॥ वेदहारः कर्मनिष्ठो मध्यमः परिकीर्तितः॥ नीचसेवापरो वेदशून्यस्त्व
धमो हि सः॥ स्वज्ञात्वा ततो विद्वान्प्रायश्चित्तं विनिर्दिशेत्॥ कर्षमात्रसुवर्णस्य कृछ्र इत्यभिधीयते॥ तदभावे धर्मर्धं वा
गोर्गुंजात्रमेव वा॥ द्वादशाढकधान्यस्य कृछ्र इत्यभिधीयते॥ कृछ्रमेकं नदीस्नानं द्वादशो द्विजभोजनं॥ गुंजमात्रसुव
र्णं वा कृछ्रः सर्वत्र चैव हि॥ तदभावे यवा ताम्रं कर्षमात्रमथापि वा॥ षडब्दं ब्राह्मणस्योक्तं बाल्ये पृश्चत दर्धकं॥ जीवत्स्त्र
ममे वा हशानं द्विगुणमुच्यते॥ अस्तिनि त्रिगुणं प्रोक्तं पालाशो तु चतुर्गुणं॥ दानेभ्यस्तवत्तीप्रोक्ता यदुत्पन्नं स्वकृहिवै॥
द्विजः सवत्सरं वै कं यस्त्रीकाल्ताम्वितोऽश्रुते॥ दशहस्तेन दंडेन त्रिंशद्दंडविवर्तनं॥ निवर्तनैश्च तावद्भिर्गोचर्म परि
कीर्तितं॥ अथ धान्यपरिमाणं॥ पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः॥ आढकैश्च
तुर्भिश्च द्रोणस्तु कथितो बुधैः॥ कुंभो द्रोणद्वयं शूर्पखारिद्रोणास्तु षोडश॥ अथ सुवर्णपरिमाणं॥ जालसूर्यमरीची
स्थं त्रसरेणुरजः स्मृतं॥ ते ष्टौ लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते॥ गौरस्तु ते त्रयः षट्के यवो मध्यस्तु ते त्रयः॥ कृष्णलः प
ंचते माषः ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तिताः॥ द्वे कृष्णले रौप्यमाषो माषा षोडश चैव ते॥ शत
मानं तु दशभिर्धरणैः पलमेव च॥ निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रकः पणः॥ अन्य पक्षः॥ यवस्त्यास्त्सर्षपैः षड्भि
र्गुंजा चस्या त्रिभिर्यवैः॥ गुंजाभिः पंचभिश्चैकोमाषकः परिकीर्तितः॥ भवेत्षोडशभिर्माषैः सुवर्णस्ते पुनः स्मृताः॥ पलं सु
वर्णाश्चत्वारः पंच वा परिकीर्तितः॥ मानं तु लांगुलो प्रस्थः गुंजा पंचाथ माषकः॥ षोडशांस्ते कर्षस्त्रि पलं कर्षचतुष्टयं॥ भवे
इति श्री धर्मप्रवृत्तौ अब्दादिलक्षणं समाप्तं॥ ॥ अथ निमेषादिलक्षणमाह॥ अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्तितः॥

द्वोनिमिषोत्पृष्टिर्निमिद्वोत्पहिर्तुलवस्मृतः॥द्वौलृवोक्षणइत्युक्तः काष्टाप्रोक्ताक्षणादश॥त्रिंशत्काष्टाः कलाप्रोक्ता काल
त्रिंशन्मूहूर्तकः॥अहःपंचदशाःप्रोक्तामुहूर्ताःपूर्वसूरिभिः॥रात्राद्यपितथाप्रोक्ताअहोरात्रमितिस्मृतं॥द्विधात्रिधा
चतुर्धावापंचधादिनसंस्मृतः॥तत्रमध्याह्नतःपूर्वपूर्वाह्नस्तुस्मृतोबुधैः॥द्युमानस्यत्रिभागेनभास्करोदयतःक्रमात्॥
पूर्वाह्णश्चैवमध्याह्नोत्यपराह्णस्ततःपरः॥सायाह्नश्चैवप्रोक्तःचतुर्धादिवसस्यतु॥मुहूर्तत्रितयंप्रातःस्तावनेवहिसं
गवः॥मध्याह्नस्त्रिमुहूर्तस्स्यादपराह्नस्ततःपरः॥सायाह्नस्त्रिमुहूर्तस्स्यादित्येवंकथितंबुधैः॥आसायंवर्ततेया
चसातिथिःसर्वकर्मसु॥उदितोयत्रमार्तंडनखंडातितिवर्तते॥अखंडासातिथिर्ग्राह्यास्नानदानव्रतादिषु॥कर्म
यस्ययःकालःतत्कालव्यापिनीतिथिः॥तस्यकर्माणिकुर्वीतह्रासवृद्धिंनकारयेत्॥जन्मोत्याभ्यंगयानाद्वास्नानश्रा
द्धजपस्तुच॥तिथिस्तत्कालिकीग्राह्यापारणलेखनेतथा॥व्रतोपवासनियमेघटिकैकायदाभवेत्॥सातिथिः
सकलाज्ञेयापित्र्येचैवापराह्णिकी॥खर्वोदर्पस्तथाहिंसास्त्रिविधंतिथिलक्षणं॥खर्वदर्पौपरौपूज्यौहिंसास्यात्पूर्व
कालिकी॥खर्वोनामतिथिःसाम्यंदर्पोवृद्धिःप्रकीर्तिता॥हिंसास्यात्क्षयमित्युक्तंमुनिभिस्तिथिनिर्णये॥तिथिः
परस्याघटिकास्तुयास्युर्न्यूनास्तथैवाभ्यधिकाश्चतासां॥अर्धंवियोज्यंचतथाप्रयोज्यंह्रासेचवृद्धौप्रथमेदिनेतत्॥
क्षयावायौक्षयेब्राह्म्यासमसौरस्तथैवच॥कस्मिन्धर्मेलुकश्चैवान्विष्णुधर्मेषुयोधिकः॥ तत्रतावत्प्रतिपदादय
स्तिथयोनिर्णीयंते॥ तत्रस्मृतिः॥युग्माग्नियुग्मभूतानांषण्मुन्योर्वसुरंध्रयोः॥रुद्रेणद्वादशीयुक्ताचतुर्दश्या
चपौर्णिमा॥प्रतिपद्यप्यमावास्यातिथ्यायुग्मंमहाफलं॥व्यस्तमेतन्महादोषंप्रवदंतिमनीषिणः॥प्रतिपदा
तिथिनामादिदेवता॥ कालदर्शे॥ अग्निर्वाथविधिर्गौरीगणेशःफणिनातगुरुः॥ सूर्यःशंभुस्तथादुर्गायम ८७

जपेद्यस्तुपानात्प्रमुच्यते॥पुनातिहोमहंतारंगायत्र्यालक्षसप्तति॥गायत्र्याषष्टिभिर्लक्षैःपुनातिगुरुतल्पगः॥मंडलंपावमान्यत्रजपे
न्नित्यंहविष्यभुक्॥मासमेकंतुनक्ताशीशुद्धिर्ब्रह्मवधादृते॥इदमिंद्रमिदंसूक्तंमधुछिद्रेदमेवच॥सुरापानाद्विमुच्येतमासमेकं
तुयोजयेत्॥षण्मासंवत्सरंपापिजपतेनियताशनः॥जप्त्वातुपौरुषंसूक्तंमुच्यतेसर्वपातकैः॥नारायणंजपेद्यस्तुरुद्रैका
दशंतथा॥महापातकयुक्तोपिमुच्यतेनात्रसंशयः॥प्राणानामशतंकार्यंसर्वपापापनुत्तये॥उपपातकजानांतुयन्नादिष्टस्य
विवहि॥महाव्याहृतिहोमस्तुतिलैःकार्योद्विजन्मना॥उपपातकशुध्यर्थंसहस्रपरिसंख्यया॥निशायांवादिवावायदज्ञा
नकृतंभवेत्॥त्रैलोक्यसंध्याकरणात्तत्समस्तंप्रणश्यति॥वेदाभ्यासरतंशांतंमहायज्ञक्रियापरं॥नस्पृशंतीहपापानिम
हापातकिनंविना॥लोकंविलोक्यपाषांडतमसाकवलीकृतं॥प्रज्ञाभावघच्छिन्नश्रुतिस्मृत्यर्थभास्करं॥सन्मार्गच्युत
कुन्मार्गगामिनंचात्रदर्शनि॥पततंपापकूपेषुरामाभ्रांतिसमाकुलं॥अतस्तस्योपचाराययासंक्षिप्यंयत्नतः॥सन्वा
घमेकशास्त्राणांशास्त्रदीपःकृतोमया॥ ॥इतिप्रायश्चित्तप्रकरणंसमाप्तं॥ अथसप्तगोत्राणि॥ पितामातामहश्चैवतु
मातापभगिनीत्रयं॥श्वशुरेणचसंबंधोसप्तगोत्राःप्रकीर्तिता॥ अथैरकोत्तरशतकुलं॥ मित्रादीनांचसप्तानांएके
कस्यचतुर्दश॥मित्रस्वामिगुरूणांचकुलमेकोत्तरंशतं॥ मधुपर्कविषयं॥ द्विराचम्यसमासीनःकर्ताप्राङ्मुखोव
रः॥प्राङ्मुखंतुसमासीनंमधुपर्केणपूजयेत्॥मूर्खोयोबधिरस्तब्धश्छकुब्जोनपुंसकः॥कुष्ठीरोगीह्यपस्मारीदशदोषाः
प्रकीर्तिताः॥कुलशीलंवपुर्विद्यावयोवित्तंसनाथता॥गुणाःसप्तवरेयस्मिन्तस्मैकन्याप्रदीयते॥ अथाष्टलक्षण
माह॥ हिरण्यधान्यमन्नंचवस्त्रानंसामुद्गगास्तुच॥चतुर्विधानामेतषामष्टसंख्याप्रकीर्तिताः॥सालंकृतंतुगोदानं
तन्मोल्यंचत्रिनिष्कं॥हेमकर्षोभवेत्रिंशदष्टरत्तिकउदाहृतः॥द्वादशाढकधान्यस्यकुंभइत्यभिधीयते॥त्रिंशत्क

मीशंहरिस्मरं॥ शिवाचंद्रमसंचैवपक्कमात्यात्तिपदिद्विषु॥ शुक्लेकृष्णेपिवापक्षेविधिनापूरियेत्॥ ॥तत्रतावत्सं
वछरप्रतिपदादिनिर्णीयते॥ माघशुक्लप्रतिपच्चैत्रेमासस्यवछरस्यया॥ पूर्वविधानुकर्त्तव्याकर्त्तव्यापरसंयुता॥ नंदासंव
छरादौतुदद्यात्‌विधानकारयेत्॥ परविद्धाप्रकर्त्तव्याद्विमुहूर्त्ताभवेयदि॥ मुहूर्त्तपूरिकर्त्तव्याप्रतिपद्द्वितीयान्विता॥ याशु
क्लचैत्रेमासस्यावछरादिरितिस्मृता॥ मुहूर्त्तद्वितयंमुहूर्त्ता॥ यदिचापरा॥ वर्त्तनेवासरेयस्मिन्प्रातःसोधप्रतिभवेत्॥
अन्याच्च॥ प्रतिपद्दिखलुचैत्र्याशुक्लपक्षेभवेत्तांकथमपियदिवापेरौद्धौतदाभूत्तिसस्यात्॥ प्रथमइहमुनीद्रैःकीर्त्ति
तागर्गमुख्यैःशुपाचतिसत्तिडिंभेराज्यभाग्जेष्टएव॥ अथद्वितीयं॥ पक्षतिस्तिलकाव्रोकाकरवीरव्रतेहित्ता॥ साद्वि
तीयातथाश्वात्द्वितीयाप्रतिपद्युत्ता॥ पूर्वैकरसतिप्रातःपरेद्युस्त्रिमुहूर्त्तगा॥ साद्वितीयापरोपोष्यापूर्वविद्धातथान्यथा॥
तृतीया॥ रंभाख्यवर्जयित्वातुतृतीयांद्विजसत्तमः॥ अन्येषुपूर्वकार्येषुगणयुक्ताप्रशस्यते॥ चतुर्थी॥ गणनाथ
व्रतेग्राह्यातृतीयासहितासदा॥ चतुर्थीखन्यदेवस्यव्रतेग्राह्यापरान्विता॥ संकष्टचतुर्थीव्रतेत्तृतीयायुतागृह्यते॥ सिध्धि
विनायकव्रतेपरविद्धाचतुर्थीगृह्यते॥ अथपंचमी स्कांदे पंचमीसर्वदाकार्यापराद्वादश नाडिका॥ सानागचतुर्थीप्र
काव्रतेष्वन्येषुचारिता॥ कर्त्तव्याश्रावणेशुक्लात्रिमुहूर्त्तातुपंचमी॥ तन्न्यूनायदिचेत्पूर्वापंचमीशुभदानृणां॥ तत्रैवपू
र्वेयत्सपीनकभक्तादिकंचहि॥ अथषष्ठी नहिषष्ठीनागविद्धाकर्त्तव्यातुकदाचन॥ परविद्धाप्रकर्त्तव्याषष्ठीसर्व
व्रतेषुच॥ अथसप्तमी॥ सप्तमीपूर्वविधेवव्रतेषुसकलेषुच॥ अलाभेपूर्वविद्धायायापरविद्धापिगृह्यते॥ अथाष्टमी॥
शुक्लपक्षेष्टमीकार्यानवमीसहितासदा॥ नवमीसंयुतायाचकर्त्तव्यानकदाचन॥ अथनवमी॥ अष्टम्यासंयुता

कौ कार्या नवमी सर्वदा शुभा॥ दशमी संयुता वापि कर्त्तव्या सा च उत्कवित्॥ अथ दशमी दशमी तु प्रकर्त्तव्या नवम्या सहिता सदा॥
उदयव्यापिमी चेत्स्यात्यपत्तश्चपरहनि॥ अथैकादशी दशमीवेधरहिता कर्त्तव्यैकादशी सदा॥ गृहस्थैर्यतिभिश्चैव पक्षयो
रुभयोरपि॥ अथ द्वादशी॥ पूर्वविद्धा प्रकर्त्तव्या द्वादशी सर्वदा बुधैः॥ परविद्धापि वा कार्या यथायोगो भवेत्तथा॥ अथ त्रयो
दशी त्रयोदशी प्रकर्त्तव्या द्वादशी सहिता बुधैः॥ भृतविधान कर्त्तव्या शुक्लकृष्णपरान्विता॥ अथ चतुर्दशी॥ पौर्णिमासहि
ता कार्या कृष्णपक्षे चतुर्दशी॥ पूर्वविधानु कर्त्तव्या परविद्धा प्रशस्यते॥ कश्चिद्विशेषः॥ भविष्ये॥ माघश्रावणमासस्य शु
क्लापि हि चतुर्दशी॥ पूर्वविद्धैव कर्त्तव्या नान्या शुक्ला कदाचन॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमं॥ पूर्वविद्धे वसावित्री
व्रतं पंचदशी तिथिः॥ नाड्योष्टादश भूतास्तु यदि चेत्स्यात्परेहनि॥ तथा च चिंतामणौ॥ द्वितीया त्रिमुहूर्त्तेन नवमी याममा
त्रता॥ दशमी घटिकार्धेन तु दूषयन्त्युत्तरां तिथिं॥ नागा द्वादश नाड्याभिस्सूर्यश्चैव तु सप्तमी॥ भूतोष्टि दश नाडीभिः दूषयन्त्यु
त्तरां तिथिं॥ अभिश्च घटिकाभिर्या उक्तास्तास्तिथयस्त्विमा॥ पक्षयोरुभयोश्चैव दूषयन्त्युत्तरां तिथिं॥ उक्तास्तु घटिका यत्र
वर्त्तते तिथियश्चया॥ एता वै तिथयः कार्याः स्नानदानव्रतादिषु॥ प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रतेषु च॥ एकादशीं विना
सर्वाः शुक्ले कृष्णे समास्मृताः॥ मुहूर्त्तनिदिवानक्तं प्रवदंति मनीषिणः॥ नक्षत्रदर्शनान्नक्तमहमन्यगणाधिपा॥ प्रदोषव्या
पिनी न स्याद्दिना नक्तं विधीयते॥ तिथौ सत्यामथो नक्तं सदैवार्कदिने दिवा॥ आत्मनो द्विगुणा छाया मंदीभवति भास्करे॥
तं न नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनं॥ एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुंजीत क्रिया॥ कुर्यान्नक्तव्रती नक्तफलं भवति
निश्चितं॥ नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतं॥ एतद्दिनाष्टमी मागेतस्य रात्रौ निषेधतः॥ उदये तूपवासस्य नक्तस्या
स्तमये तिथिः॥ मध्याह्ने दृश्यते या च सैकभक्ते त्वयाचिते॥ ॥इति श्रीनारायणभट्टविरचितायां धर्मप्रवृत्तौ सामान्यति

लव्यापिनीतिथिः श्राद्धे कुतपोत्तपरान्हात्तव्यापिनीत्यर्थः॥ अस्यामेव तृतीयायां परशुरामोऽपि जातः॥ परशुरामजयंतीस्क
न्यते॥ ब्रह्मपुराणे॥ वैशाखमासि शुक्लायां तृतीयायां जनार्दनः॥ ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयेत्॥ यद्वानु
त्सादयामास रविमध्यंदिसति॥ प्रोक्ता परशुरामजयंतीति च सूरिभिः॥ भविष्योत्तरे॥ वैशाखस्य तृतीयायां श्रीसमे
तजगद्गुरुं॥ नारायणं पूजयेत धूपादीपादिलेपनैः॥ नारदीये॥ वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता॥ दुर्लभा
बुधवारेण सोमेनाथ युता तथा॥ रोहिणीबुधयुक्तापि पूर्वविद्धां विवर्जयेत्॥ भक्त्या कृतापि माधाता पुण्यं हंति
पुराकृतं॥ गौरीविनायकोपेता रोहिणीबुधसंयुता॥ विनापि रोहिणीयोगात्पुण्यं कोटिप्रदा सदा॥ पूर्वविद्धदिने द
त्तं यत्किंचित्पूजनं च वै॥ नैव गृह्णाति वैकुंठः पूजां तद्दिनसंभवां॥ इति परशुरामजयंती॥ ॥अथ नृसिंहज
जयंतीव्रतं॥ शुक्लपक्षे चतुर्दश्यां मासि माधवसंज्ञके॥ प्रादुर्भूतो नृसिंहोऽस्य तस्यां तां समुपोषयेत्॥ अनंगेन समा
युक्तां न सोपोष्य चतुर्दशी॥ पूर्णायुक्ता तु ता कार्या नृसिंहस्य च तुष्टये॥ यः करोति नरो मोहात्कामविद्धां चतुर्द
शी॥ धनापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेत्॥ चतुर्दशी न वर्तेत सायंकाले दिनद्वये॥ परे वर्तेत वापि कर्तव्या
सा तथैव च॥ स्पृष्टा परदिने नृस्यात्सायंकाले चतुर्दशी॥ कर्तव्या साम्यथाप्यूर्ध्वा नरसिंहप्रियातिथिः॥ ॥अथ
नागपंच॥ ॥श्रावणस्य सिते पक्षे पंचम्यां च नराधिप॥ द्वारस्योभयतो लिख्या गोमयेन विचक्षणः॥ पूजयेद्वि
धिवत्क्षीरदधिदूर्वांकुरैः कुशैः॥ गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥ एवं स्यां पूजयंती ह नागान्भक्ति
पुरःसराः॥ न तेषां सर्पतो वीर भयं भवति कुत्रचित्॥ ज्योतिः॥ षष्ठीयुक्ता सदा कार्या पंचमी नागपूजने॥ चतु ८९

र्थीसहितां सैव न कुर्यान्नैव कदाचन॥ नभसः पंचमी शुक्ला त्रिमुहूर्तयुता परा॥ एकभक्तव्रते ग्राह्या स्नाने चैव हि पूज
जने॥ नभसः पंचमी यत्र संगवत्यनुवर्तते॥ आसायं सा तिथिः प्रोक्ता स्नानदानव्रतार्चने॥ षष्ठीयुतायां पंचम्यां श्रा
वणस्य सिते यदा॥ पूजयेत्सन्नगान्सर्वान्मृन्मयान्पयसादिभिः॥ घृताक्तेनैव पयसा स्नापयित्वा महोरगान्॥
सर्वपापविनिर्मुक्तः सर्वान्कामानवाप्नुयात्॥ स्नात्वा नद्यां तु पूर्वाह्णे पंचम्यां नभसः सिते॥ वाग्यतः पूजयेत्सर्पान्
न च तस्य भयं भवेत्॥ कश्चिद्देशकुले शुक्लचतुर्थ्यामपि नागान्पूजयति॥ सा पंचमीयुतैव कार्या॥ ऊर्जशुक्ल
चतुर्थ्यां सैवोपोष्या तत्परे दिने॥ फणिनः पूजयेत्तत्र प्रसीदंति फणीश्वराः॥ चतुर्थीसहिता कार्या पंचमी कार्तिके
सिते॥ मध्याह्ने पूजयेत्सर्पान्गंधपुष्पाक्षतादिभिः॥ युगमध्ये दिने यत्र तत्रोपोष्य फणीश्वरान्॥ क्षीरेणाप्याय्य पंच
म्यां पारयेत्स रतो नरः॥ एतत्कार्तिकशुक्लचतुर्थीनागपूजनविषयं॥ ॥अथ जन्माष्टमी॥ ॥अष्टम्यां श्रा
वणमासि कृष्णपक्षे नराधिप॥ अर्धरात्रे जगन्नाथो देवक्यामवतारयत्॥ जन्माष्टमी जयंती च सैव प्रोक्ता महर्षि
भिः॥ उपोष्या भक्तियुक्तैश्च नरैः पक्षापकल्मषैः॥ अन्यत्र॥ श्रावणस्य तु मासस्य कृष्णाष्टम्यां नराधिप॥ रोहिणी
यदि लभ्येत जयंती नाम सा तिथिः॥ अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्॥ तस्यामभ्यर्च्य शौरिं च हंति पापं
पराकृतं॥ यः कृष्णा नाम्नि श्रावणे मासि ह्यष्टमी रोहिणीयुता॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः॥ तथा च॥
जयंती बुधवारेण सोमवारेण वा पुनः॥ लभ्यते दैवयोगेन तामुपोष्य महाफलं॥ अष्टम्यां रोहिणीयोगो मध्य
रात्रौ दिनद्वये॥ तदोत्तरैव कर्तव्या नैव पूर्वा कदाचन॥ स्कांदे॥ उदये चाष्टमी किंचिन्नवमी सकला यदि॥ भ

वेत्तुबधसंयुक्ताप्राजापत्यर्क्षसंयुता॥ अपिवर्षशतेनापिलभ्यतेवानवाविभो॥स्नानार्चनजपंदानंसर्वंतत्राक्षयंभवेत्॥
मध्यरात्रेतुयोगोयंयदाचेन्नभवेद्यदि॥जन्माष्टम्येवविद्धाङ्गिसमुपोष्यासदाबुधैः॥अर्धरात्रेभवेद्यावत्समारभ्यो
दयंरवेः॥अष्टमीयदिवर्त्ततेसैवोपोष्यासदाबुधैः॥दिनद्वयेऽर्धरात्रेतुवर्त्ततेयदिचाष्टमी॥परविद्धैवकर्तव्यापूर्वविद्धाप
रित्यजेत्॥अष्टमीमध्यरात्रेतुयदिनस्याद्दिनद्वये॥पूर्वविद्धापरित्यज्यपरविद्धाप्रशस्यते॥ ॥अथपारणा॥
जन्माष्टमीरोहिणीवाशिवरात्रिस्तथैवच॥पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणा॥अयंतीशिवरात्रिश्चकार्येभद्रा
जयान्विता॥कृत्वोपवासंतिथ्यांतेनदाकुर्यात्तुपारणं॥तिथ्यर्क्षयोर्यदाछेदोनक्षत्रांतमथापिवा॥अर्धरात्रेथ
वाकुर्यात्पारणंत्वपरेहनि॥श्रौतकर्मविहीनाश्चकुर्युस्तेपारणंनिशि॥निषिद्धंस्याद्यतेरात्रौपरन्नःपरणंभ
वेत्॥एतत्सन्यासविषये॥ दिवैवपारणंकुर्युर्गृहस्थापत्तयोपिच॥मोहाकुर्वंतियेरात्रौनलभेयुःफलंचते॥पार
णंतिथिभांतेचकुर्यादेकस्यवाक्षये॥अथान्यथापारणायांव्रतभंगमवाप्नुयात्॥याःसश्चितिथयःप्रोक्तापुण्य
नक्षत्रयोगतः॥ऋक्षांतेपारणंकृत्वाविनाश्रवणरोहिणी॥तिथ्यंतेचैवभांतेचपारणंयत्रचोदितं॥तिथ्यक्षरा
त्रपर्यंतस्यात्तांचेत्पारणंदिवं॥यामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणं॥तिथियामत्रयादर्वाक्तिथिभांतेत्वपार
णं॥ ॥अथगणेशचतुर्थी॥ ॥भविष्योत्तरे॥ मासिभाद्रपदेशुक्लेचतुर्थ्यामर्चयेन्नृप॥मृन्मयेनगणेशस्यरू
पंकृत्वाविधानतः॥नित्यकर्मसमाप्यादौकल्पोक्तविधिनार्चनं॥गंधपुष्पाक्षतैश्चैवमध्याह्नेदेवमर्चयेत्॥ तथा
चतत्कल्पे॥ एकविंशपत्रं॥ चामीभृंगकबिल्वदूर्वाबदरीधत्तूरीकंसारसापामार्गबृहतीशमीचकरवीरस्मोतक

थिनिर्णयः॥ ॥मासयुक्ततिथयोविशेषेणनिर्णीयंते॥ पूर्वमेवसंवत्सरप्रतिपन्निर्णीता॥ ॥अथगौरीतृतीयास्कंदे॥ ॥चै
त्रशुक्लतृतीयायांगौरीतावत्प्रपूजयेत्॥यावन्मासोभवेन्नित्यंनारीपतिव्रतेसदा॥ज्योतिःसारे॥चतुर्थीसहितायातुसातृतीया
फलप्रदा॥अव्यथैवकरीस्त्रीणांपुत्रपौत्रप्रदायिनी॥माधवियो॥रंभातृतीयापूर्वस्यादुत्तरास्याद्वतंचरेत्॥शुद्धाधिकायाम
प्येवंगणयुक्प्रशस्यते॥ अथरामनवमी॥ ॥चैत्रशुक्लनवम्यांतुरामस्यजननंभवेत्॥ तत्रोमध्याह्नवेलायांसंजाताहि
जगत्पतिः॥ज्योतिः॥नवमीचाष्टमीविद्धात्याज्यारामपरायणैः॥उपोषणंतुनवम्यांतुदशम्यामेवपारणं॥श्रीरामजन्मन
वमीसंपूर्णफलदासदा॥खंडाचेत्परविद्धैवकर्तव्यानुविशेषतः॥द्वयोर्मध्याह्नयुक्ताचेन्नोपोष्यात्पूर्वसंयुता॥परविद्धै
वकर्तव्यामध्याह्नव्यापिनीसदा॥ अक्षयतृतीय॥ सात्रेतायुगादिः॥ तथाचहेमाद्रौ॥ उर्जेराधेसितेमाघभाद्रकृष्ण
कृतादयः॥नवमीतृतीयादशमीत्रयोदशीषनुक्रमात्॥राघोवैरवः॥स्मृत्यर्थसारे॥द्वेचशुक्लेद्वेचकृष्णेयुगादिवया
विदुः॥शुक्लेपूर्वाह्निकीयास्याकृष्णेचैवापराह्निकी॥शुक्लेपूर्वाह्निकीयाह्यतिमध्याह्नात्पूर्वाशुक्लायुगादिश्राद्धमार
भेत्॥कृष्णेतुमध्याह्नादुपरिअपराह्नएवस्यर्थः॥आरभेत्कुपतेश्राद्धसर्वत्रैपित्र्यकर्मापि॥आदौशुक्लेद्वयाचांतेयुगाद्यो
रभिसितेतथा॥ज्योतिः॥वैशाखस्यतृतीयायांपूर्वविद्धांकरोतिवै॥हव्यंदेवानगृह्णंतिकव्यंचपितरस्तथा॥पूर्वविद्धा
दिनेदत्तंपितृणांनोपतिष्ठति॥यथाकालेतुयद्दत्तंपितृणामुपतिष्ठति॥यथाकालेइत्यपराह्नकालः॥तृतीयाह्नद्वयेशुक्लाम
ध्याह्नव्यापमाधवे॥प्रथमेवतदाकार्यानिष्फलातुपरास्मृता॥मन्वादौचयुगादौचव्यष्टकासुतथैवच॥श्राद्धेषुदद्या
त्कुर्यात्तिथ्यादौचैवमेवहि॥व्यतीपातेचवैधृत्यांयुगमन्वंतरादिषु॥तत्कालव्यापिनीकुर्यात्पूर्वाचाप्यथवापरा॥तत्का

तुल्याचेत्प्रतिपच्चित्रावैधृतिश्चापिवायदि॥ कलशस्थापनंकुर्यात्हित्वाचित्रांतुवैधृतिं॥रवेरस्तमयादर्वाक्विधिरेषसमाहितः॥
नोचेद्दिवैवकुर्वीतकलशस्थापनंबुधः॥प्रतिपत्स्वल्पमल्पापियदिनस्यात्परेहनि॥अमायुक्तातदाकार्यत्यक्त्वाषोडशना
डिकाः॥ घटिकाषोडशत्याज्याआद्याःप्रतिपदस्तुयाः॥ कलशस्थापनंकार्यमभिष्टंजायतेध्रुवं॥ पूर्वेनुविद्धमानंतुनवरा
त्रस्यपूजनं॥ नंदयामेवकर्त्तव्यंदेवसंस्थापनंबुधैः॥पारंपर्यगतंकार्यंदेव्याःशरदिपूजने॥प्रतिपद्येवकर्त्तव्यंनवान्यत्र
कदाचन॥ नास्तिपूजाकुलेयस्यशक्तेःशरदियस्यचित्॥ कर्त्तुंनोतानिकापूजांलुप्यतेभक्तिमान्नरः॥ चित्रावैधृ
तियुक्तांचेदर्शयुक्तामपित्यजेत्॥सुदिनेपूजनंदेव्याःकुर्यान्मूलतनपूजकाः॥ कार्यासमाप्तिरष्टम्यांप्रतिपदूर्ध्वतेया
दि॥क्षीयतेमायुतायांवेनवरात्रंभवेत्तदा॥ ॥इतिप्रतिपन्निर्णयः॥ प्रारब्धेसूतकंचेत्कथंभवेत्॥विश्वरूपे॥आश्वि
नस्यासितेपक्षेप्रारब्धेनवरात्रके॥ यदिस्यात्सूतकंतत्रक्रियाकार्याकथंबुधैः॥सूतकंवर्त्तमानंचेत्तत्रोत्पन्नंयदाभवेत्॥
देवीपूजाप्रकर्त्तव्यामंत्रैर्यंत्रविधानतः॥सूतकेपूजनंप्रोक्तंदानंचैवविशेषतः॥देवीमुद्दिश्यकर्त्तव्यंतत्रदोषोनविद्यते॥
प्रारंभात्प्राक्समारब्धंयदिचेत्सूतकंभवेत्॥ नत्यजेत्पूजनंदेव्याः॥कारयेद्द्विजहोत्रवत्॥ ॥अथनवरात्रविधि
रभीधीयते॥ ॥दुर्गार्चने॥ प्रातरभ्यंजनंदायांकृत्वापुण्याहवाचनं॥ ऋत्विजोवेदसंपन्नान्॥ कृत्वादेवीप्रपूज
येत्॥ऋत्विग्भ्यस्ततोदद्यादित्युक्त्वाक्षतफलं॥ मयाकर्मण्येकपकांतेऋत्विकंभवमेकृतो॥ स्तोत्रंदेव्यास्तथासू
क्तंदुर्गाख्यंमंत्रमेवच॥सूक्तंचाथप्रियोमंत्रंमृत्युंजयाख्यमेवच॥ आदित्यादिग्रहाणांचगणेशक्षेत्रपालयोः॥ज
पन्मेत्रान्ययाशक्त्याकारयेद्द्विजवाहिजैः॥कर्त्तव्यःकारयितव्योजपेन्मंत्रादिकाश्चवे॥ स्वेनैवब्राह्मणैर्वापिलेके
कःकोटिरुच्यते॥त्रिकालेपूज्ययेद्देवीजपस्तोत्रपरायणः॥ कुमारीश्चतथाविप्रान्भोजयेत्प्रतिवासरं॥एकैको

पूजयेत्कन्यामेकवृध्यातथैवच॥ द्विगुणांत्रिगुणांवापिनवकंचवा॥ एकवर्षातुयाकन्यापूजार्थंतांपरित्यजेत्॥ गंधपुष्पफला
दीनांप्रीतिस्तस्यानविद्यते॥ द्विवर्षकन्यामारभ्यदशवर्षावधिक्रमात्॥ पूजत्सर्वकार्येषुयथाविधिक्तमार्गतः॥ अवाहनस
नेपाद्येवस्त्रगंधाक्षतादिभिः॥ धूपदीपफलैश्चैववपैंतांबूलैःप्रतिवासरं॥ यावन्नंदासमारभ्यनवमीमहतीभवेत्॥ ता
वदेवहिकर्त्तव्याजयपूजादिकाःक्रियाः॥ ॥इतिनवरात्रविधिः॥ अथनवमिविधिःसूर्यनिबंधे॥ अश्वयुक्शुक्ल
नवमीह्यष्टमीमूलसंयुता॥ सामहानवमीतस्यांजगन्मातरमर्चयेत्॥ तथाचस्मृतिचंद्रिकायां॥ शुक्लाष्टम्याश्विनेमा
सियामूलर्क्षेणसंयुता॥ सामहानवमीप्रोक्तासापिचात्यंतदुलभं॥ नवम्यावर्तते ग्राह्यापूर्वतःपरतोपिवा॥ तत्प्रति
तिपदादिस्याल्लवदुर्गार्चनेविधौ॥ विधिनानवदुर्गाश्चक्रमात्प्रतिपदादिषु॥ तितिषावर्ते नाद्यस्तुनवम्यांतेसुपू
जयेत्॥ तिथिप्रयुक्तापूजायातिथिर्वावर्ततेनहि॥ साचिपूर्वातिथिप्रोक्तासमत्तात्पूर्ववासरे॥ आवर्तनद्वयेतत्र
तिथिरकाभवेद्यदि॥ सातिथिःपरतोग्राह्यापूर्वेहव्यसुचानवा॥ नवम्यांचजपंहोमंसामर्थ्यविधितद्बलिं॥ अन्यथा
कुरुतेयस्तुपुत्रदारधनक्षयं॥ सूर्योदयेपरेरिक्तापूर्णास्यादपरायदि॥ बलिदानंप्रकर्तव्यंतत्रदौर्गाःशुभावहः॥
अष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत्॥ प्रभातेबलिदानंचकिंचिन्मात्रापिलभ्यते॥ ॥दुर्गार्णवे॥ आश्वि
नेस्यसितपक्षेनवमीयाष्टमीयुता॥ सायाद्यापूजनेद्व्याहोमेयाप्यापरान्विता॥ नवम्यांपूर्वविधायांहोमंयःकु
रुतेयदि॥ वित्तापत्यकलत्रादिनाशायच्चकुलंयतः॥ सूर्योदयेयदानस्यानवमीचापरेहनि॥ तदाष्टम्यायुताका
र्यानवमीभरतर्षभा॥ संगवेयदिवर्तेतनवमीचापरेहनि॥ होमंतत्रैवकुर्वीतबलिदानादिनादिकंचयत्॥ तथा
चार्णवे॥ मुहूर्तादनुवर्त्तेतनवमीयदिचेत्परे॥ प्रारभ्यापररात्रेतुहोमंतत्रेसमापयेत्॥ कुंकुमारक्तमन्नेनबलि ९३

दद्याद्विधानतः॥ पूर्वतो दिक्षु सर्वासु तत्तन्मंत्रेण वै क्रमात्॥ ब्रह्माणं पूजयेद्भक्त्या वस्त्रालंकारभूषणैः॥ ऋत्विग्भ्यो
दक्षिणा दद्याच्छ्रेयः संपादयेत्ततः॥ संपूज्य देवतां सम्यक् कुमारीश्च सुवासिनी॥ पूजयेद्गंधपुष्पैश्च वस्त्रालंकारकंचुकैः॥
श्रेयः फलं समासाद्य देव्याः पुरतः स्थितः॥ कृतं दत्तं च यद्द्रव्यं तत्सर्वं विधिवेद्देशयेत्॥ यजमानः सपत्नीकं सुतभ्रातृसमन्वि
तं॥ कलशस्थोदकेनैव मार्जयेच्चूतपल्लवैः॥ ब्राह्मणा अभिषिंचेयुर्वेदमंत्रैर्यथाविधि॥ कुमारीं ब्राह्मणांश्चैव भोज
येत्सुवासिनीः॥ दीनांधकृपणांश्चैव भुंजीयात्सह बंधुभिः॥ इत्येवं यः कुरुते मर्त्यः पूजनं प्रतिवत्सरे॥ यं यं कामय
ते कामं देवी तस्मै प्रयच्छति॥ तस्मात्सर्वप्रयत्नेन पूजनीया मनीषिभिः॥ इति नवरात्रप्रकरणं समाप्तं॥ ॥अथ विज
यदशमी॥ ॥आश्विने दशमी शुक्ला श्रवणेन समन्विता॥ विजया दशमी प्रोक्ता सा वै वात्यंतदुर्लभा॥ ज्योतिः॥
आश्विनस्य सिते पक्षे दशम्यां तारकोदये॥ स कालो विजयो ज्ञेयः॥ सर्वकामार्थसिद्धये॥ ईषत्संध्यामतिक्रांतः किंचिदु
द्भिन्नतारकः॥ विजयो नाम कालोयं सर्वकार्यार्थसाधकः॥ आश्विनस्य सिते पक्षे सर्वशास्त्रेषु जायते॥ सायंकालस्तु
मायाजा दिवा वा विजयाक्षणे॥ एकादशो विजयो मुहूर्तः॥ तथा च स्मृत्यर्थसारे॥ दशम्यां तु नरैः सम्यक् पूजनीया
पराजिता॥ ऐशानीं दिशमाश्रित्यापराह्णे प्रयत्नतः॥ सायंकाले यदा न स्याद्दशमी चापरेहनि॥ नवमीसंयु
ता कार्या सर्वदा जयकांक्षिभिः॥ नवमीशेषसंयुक्ता दशम्यां विजयोत्सवः॥ कृतरामत्वमित्युक्तं वसिष्ठेन महात्म
ना॥ नवमीयुतायां दशम्यां प्रस्थानं च न कार्यं॥ ज्योतिः॥ या पूर्णा नवमीयुक्ता तस्यां पूजा यथारान्विता॥ क्षेमार्थं
विजयार्थं च प्रयाणं विधिना नरैः॥ आश्विनस्य तु शुक्लपक्षे तु दशम्यां पूजयेन्नरः॥ एकादश्यां न कुर्वीत पूजनं चापराजि

त॥स्कांदे॥ दशमींयःसमुल्लंघ्यप्रस्थानंकुरुतेनृप॥ तस्यसंवत्सरंराज्यंनक्वापिविजयीभवेत्॥दशमीमभ्यर्च्यनत्वेशं
यात्रानिर्विघ्नसिद्धये॥वास्तुलादिहित्वाथदिक्षुप्रस्थानमारभेत्॥ प्रस्थानविषयेश्लोकउत्सवादिकंपरिविधाय
नैवकार्यं॥ ॥तदुक्तंपुराणसमुच्चये॥ इषस्यदशमीकृष्णापूर्वविध्यांपरित्यजेत्॥श्रावणेनापिसंयुक्ताराज्ञाय
द्गाभिषेचने॥ ॥तथाचस्कांदे॥ एकादश्यांयुतायांचदशम्यामुत्सवादिकं॥ शुक्लायामाश्विनेमासिकुरुत्वंभर
तर्षभ॥सूर्योदयेयदाराजन्दृश्यतेदशमीतिथिः॥ आश्विनेशुक्लपक्षेतुसाभवेद्विजयप्रदानृणां॥ निषिद्धेपिचकर्त्त
व्यंतैलाभ्यंगनमादरात्॥अश्वनामपिकर्त्तव्यंतैलस्नानंनदीजले॥ इतिविजयदशमीनिर्णयः॥ ॥अथदीपा
वलीकथ्यते॥ ॥भविष्योत्तरपुराणे॥ आश्विनस्यासितेपक्षेचतुर्दश्यांविधूदये॥ स्नातव्यंतिलतैलेननरेनंरक
भीरुभिः॥विधूदयेयदानस्यात्तदेषाकृष्णचतुर्दशी॥जयान्वितायोरिक्तायांनस्नायाद्विधूदये॥ त्रयोदशीयुतायां
चचतुर्दश्यांतुवैपरे॥ विधूदयेनरःस्नायान्नरकंनैवपश्यति॥विधूदयेत्रयोदश्यांभवेद्यदिचतुर्दशी॥ नार
कीतिसवःप्रोक्तायाश्विनस्यापरेबुधैः॥अनभ्यतिलतैलेन नरक्याचररात्रिभिः॥मुमुक्षुभिःसकामैश्चसर्वैरपिम
हामुने॥इंदुक्षयेपिसंप्राप्तेवारणंतद्दिनक्षये॥तत्राभ्यंगमदोषायप्रातःपापापनुत्तये॥ अपामार्गंभ्रामयित्वाय
कुर्याद्यमतर्पणं॥ नरकायप्रदातव्योदीपःसंपूज्यदेवताः॥उषासितचतुर्दश्यांमिंदुक्षयतिथावपि॥कुजादौ
स्वातिसंयुक्तेतदादीपावलीभवेत्॥तैलेलक्ष्मीर्जलेगंगादीपावल्यांतथाभवेत्॥ अलक्ष्मीपरिहारार्थमभ्
यंगस्नानमाचरे॥ अपामार्गाश्विनेमासिपितृकर्मविधायच॥ दीपदानंततःकुर्यात्प्रदोषेचतथोल्मुकं॥नी
राजनद्वितीयेन्हिप्रातःकालेविधीयते॥ तत्रैवविधिनाकार्यंसुरभीणांचपूजनं॥ प्रतिपत्परविधायास्यासाह

पूजनेगवां॥नीराजनोत्सवेभ्यंगोदर्शविद्धांपरित्यजेत्॥ दर्शविद्धाग्रहीतव्याप्रतिपत्पूजनेगवां॥परविद्धाप्रशस्तास्याद
भ्यंगादिमहोत्सवे॥नंदायामुदयेभ्यंगेकृत्वानीराजनंततः॥सायंकालेपिकर्त्तव्यास्त्रिभिर्मंगलमालिका॥मुहूर्त्तंवर्त्तते
दर्शोमांगल्यंतद्दिनेभवेत्॥वित्तापत्यंकलत्रादितत्सर्वंनश्यतिध्रुवं॥अथचेत्प्रतिपत्स्वल्पाभवेद्वृद्धिपरेहनि॥द्विती
यायांतदाकार्यासायंमंगलमालिका॥मुहूर्त्तमपिवर्त्ततप्रतिपत्कार्त्तिकेसिता॥उत्सवादिककृत्येषुकर्त्तव्याशुभकां
क्षिभिः॥प्रतिपत्स्वल्पमल्पापियद्दिनेस्यात्परेहनि॥पूर्वविद्धातदाकार्यासितपक्षेचकार्त्तिके॥परदिनेभवत्स्वातील
स्मिन्नेवदिनेतुवै॥स्वातीप्रयुक्तामभ्यंगंकर्त्तव्यंशुभकांक्षिभिः॥स्वात्यादौमंगलस्नानंसर्वदामंगलप्रदं॥मध्येतुमध्य
फलदंमलेस्यादशुभंतदा॥अभ्यंगयेनकुर्वीतयदिस्वातीनिमित्तकं॥नमांगल्यंभवेत्तेषांयावत्स्याद्वत्सरंध्रुवं॥दीपावली
तिसंज्ञास्यभूतादित्रिदिनंक्रमात्॥द्विजातिभ्योभवेद्दत्तंसर्वंतत्राक्षयंभवेत्॥ तथाचभारते॥योयादत्तेनभावेनतिष्ठत्य
स्यांयुधिष्ठिर॥ हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिहि॥ ॥इतिदीपावलीनिर्णयः॥ अथदीपावलीस्कंदषष्ठी॥ उ
पोष्यंपंचमीशुक्लामार्गशीर्षेनराधिप॥पूजयंतीहयेषष्ठ्यांशिवलोकंव्रजंतिते॥स्कंदोपवासेस्त्रीकार्यापंचमीपूर्वसं
युता॥चतुर्थ्यासंयुतायान्नकर्त्तव्याकदाचन॥मार्गशीर्षेसितेपक्षेकर्त्तव्यास्कंदपूजने॥त्रिमुहूर्त्तातुयाषष्ठीपरासे
वान्यथापुरा॥स्कंदषष्ठीतुकर्त्तव्यापंचम्यासहिताबुधैः॥उपवासेसदाप्रोक्तापरास्कंदस्यपूजने॥सप्तम्यासहिताया
चषष्ठ्यांस्कंदंप्रपूजयेत्॥पारणंतत्रकर्त्तव्यंब्राह्मणैःसहबंधुभिः॥ तथाचस्कांदे॥ मार्गशीर्षेतुयाशुक्लाषष्ठीकेशा
ततारका॥चंपाख्यास्कंदषष्ठीस्यादुपैंत्तरापापनाशनी॥आषाढेशुक्लषष्ठ्यांस्कंदंकेचित्पूजयंति॥ ॥अथरथसप्तमी॥

माघमासस्थितेपक्षेसप्तमीस्यद्द्वयस्यतु॥ तत्रस्नानंचदानंच॥ तत्सर्वमक्षयंभवेत्॥ सप्तमीमाघमासस्यशुक्लायाचाष्टमी
युता॥मुहूर्त्तमपिकर्त्तव्यास्नानदानजपादिषु॥माघस्यशुक्लपक्षेतुसप्तमीयात्रिलोचना॥अजयंतीनामसाप्रोक्तासर्व
पापहरा२तिथिः॥ स्मृतिचंद्रिकायां॥ सूर्यग्रहणतुल्यांतुशुक्लामाघस्यसप्तमी॥अरुणोदयवेलायांतत्रस्नानम
हाफलं॥ तथाचस्कांदे॥ रविवारेणयुक्तायांसप्तम्यामरुणोदये॥पुनस्तत्रसितेमाघेभास्करंयस्तुपूजयेत्॥नरोगान
भयंतस्यनापमृत्युर्नचापदः॥सर्वान्कामानवाप्नोतिसूर्यलोकंसगच्छति॥ ॥इतिरथसप्तमी॥ ॥अथशिवरात्रिः॥
पुराणे॥ कृष्णपक्षेपरेयातुमाघमासेचतुर्दशी॥शिवरात्रिरितिप्रोक्तामहापापविनाशिनी॥यद्यर्धरात्रपर्यंतंभवेद्दि
नचतुर्दशी॥सूर्योदयंसमारभ्यसैवोपोष्यसदाबुधैः॥अर्धरात्रेयदानस्यान्माघेशिवचतुर्दशी॥त्रयोदश्यायुताकार्या
नरैःशिवपरायणैः॥ तथाचस्कांदे॥ भवेद्यत्रत्रयोदश्याभूतव्याप्तामहानिशि॥शिवरात्रिव्रतंतत्रकुर्याज्जागरणानि
शि॥दिनद्वयेपूर्वरात्रेवर्तितयाचतुर्दशी॥परेवसाप्रकर्त्तव्यानवैपूर्वाकदाचन॥दिनद्वयेयदानस्यान्मध्यरात्रेचतु
र्दशी॥तथापूर्वापरित्याज्याकर्तव्यासानरैःपरा॥ इतिमहाशिवरात्रिः॥ प्रतिमासेपिकर्त्तव्याकृष्णपक्षेचतुर्दशी॥
प्रदोषव्यापिनीचैवपूर्वावायदिवापरा॥ शिवपुराणे॥ प्रदोषव्यापिनीग्राह्याशिवरात्रिःशिवप्रियैः॥रात्रौजागरणंय
स्मात्तस्मात्तांसमुपोषयेत्॥ त्रयोदश्यास्तगेसूर्येचतसृष्वेवनाडिका॥ भूतविद्धातुयातत्राशिवरात्रिव्रतंचरेत्॥प्रदो
षव्यापिनीग्राह्यासाकार्याचचतुर्दशी॥शिवरात्रिव्रतेपूर्वाकर्तव्यासान्यथापरा॥दिनद्वयेयदामासशिवरात्रि
चतुर्दशी॥प्रदोषयदिवर्ततकर्तव्यासापरस्यतु॥प्रदोषलक्षणमहाज्योतिः॥प्रदोषेयदिवर्त्तते॥ त्रिमुहूर्त्तःप्रदो
षस्याद्भावस्तंगतेसति॥महानिशानिशीथश्चमध्यस्थंघटिकाद्वयं॥ इतिमासशिवरात्रिः॥ ॥अथहोलिका

भविष्योत्तरपुराणे॥ ॥तपस्यपौर्णमास्यां तु रजन्यां होलिकोत्सवः॥ कर्तव्यो न दिवा विष्ण्यां रिक्तायां प्रतिपद्यदि॥ नारदः
प्रतिपद्भूतनंदासु यार्चिता होलिका दिवा॥ संवत्सरं च तद्राष्ट्रं पुरं हन्ति च साद्भुतं॥ कालविवेके॥ प्रहरद्वयादुपरतं फाल्गु
नि मायदि॥ रात्रौ भद्रां परित्यज्य होलिकां दीपयेत्ततः॥ यामत्रयोर्ध्वयुक्ता चेत् फाल्गुनी या भवेत्तिथिः॥ भद्रामुखं परित्य
ज्य कार्या होलि मनीषिभिः॥ विशेषस्तु भविष्योत्तरे॥ सार्धयामत्रयं वा स्याद्द्वितीया दिवसे यदा॥ प्रतिपद्वर्धमाना तु तदा
सा होलिका स्मृता॥ ॥इति होलिकानिर्णयः॥ ॥अथ स्थालीपाकः॥ कारिका॥ गृहप्रवेशहोमाद्या पौर्णमास्यां गमिष्य
ति॥ तस्यां तं प्रारभेतेति वृत्तिकारेण भाषितं॥ सद्यस्काले भवेद्यद्वा पौर्णमासस्तु पार्वणः॥ स्थालीपाकस्तु कर्तव्यास्त
त्रैव स्कृत्तिचोदनात्॥ सद्यस्काललक्षणं स्मृतिराह॥ संधिश्चेत्संगवादूर्ध्वं प्राक्॥ चेदावर्तनाद्रवेः॥ सा पौर्णमासी विज्ञेया सद्य
स्काले भवेत्तिथिः॥ वृद्धौ चेत्क्षये च कथं तिथेः परस्मात् घटिकास्तु या सुन्यूनास्तत्थे वाभ्यधिका स्वतासो॥ अर्धविप्रोज्य
न तथा प्रयोज्य ह्रासो च वृद्धौ प्रथमे दिने तत्॥ पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः॥ यागकालः स विज्ञेयः प्रातरा हत्य
वा रात्रौ यदि पर्व समाप्यते॥ उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते॥ त्रिमुहूर्ता द्वितीया चेत् प्रतिपद्या परान्हिकी॥ अन्वा
धानं चतुर्दश्यां परतः सोमदर्शनात्॥ पूर्वान्हे वाथ मध्याह्ने यदि पर्व समाप्यते॥ उपोष्य तैस्तत्र पूर्वेद्युः तदहर्याग इष्यते॥
उपोष्येति अन्वाधानं कर्तव्यमित्यर्थः॥ माधवीये॥ षोडशे हन्यभिष्टिः स्मिन् मध्यापंचदशेहनि॥ चतुर्दशे जघन्येष्टिः पा
पा सप्तदशाहनि॥ इति स्थालीपाकः॥ अथ अमावास्यनिर्णीयते॥ तत्र दक्षसूत्रं॥ अमावास्यापराह्णे पिंडपितृयज्ञाद्दक्षि
णाग्रे रेकोल्मुकमिति॥ श्रुतिर्हि देवानां मध्यंदिनो मनुष्याणां अपराह्णः पितृणामित्याहिताग्नेर्विषय यत्र यस्य भाग
युक्तो॥ तथा च स्मृतिः॥ दशेप्रोक्ताख्ययो भागाः आहिताग्निस्तु सर्वदा॥ पिंडान्वाहार्यकं कुर्यादित्येवं मुनिरब्रवीत्॥

तथाच कालनिर्णये॥ दर्शश्राद्धे विधित्रिधांग्न्यकदिनांत्योद्देशपराह्णिकंचरन् नित्यंयद्भूमयो घेरेषा विहितः सर्वापराह्णस्थि
तः॥ दर्शोयद्यहगोपराह्णलवयुक्कुर्वेस्यात्तदाघृः स्रयेश्वधोतु मध्यमेह्नि वहुवगणे ग्राह्यः पराध्वर्युभिः॥ छंदोगैस्तु यथेष्ट
मितदुद्दिष्टं साग्निनिरग्नेद्विजस्त्रीशूद्रा कुतपस्थिते वितनस्तुदर्शस्मृतं पार्वणं॥ इद्यथेल्पं कुतपं समग्रमपि वायोन्यत्य
सावर्णीतोदर्शश्चेन्तद्दिनद्वयेपि कुतपं नान्यत्यसावादिने॥ अनाहिताग्न्यादीनां पंचधा विभागो वक्ष्यते॥ तत्रस्मृतिः॥
प्रत्यब्दिं तथा दर्शेपि च धाद्विवसः स्मृतः॥ द्विजानामेव सर्वेषामिति प्राङ्मनीषिणः॥ कालदर्शे॥ दर्शोयत्र पराह्णस्थ इति
सद्दिवः श्राध्यकालेह्योश्चे यत्रानल्पो यदिभवति समः क्षीयमाणे तु पूर्वः॥ वृधो साम्योप्यन्नेखुर्वति वृषलयोश्च स्वर
वाहिताग्नेः दर्शोनिकापराह्णं स्पृशति कुतपं संस्पृशतीयं विधिः स्यात्॥ हारितः॥ अपराह्णः पितृणां तु याऽपराह्णानु
गामिनी॥ साग्राह्या पितृकृत्येतु न पूर्वाह्णानुयायिनी॥ भूतविधाममावास्यां मोहाद्ज्ञापितो पिवा॥ श्राध्यकर्माणि ये
कुर्युः स्तेषामायुः प्रहीयते॥ प्रतिपद्युपमावास्यां नापराह्णगतां नवेत्॥ भूतविधैव साग्राह्या पित्र्यकर्मणि सर्वदा॥ भूत
विद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा॥ पित्र्यकर्मणि विद्वद्भिर्ग्राह्या सैवपराह्णिका॥ इत्यमावास्यनिर्णयः॥ अथ
प्रत्यब्दिकश्राद्धनिर्णयते॥ स्मृतिराह॥ रवेरुदयमारभ्य सायंसस्पृशति तिथिः॥ सैव प्रत्यब्दिके ग्राह्या पूर्वस्या
दस्यवायदि॥ तिथयोदयमारभ्य सायाह्नं यदि चेत्स्पृशेत्॥ प्रत्यब्दे मासिके चैव ग्राह्येति मुनिरब्रवीत्॥ तथाच
हेमाद्रौ॥ सायेत्तन्यपरत्र चेन्मृततिथिः सेवाब्दिके मासिके ग्राह्या साप्यपराह्णयायदि तदा यत्राधिका सा मता॥
तुल्या चेदुभयापराह्णसमये पूर्वा न चेत्तद्द्वयोः पूर्वैव त्रिमुहूर्तगास्तसमये नो चेत्परैवोचिता॥ अन्यत्र॥ उभ
यत्रापराह्णस्वेद्व्याप्त्यत्राधिका मता॥ तुल्या चेदुभयत्रापि पूर्वा नो चेत्तथैव तु॥ क्षीयमाणे तु पूर्वैव वर्धमाने तु वै २६

हस्तैर्वायतिभिश्चोत्तरासदा॥ इतिकैश्चिदुक्तं॥ अत्रविशेषव्याघ्रपदः॥ संपूर्णैकादशीयाचपरतोपि विवर्धते॥ स्मार्तैरुपो
ष्यपूर्वैवपरतोद्वादशीयदि॥ आदित्योदयमारभ्यभवेद्याषष्टिनाडिका॥ एकादशीसदोपोष्यासैवस्मार्तैर्बहिर्ज्ञोत्तमैः॥
दशमीवेधहीनायाप्रभातेपुनरेवसा॥ स्मार्तैःकार्यासदापूर्वाद्वादशीपरतोयदि॥ तथाचगालवः॥ ॥एकादशीव्रतंश्रे
ष्ठंषष्टिनाड्यात्मकंचयत्॥ स्मार्तैस्तदेवकर्तव्यंबुधोवप्याहगालवः॥ एकादश्यांद्वादश्यांचापिच्छेत्सत्यांषष्टीना
ड्यात्मकंएकादशीव्रतंस्मार्तैरेवकर्तव्यमित्यर्थः॥ तथाचजाबालिः॥ एकादशीयदाषष्टिनाडिकास्यात्परेवसा॥ स्मार्तैः
कार्यासदापूर्वाद्वादशीपरतोपिचेत्॥ स्कांदे॥ संपूर्णैकादशीछेदमुपेयाद्द्वादशीपुनः॥ दृश्यतेपिहिपूर्वैवस्मार्तैःकार्या
नचापरे॥ गालवः॥ संपूर्णैकादशीकिंचिद्द्वादशीचपरेह्यपि॥ स्मार्तैःपूर्वासपत्नीकैःकार्यायतिभिरुत्तरा॥ तथाव्या
घ्रपादः॥ एकादशीद्वादशीचक्रमेणयवर्धतेयदि॥ अविधैकादशीकार्यागृहस्थैर्यतिभिःपरेति॥ सिद्धांते॥ अविधैका
दशींकृत्वायोग्नवेपुत्रवान्गृही॥ द्वादश्यांपारयेद्धित्वाहरिवासरसंज्ञिताम्॥ अथविधैकादशीकर्तव्येतिकाल
निर्णयः॥ ॥दशमीशेषसंयुक्तायदुपोष्यैकादसीतदा॥ यदानस्यात्त्रयोदश्यांकलावाद्वादशीयदि॥ नचैदेकादशी
पूर्वाद्वादशीपरतःस्थिता॥ उपोष्यदशमीविद्धायदिछेत्परसंपदं॥ गालवः॥ एकादश्युदयेकिंचित्परान्हिद्वादशीनचेत्॥
लब्धामपिशुभमपिस्मार्तैःकर्तव्यादशमीयुता॥ मेधाचाचार्यः॥ एकादशीयदावापिद्वादसीलुप्यतेथवा॥ दशम्यासं
युताकार्यास्मार्तैरेकादशीसदा॥ त्रयोदश्यांनलभतेद्वादसीयदिकिंचन॥ उपोष्यैकादशीतत्रदशमीमिश्रितापि
वा॥ द्वादसीस्वल्पमल्पापियदिनस्यात्परेहनि॥ दशमीमिश्रिताकार्यामहापातकनाशनी॥ एकादशीनलभेतसफुटा १७
द्वादसीभवेत्॥ उपोष्यादशमीविद्धाऋषिरुद्दालकोब्रवीत्॥ पाद्मे॥ द्वादस्याःप्रथमःपादोहरिवासरसंज्ञकः॥ नदत्ते

पारणंकुर्यादन्यथादोषभाग्भवेत्॥ अथवैष्णवैकादशी॥ नारदीये॥ उदयात्प्राग्यदानाथचतस्रोघटिकास्तुया
अरुणोदयविद्धेषासतांनोपवसेदिति॥ अरुणोदयवेलायांदशादशमीयतत्रैवोपवसेदिति॥ पद्मे॥ नवमीपलमात्रंतु
दशम्यांयदिदृश्यते॥ उपोष्याद्वादशीशुद्धात्रयोदश्यांतुपारणा॥ अविद्धैकादशीयत्रसंपूर्णाद्वादशीभवेत्॥ त्रयो
दश्यांकियन्मात्राद्वादशीयदिवाभवेत्॥ उपवासद्वयंकार्यंविष्णुभक्तैर्विशेषतः॥ विष्णुपूजारतैःकार्याद्वादश्या
मेवपारणं॥ तथाचपद्मे॥ दशमीवेधहीनाचेत्परतोद्वादशीयदि॥ उपवासद्वयंकार्यंविष्णुभक्तिपरायणैः॥ एकादशीमु
पोष्याथद्वादशीसमुपोषयेत्॥ नतत्रविधिलोपःस्यादुभयोर्दैवतंहरेः॥ कूर्मे यदाभवेदतीवाल्पाद्वादशीपारणे
दिने॥ उषःकालेद्वयंकार्यंप्रातर्मध्यान्हकर्मच॥ अल्पायामथविप्रेंद्रद्वादश्यामरुणोदये॥ स्नानार्चनक्रियाःकार्या
दानहोमादिकाश्रयाः॥ एतस्मात्कारणाद्विप्रप्रत्यूषःस्नानमाचरेत्॥ पितृतर्पणसंयुक्ताद्वादशीस्यात्क
लायदि॥ यदास्याद्वादसीस्वल्पात्यपकर्षंबुभुजेतदा॥ यदास्वल्पाद्वादशीस्यादपकर्षंतुभुंजीभवेत्॥ प्रातर्मध्या
न्हिकस्यापितत्रस्यादपकर्षणं॥ पंचपंचउषःकालःसप्तपंचारुणोदयः॥ अष्टपंचभवेत्प्रातःशेषःसूर्योदयःस्मृतः॥
इत्येकादशीनिर्णयः॥ ॥अथोपवासाशक्तविषये॥ उपवासेत्वशक्तानामशीतेरूर्ध्वजीविनां॥ एकभक्तादिकंका
र्यमहाबोधायनोमुनिः॥ एकभक्तेननक्तेनक्षीणवृद्धातुराश्चहि॥ नातिक्रमेयुद्वादशीमुपवासव्रतेनच॥ असाम
र्थ्येशरीरस्यव्रतेचसमुपस्थिते॥ कारयेधर्मपत्न्यावानियमान्वितं॥ भार्यापत्युर्व्रतंकुर्याद्भार्यायाश्चपतिर्व्रतं॥
असामर्थ्याच्छरीरस्यव्रतभंगोनजायते॥ संप्राप्तेसंकटेकार्यंद्वादस्यांमंत्रपूर्वकं॥ अद्भिस्तुपारणंकुर्यात्पुनर्भु

जन्नदुष्यति॥ पत्नीपुत्रोथवाभ्रातुकुर्याच्छिष्योपि वाव्रतं॥ एषामभावएवान्यं ब्राह्मणंविनियोजयेत्॥ अथाष्टौमहा
द्वादश्यानिर्णयः॥ तत्रतिथिप्रयुक्ताश्चत्वारो नक्षत्रप्रयुक्ताश्चेति॥ पुराणे॥ चतस्रस्तिथियुक्ताश्चद्वादश्यःपरिकी
र्त्तिता॥ उन्मीलिनी वंजुलीचत्रिस्पृश्यापक्षवर्धिनी॥ प्रोक्ता महाद्वादशीतिमुनिभिःपापनाशनी॥ पुनर्वसुयुताय
चश्रवणेनसमन्विता॥ पुष्यान्विता महत्तीचरोहिणीद्वादशीयुता॥ तथा बृहस्पति चंद्रिकायां॥ शुद्धवृद्धिमुपेति च
द्वारदिनेभद्रासने॥ मिलीनीभद्रेवापधिका नहत्तीयहरियंवंजुलयभीषासती॥ नेदादित्यजयान्वितेतिमहति
स्यात्रिस्पृशाद्वादशी॥ पूर्णापर्वणीनिगतिपारनेस्यात्पक्ष वृधान्यपि॥ आदित्येनजयाच्युते नविजयापुण्येनपा
पहारोहिरण्याचजयंतीकासुचतस्रछक्षाद्दिनादोभवेत्॥ पूर्णावो नमथाधिकंक हरिभाधिक्येतुभू
तभुजिक्रेक्षाधिक्यसमत्वयोस्तुदिनतःप्राग्भेतुपश्चाद्गतं॥ हिवावैष्णवमस्तसत्त्वमितरेक्रेक्षषुभद्रातिथि
स्त्रायोगापिचक्षखंडनद्दूहाधेन्हिप्रतंपारणं॥ अन्यस्मिन्न्यधिकातिथियद्भिन्नेभांतभरधोतिथिस्तपारणंभ
वेदितिमहास्तद्वादशीनिर्णयः॥ ॥अस्यार्थः॥ दशमीवेदरहितेकादशीपरदिनेक्रियन्मात्राद्दश्यतेनद्वाद
शीसोन्मीलिनीमहाद्वादशी॥ द्वादशीमात्रावृधौवंजुली॥ एकादशीद्वादशीत्रयोदशीयोगात्रिस्पृश्याषष्टी॥ घटि
काभ्रमापूर्णमावास्या वापरदिनेक्रियन्मात्रावर्धतेसापक्षवर्धिनी॥ पुनर्वसुयोगेजया॥ श्रवणयोगेविजयापौष्य
योगेपापनाशनी॥ यार्ह्लिरोहिणीयोगेजयंति॥ एतासुनक्षत्रप्रयुक्तासुचतस्रषुद्वादशीदिनेसूर्योदयमा
रभ्यनक्षत्रेणभवितव्यंप्राक्ह्रासवृधियया लोचनयानक्षत्रन्यूनत्वात्सामान्यधिक्येषुसत्स्वपिरोहिणी ९८

परा॥ समत्वेपितथैवास्याद्ग्राह्याकुतुपकालिका॥ कुतुपाद्यान्मुहूर्तास्त्रीन्यदाचरतिभास्करः॥ सकलाःकुतपस्तत्रपितृणां
दत्तमक्षयं॥ पारब्धकुतपेश्राद्धंकुर्यादारोहणबुधः॥ विधिज्ञोविधिमास्थायरोहिण्यंतुनलंघयेत्॥ इतिप्रत्याब्दिकनिर्णयः
अथार्धोदयः॥ भविष्योत्तरे॥ अमार्कश्रवणपातयुक्ताचेपुष्यमाघयोः॥ अर्धोदयःकोटिसूर्यस्मृतश्चैवग्रहेःसमः॥ दि
नैवयोगश्शस्तायमुष्णकालिष्यवायदि॥ नैवरात्रौतुकर्तव्यनैरधर्मपरायणैः॥ स्कांदे॥ अर्धोदयेतुसंप्राप्तेसर्वगंगासमं
जलं॥ शुद्धात्मनोद्विजाःसर्वेभवेयुर्ब्रह्मसंमिताः॥ यत्किंचित्क्रियतेदानेतद्दानंमेरुसंन्निभं॥ पितृनुद्दिश्ययद्दत्तंगयाश्राद्ध
समंभवेत्॥ चतुःषष्टीपद्ममुख्यमंत्रंतत्रतुकारयेत्॥ चलाणिसप्तलंवापिपंचविंशतिरेवच॥ निधायपायसंतत्रमध्यम
एद्दललिखेत॥ अंमंत्रेस्थापयेतत्रब्रह्मविष्णुशिवात्मकं॥ तेषांप्रीतिकरार्थायस्थितमल्पैःसुशोभनैः॥ वस्त्रादिभिरलं
कृत्यब्राह्मणायनिवेदयेत्॥ दानमंत्रः॥ सुवर्णपायसंपात्रेस्थयस्मादत्तंत्रयीमयं॥ आवयोस्तारकंयस्माद्गृहणद्विजस
त्तम॥ समुद्रमेखलंपृथ्वीसम्यग्दानस्ययत्फलं॥ तत्फलंलभतेमर्त्यकृत्वादानममंत्रकं॥ ॥इतिअर्धोदयनिर्णयः॥ अ
थैकादशीनिर्णयते॥ भविष्योत्तरे॥ आदित्योदयवेधस्तुस्मार्तानांकथितोबुधैः॥ अरुणोदयवेधस्तुवैष्णवानांत
थापरेः॥ सूर्योदयसमारभ्यपरतःसूर्यदर्शनं॥ एकादशीभवेद्यातुसेयंप्रोक्तातुवैबुधैः॥ संपूर्णैकादशीयत्रप्रभातेपु
नर्वसा॥ सर्वैरेवोत्तराकार्यापरतोद्वादशीयदि॥ एकादशीद्वादशीचघ्नमयंवर्धतेयदि॥ तदापूर्वदिनंत्याज्यस्मार्तैर्ग्र
ह्यापरहनिइतिकेचित्॥ भविष्योत्तरे॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा॥ लुप्यतेद्वादशीतस्मिन्नुपवासःकथंभवेत्॥
उपोष्येद्वेतिथीस्तत्रस्मार्तैरपिमुमुक्षुभिः॥ पारणंतुत्रयोदश्यांकेचिदाहुर्मनीषिणः॥ व्यासः॥ प्रथमेहनिसंपूर्णायास्या
देकादशीयदि॥ द्वादशीचयदातातदृश्यतेपुनरेवसा॥ त्रयोदश्यांकियन्मात्राद्वादशीनलभेद्यदि॥ पूर्वाकार्याग्र

भाग्यान्नारीबृहद्गौरींसमर्चयेत्॥ पूर्वविद्धातृतीयाकार्या बृहद्गौरीव्रतेग्राह्यातृतीयाद्वितीयान्विता॥ चतुर्थीसहिताकार्यातृतीया
न्यव्रतेषुच॥ चंद्रोदयेयदातुस्यात्तृतीयायदिचेत्परा॥ पूर्वविद्धातदाकार्यायदिस्याद्दर्शनंविधोः॥ दिनद्वयेयदानस्यात्तृतीया
चंद्रदर्शने॥ परविद्धैवकर्तव्यापूर्वविद्धांपरित्यजेत्॥ चंद्रोदयेतृतीयाचेद्दिनद्वयेप्रवर्तते॥ पूर्वविद्धांपरित्यज्यकर्तव्याप
रसंयुता॥ अथपाककपिलषष्ठी॥ भाद्रमासेसितपक्षेनाभौचैवकरेस्थिते॥ पातकुजेचरोहिण्यांसाषष्ठीकपिलास्मृता
दिवैवयोगःशस्तोयंसूर्यपर्वशताधिकं॥ योगस्याद्यदिचेद्रात्रौचंद्रषष्ठीतिसास्मृता॥ ॥इतिचैत्रादिषण्मासतिथिनि
र्णयः॥ अश्विनप्रतिपन्निर्णीयते॥ विश्वरूपनिबंधे॥ कलशस्थापनंकुर्यान्नंदायामश्विनेसिते॥ पूजयेद्भक्ति
भावेनचंडिकांभक्तवत्सलां॥ मत्स्यपुराणे॥ प्रतिपद्याश्विनेकार्यंनवरात्रंक्रमागतः॥ कुहूयुक्तासदात्याज्यानाशयेत्त्व
कुलंयतः॥ नचेद्दर्शकलाप्राप्तिःप्रतिपच्चंडिकार्चने॥ उदयेद्विमुहूर्तापियाह्यासैवपरेहनि॥ अमायुक्तानकर्त
व्याप्रतिपत्पूजनेमम॥ मुहूर्तापिप्रकर्तव्याकर्तव्यापरसंयुता॥ वर्जनीयाप्रयत्नेनह्यमायुक्तापिपार्थिव॥ द्वितीया
द्विगुणैर्युक्ताप्रतिपत्सर्वदाशुभा॥ अमायुक्तानकर्तव्याकर्तव्यापरसंयुता॥ स्वल्पापिप्रतिपद्ग्राह्याचित्रावैधृतिव
र्जिता॥ चित्रवैधृतियोगस्तुभवेद्यामत्रयंयदि॥ प्रातरेवतदाकार्यंनवरात्रंसदाबुधैः॥ द्वितीयेद्विनप्रतिपन्मुहूर्त
द्वयंत्रयंवास्यात्॥ चित्रावैधृतिश्चवायामत्रयवायदिचेत्तदा॥ प्रतिपद्येवप्रातःकर्तव्यं॥ नैवामायुक्तायां॥ नाश
येत्कुलंयतइतिश्रवणादोषतः॥ तथाच॥ वैधृतिश्चतथाचित्रासमग्रायदिप्रतिपद्यदि॥ प्रभावेप्रतिपन्नास्ति
तदाकार्यंतथैवतु॥ चित्रावैधृतियुक्ताचेत्प्रतिपद्वितयान्विता॥ तत्रैवपूजनंदेव्याःकर्तव्यंशुभकांक्षिभिः॥

कार्जुनं॥ कालादाडिमदेवदारुमरुचश्रीसिंधुवारंतथाजातिगंडलपत्रिकाहरसुतास्याराधनेसिद्धिदा॥ अतोन्यथापारणा
यांव्रतभंगमवाप्नुयात्॥ याःकाश्चितिथयःप्रोक्तानक्षत्रयोगतः॥ ऋक्षान्तेपारणंकुर्याद्विनाश्रवणरोहिणी॥ तिथ्यंतेचैवभांते
चपारणंयत्रचोदितं॥ प्रातःशुक्लतिलैःस्नात्वामध्याह्नेदेवमर्चयेत्॥ स्वशक्त्यागणनाथस्यस्वर्णरौप्यमेववा॥ चतुर्थीगणना
थस्यपरविद्धाप्रशस्यते॥ जयायुक्तानकर्तव्यासर्वथाशुभकांक्षिभिः॥ गणनाथस्यचतुर्थीतुमध्याह्नव्यापिनीयदि॥ पूर्वविद्धै
वकर्तव्यापरविद्धांपरित्यजेत्॥ चतुर्थीगणनाथस्यसंगवांतेपरेहनि॥ यदिनस्यात्तदापूर्वाकर्तव्याशुभकांक्षिभिः॥ स
गवांतेमध्याह्नइत्यर्थः॥ ॥अथप्रसंगतोविनायकव्रतमपिकथ्यते॥ मासंप्रभृतिसमारभ्ययावद्वर्षंभवेन्नृप॥ विना
यकव्रतंकुर्याच्चतुर्थ्यांपक्षयोर्द्वयोः॥ विनायकव्रतेग्राह्यातृतीयासहितासदा॥ चतुर्थीचान्यदेवस्यव्रतेग्राह्यापरा
न्विता॥ बृहस्पतिः॥ चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते॥ मध्याह्नव्यापिनीचेत्स्यात्परतश्चेत्परेहनि॥ मातृविद्धाप्र
शस्यास्तास्याच्चतुर्थीसर्वदाशुभा॥ मध्याह्नात्परतश्चेत्स्यान्नागविद्धाप्रशस्यते॥ प्रसंगतःसंकटचतुर्थ्यपिकथ्यते॥ पुराणे॥
शृणुराजप्रवक्ष्यामिमंत्रेरागमसंभवैः॥ कृष्णपक्षेचतुर्थ्यांतुविनिशिचंद्रोदयेनृप॥ ओषधीभिःशुक्लतिलैःदिवास्नात्वाप्र
सन्नधीः॥ कार्यंसंकल्प्यमनसाध्यात्वादेवंगणाधिपं॥ नित्यकर्मसमाप्याथनिशिचंद्रोदयेनृप॥ तत्रपीठेगणेशस्यपूज
येत्कुसुमाक्षतैः॥ विघ्नदयेयदानस्याच्चतुर्थीसंकटव्रते॥ तृतीयासंयुताकार्यासर्वदाशुभकांक्षिभिः॥ चंद्रोदयेयदानस्या
द्यदिवापिदिनद्वये॥ परैवव्रतिभिःकार्यागणनाथपरायणैः॥ सूर्योदयंसमारभ्यचतुर्थीयावदर्तते॥ चंद्रोदयस्यपर्यंत
सम्भवेत्सर्वकामदा॥ ॥अथऋषिपंचमीभविष्योत्तरे॥ ॥मासिभाद्रपदेशुक्लेपंचम्यांपूजयेन्मुनीन्॥ प्रातर्नद्यादिषु
स्नात्वाकश्यपादीश्चसप्तवै॥ पंचमीचैवकर्तव्याषष्ठीयुक्ताचभारत॥ ऋषाख्यामुनिभिःप्रोक्तासर्वपापप्रणाशनी॥ मू

हूर्त्तद्वितियंवापियंचमीयदवाभवेत्॥ नक्षीणांप्रूजनेनैवकर्त्तव्याव्रतिभिःपरा॥ चतुर्थ्यासंयुतायांचपंचम्यांमुनिपूजनं॥ व्रतिभि
न्नैवकर्त्तव्यंयदिचेन्निष्फलंभवेत्॥ ॥अथदूर्वाष्टमी॥पुराणे॥ शुक्लाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत्॥ दूर्वाख्यासाष्ट
मीज्ञेयानोत्तरासाभिधीयते॥प्राप्तेभाद्रपदेमासिशुक्लाष्टम्यांतुभारत॥ दूर्वामभ्यर्च्ययेभक्त्याज्येष्ठांमूलंविवर्जयेत्॥
यानोष्ठजयतेदूर्वांमोहादिहयथाविधि॥ त्रिणिजन्मानिवैधव्यंलभतेनात्रसंशयः॥ तस्मात्संपूजनीयासाप्रतिवर्षंवधूज
नेः॥सुखसंतानजननीभक्त्सौख्यप्रदायिनी॥ मासिभाद्रपदेशुक्लेयाभवेदष्टमीनृप॥ दूर्वाष्टमीतिविज्ञेयापूर्वविद्धा
प्रशस्यते॥मुहूर्त्तरोहिणीष्टम्यांपूर्वायदिवापरा॥ दूर्वाष्टमीतिसाकार्याज्येष्ठामूलंचवर्जयेत्॥ दूर्वाव्रतंकेवलाष्टम्यामे
वकर्त्तव्यं॥ ॥अथज्येष्ठाष्टमीनिर्णियते॥ ॥कालदर्शे॥ भाद्रशुक्लाष्टमीज्येष्ठानक्षत्रेणसमान्विता॥ महतींकीर्त्तितात
स्यांज्येष्ठांदेवींप्रपूजयेत्॥ लिंगपुराणे॥ कन्यार्केयाष्टमीशुक्लाज्येष्ठर्क्षमूहनीस्मृता॥ अलक्ष्मीपरिहारायज्ये
ष्ठातत्रप्रपूजयेत्॥ तत्रापिविशेषःस्कांदे॥ तत्राष्टम्यांयदाभानोर्वारंज्येष्ठर्क्ष्यमेवच॥ नीलज्येष्ठेतिसाप्रोक्तादुर्लभा
बहुकालिका॥मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुता॥ तस्मिन्नेवदिनेकार्याज्येष्ठायांपरिपूजनं॥ मत्स्ये॥ प्रत्याद्दि
कंतथाबलयज्येष्ठादेवताव्रतं॥ नीलज्येष्ठाव्रतंयच्चविहितंकेवलेऽहनि॥ज्योतिः॥ मैत्राविद्धासदाकार्याज्येष्ठाका
मप्रदायिनी॥मूलविधानकर्त्तव्याज्येष्ठाकामविनाशिनि॥मूलविद्धाकृताज्येष्ठापुरादुर्योधनेनहि॥ आयुःक्षयंग
ताःसर्वेतस्मात्तांपरिवर्जयेत्॥गर्गः॥ अर्वागावर्त्तनाज्येष्ठादिनेयस्मिन्समाप्यते॥मूलविद्धास्यात्तदूर्ध्वंविष्णुभप्रदा॥
माधवीये॥ यस्मिन्दिनेभवेज्ज्येष्ठामध्याह्नूर्ध्वमप्यपिस्पृशेत्॥ यस्मिन्नहनिपूजास्यान्न्यूनावेदूर्ध्ववासरे॥ ॥इति
ज्येष्ठाव्रतं॥ ॥अथश्रावणद्वादशी॥सैववामनजयंती॥ कल्पे॥ नभस्यशुक्लपक्षेतुद्वादश्यांश्रवणेऽहनि॥ बलेस्तु ११

बंधनंकर्तुंतस्यांवैवामनस्त्वभूत्॥ जयंतीवामनाख्यास्यात्सैवोष्णानृपोत्तमः॥सर्वपापप्रशमनीसर्वकामप्रदायिनी॥एका
दश्यांभवेद्योगोद्वादश्याःश्रवणस्यच॥ पूर्वाह्णावथमध्याह्नेसातिथिर्महतीस्मृता॥पुराणसमुच्चये॥ द्वादशीश्रवणेर्क्षेचस्प
ष्टेदेकादशीयदि॥सएववैष्णवोयोगोविष्णुसंखलसंज्ञकः॥ तस्मिन्नुपोष्यविधिवन्नरैःप्रक्षीणकल्मषैः॥प्राप्नोत्य
मांसिद्धिपुनरावृत्तिदुर्लभां॥ ॥अथकेवलश्रवणद्वादशी॥ ॥माधवीयेकालनिर्णये॥ शुक्लावायदिवाकृष्णाद्वादशीश्रव
णान्विता॥ तयोरेवापवासश्चन्नयोदश्यांतुपारणं॥ एकादशीमुपोष्यैवद्वादशींसमुपोषयेत्॥ नचात्रविधिलोपःस्यात्दुभयो
र्दैवतंहरिः॥असमाप्तव्रतपूर्वंनैवकुर्याद्व्रतांतरं॥एकदैवत्यमुद्दिश्यकर्त्तव्यंनान्यथाक्वचित्॥ द्वादश्यांतुभवेद्योगःश्रवणस्यदि
वैवहि॥ वदोपवासःकर्त्तव्योवैष्णवैःसर्वदापिच॥उदयव्यापिनींकुर्यात्श्रवणद्वादशींसदा॥आचार्याःकेचिदिच्छंतिकेचि
न्नेच्छंतिचापरे॥मुहूर्त्तत्रितयंवापिसंगवात्स्यमथापिवा॥ श्रवणद्वादशी॥ पुराणे॥ मासिभाद्रपदेशुक्लेचतुर्दश्यांद्विजोत्तम॥
अनंतंपूजयेद्भक्त्यादानंदद्याच्चशक्तितः॥कल्पे॥शुक्लपक्षेचतुर्दश्यांमासिभाद्रपदेशुभे॥ तस्यामनुष्ठानमात्रेणसर्वपापैःप्र
मुच्यते॥जयायुक्तानकर्त्तव्याघ्नंतस्यचतुर्दशी॥ पूर्णयुक्ताप्रकर्त्तव्यासर्वदाशुभकांक्षिभिः॥स्कांदे॥जयायोगेनयःकु
र्याद्रिक्तायांपूजनंहरेः॥ वर्षपूजाफलंतस्यबाष्कलेयायागच्छति॥विश्वरूपे॥ मध्याह्नव्यापिनीयाचभद्रशुक्लचतुर्दशी॥सै
वानंतव्रतेग्राह्यापूर्णायुक्ताविशेषतः॥मध्याह्नव्यापिनीग्राह्याइतिमध्याह्नादर्वाक्पूजासमापनीत्यर्थः॥स्कांदे॥उद
येद्विमुहूर्त्तापिग्राह्यानंतव्रतेतिथिः॥ पराविद्धैवकर्त्तव्यापूर्वविद्धानकुत्रचित्॥ अतोमुहूर्त्तमात्रापिपौर्णिमायांचतुर्द
शी॥तस्यभभ्यर्च्यनंकुर्यादनंतस्यविशेषतः॥ बृहद्गौरीतृतीया॥ भाद्रसीतत्तृतीयायांविघ्नदायसमन्विता॥सुस्नाला

गोयथाकालेभवेद्यदि॥प्रभातेवाथमध्याह्नेपुण्यकालःसनान्यथा॥ अथपंचकातिथिः॥ यथाषष्ठीव्यतीपाता
भानुवारभवेद्यदि॥पंचकंनामतत्प्रोक्तंयमुनाचचतुर्गुणं॥षष्ठीसप्तमिसंयोगेवारश्चेदंशुमालिनः॥योगोयंपंच
कोनामसहस्रार्कग्रहेसमः॥ अथचंपाषष्ठी॥ विशाखाभानुवारेणवैधृत्याचसमन्विता॥नभस्यशुक्लषष्ठीया
चंपेतिनिगद्यते॥ अथकपिलाषष्ठी नभस्यकृष्णपक्षेयारोहिणीपातभूसुतैः॥युक्ताषष्ठीपुराप्राज्ञैःकपिलि
परिकीर्त्तिता॥भाद्रमासिसितेपक्षेभाननायाकरस्थिता॥पातेकुजेचरोहिण्यांसाषष्ठीकपिलास्मृता॥दिवेवया
गस्तोयमुषकालेपिवायदि॥स्नानदानादिकंचैवसर्वत्राक्षयभवेत्॥ अथबुधाष्टमी॥ यदायदासिताष्ट
म्याबुधवारोभवेद्यदि॥भवेतत्राक्षयंसर्वस्नानंदानंचसत्कृतं॥संध्याकालेतथारात्रौप्राप्तेचैवजनार्दनः॥बुधाष्टमी
नकर्त्तव्याहंतिपुण्यंपुराकृते॥ इतिव्रतप्रारंभविषय॥ अथगजछाया॥ प्रेतपक्षेत्रयोदश्यांमघासिंदुकर
रविः॥गजछायेतिसाप्रोक्तादत्तंतत्राक्षयंभवेत्॥तिथ्युक्तंयद्व्रतंचैवतिथ्यामेवविधीयते॥नक्षत्रविहितंयच्चवि
हितंकेवलोडुनि॥ भविष्योत्तरे॥ नैवदोषकुयोगस्यव्रतेस्तितिवासरे॥तिथिप्रयुक्तनक्षत्रविहितवापिकुत्रचि
त्॥ अथसंक्रांतिः॥ संक्रांतेःसमयःसूक्ष्मोदुर्ज्ञेयःपिशितेक्षणैः॥तस्ययोगादयश्चोर्ध्वंत्रिंशन्नाड्यः
प्रकीर्त्तिताः॥अर्वाक्षोडशनाड्यस्तुपरतश्चैवषोडश॥पुण्यकालोर्कसंक्रांतेःस्नानदानादिकर्मसु॥ आ
त्यपुराणे॥ तशतमिंदुक्षयेदानंउपरागेत्वनंतकं॥षडशीत्यांसहस्रंतुविष्णुपद्यांतथैवच॥विषुवेचायुतंप्रो
क्तंकोटिर्दक्षिणायने॥अथचैवतुलामेषौविषुवौतौप्रकीर्त्तितौ॥अलिसिंहोवृषःकुंभोविष्णुपद्यःप्रकीर्त्तिताः॥
मीनकन्याधनुर्युग्मसंस्थितास्ताषडशीतयः॥असीतानागतेपुण्येद्वेत्वेदक्षिणायने॥त्रिंशत्कर्कटकोनान्या

मकरेविंशतिःपरः॥ माधवीये॥ त्रिंशत्कर्कटकसंक्रांतौपूर्वतःपुण्यनाडिका॥मकरेतूत्तरापुण्याश्चत्वारिंशति 500
नाडिका॥विषुवयोस्तुपुण्यास्युर्नाड्यास्तूभयोर्दश॥पुण्यायांविष्णुपद्यायांप्राक्पश्चादपिषोडश॥षडशी
त्यांव्यतीतायांनाड्यःपंचदशस्मृताः॥याःयाःसन्निहितानाड्यास्तास्ताःपुण्यतमाःस्मृताः॥संक्रांतीनांचस
र्वासांनाड्यःसन्निहितास्त्वयाः॥ताताःपुण्यतमाःप्रोक्ताःस्मृताकरकर्कटौ॥मकरेतूत्तराःसर्वाःनाड्यःपुण्यतमाःस्मृताः॥
कर्केपुण्यतमाःसर्वाःनाड्यःपूर्वामहर्षिभिः॥अहःसंक्रमणेपुण्याःमहःकृत्स्नंप्रकीर्तितं॥रात्रौसंक्रमणेपुण्यंदिनार्धं
स्नानदानयोः॥अर्धरात्रावधस्तस्मिन्मध्याह्नस्योपरिक्रिया॥ऊर्ध्वंसंक्रमणेचोर्ध्वमुदयात्प्रहरद्वयं॥पूर्णेचेद
र्धरात्रौतुयदासंक्रमतेरविः॥तदादिनद्वयंपुण्यंमुक्त्वामकरकर्कटौ॥युस्तास्तमयवेलायांमकरंयातिभास्करः॥
प्रदोषेचार्धरात्रेवास्नानदानंपरेहनि॥अर्धरात्रेतुदुर्ध्ववासंक्रांतौदक्षिणायने॥पूर्वमेवदिनंग्राह्यंयाव
न्नोदयतेरविः॥मिथुनात्कर्कसंक्रांतियदिस्यादंशुमालिनः॥प्रभातेवानिशीथेवाकुर्यादहनिपूर्वतः॥रवेरस्त
मयात्पूर्वंमकरंयातिभास्करः॥स्नानदानादिकंकुर्याद्रात्रावपिनदुष्यति॥तथाचमनुः॥राहुदर्शनसंक्रांतिवि
वाहात्ययवृद्धिषु॥स्नानदानादिकंकुर्यान्निशिकाम्यव्रतेषुच॥संक्रांतावितिसर्वाधारणात्वेनोक्तत्वात्सापिक
श्चिद्देशाचारस्तत्रस्थैरेवशिष्टैराचार्यतेनतुसर्वत्रशिष्टाचारः॥तथाचस्मृत्यंतरे॥ स्नानदानादिकंचैवरात्रौ
कुर्वंतिकेचन॥केचिद्रात्रौनकुर्वंतिस्नानदानादिकंचयत्॥तथाचसुमंतुः॥ रात्रौस्नानंनकुर्वीतदानंचै
वविशेषतः॥नैमित्तिकंतुकुर्वीतस्नानंदानंचरात्रिषु॥प्रत्यब्दंवाथमासेवाभवितव्यानियानिच॥उपवास
व्रतादिनि॥स्नात्वाऊर्मनीषिणः॥प्रतिमासेपिसंक्रांतिर्भवत्येवसंक्रांतौनिमित्तिकत्वान्नास्त्येवसंक्रांतिर्विना

१०० ग्रहणे द्वादशादीनि नैमित्तिकानि ॥ मांडव्यः ॥ ग्रहणे द्वादशहत्यात्रादि मरणं पुत्रजन्म वा ॥ निमित्तिकमिति प्राकरात्राविपि
न दुष्यति ॥ अथ निगमः ॥ यदि स्यात्कर्कसंक्रांतिः प्रभाते वार्धरात्रिनिशि ॥ पूर्वएव दिने कुर्यान्मध्याह्नस्योपरि
क्रिया ॥ रात्रौ मकरसंक्रांतिः यदि स्यात्परेहनि ॥ कुर्यादावर्त्तनादर्वाक् स्नानदानादिकं च यत् ॥ कार्मुकं तु परि
त्यज्य झषसंक्रमते रविः ॥ प्रदोषे वार्धरात्रे वा स्नानदानं परेहनि ॥ इति संक्रांतिः ॥ अथ मलमासः ॥ स्मृत्यंतरे
यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा ॥ मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः ॥ ज्योतिःशास्त्रे ॥ असंक्रां
तिमासोधिमासः स्फुटः स्याद्विसंक्रांतिमासः क्षयाख्यः कदाचित् ॥ क्षयः कार्त्तिकादित्रये नान्यतः स्यात्तदा वर्षम
ध्येधिमासद्वयं च ॥ देवकार्याणि सर्वाणि प्रतिष्ठादीनि यानि च ॥ मलमासेन कार्याणि व्रतचूडादिकानि च ॥ आ
धानादीनि च कर्माणि श्राद्धानां तानि यानि च ॥ मलमासे तु कार्याणि गार्ग्यस्य वचनं यथा ॥ पाराशरः
गर्भे वार्धुषिके भृत्ये प्रेतकर्माधिमासिके ॥ सपिंडीकरणे चैव नाधिमासं विवर्जयेत् ॥ नारायणः ॥ आद्या
दिषोडशश्राद्धे सपिंडीकरणं तथा ॥ मलमासे तु तत्कुर्यादन्यमासमृतस्य तु ॥ शाकलः अधिके मरणं चा
द्युसुभयं प्राप्यते यदि ॥ तत्र कुर्यादन्यमेकं शुद्धिसर्वं तदादिकं ॥ आचार्यः ॥ आवर्त्तिर्नान्यमासे नाद्वाद
शाहिसपिंडनं ॥ नतथावर्तयेदाद्यं मलेलाद्वतिरिष्यते ॥ प्रेतमुद्दिश्य यच्छ्राद्धं षोडशस्यान्मलिम्लुचे ॥ मा
सद्वयेपितत्कुर्याद्वृद्धो केवित्सपिंडनं ॥ मरणमलमासे स्यादाद्यादिकमनुक्रमात् ॥ शुद्धमासे भवेद्यत्र तत्रै
क स्यात्सपिंडनं ॥ अथाह्निकसंग्रहे ॥ मलिम्लुचे मासि मृतस्य पुंसः प्रयोदशोत्तु प्रथमाह्निकं स्यात् ॥ मध्येधि
मासेपि तदन्यतो हमित्येधिके द्वादशएव मासि ॥ आह्निकं प्रथमं यच्च मलमासमृतस्य तु ॥ कुर्यात्त्रयोदशी १००

श्रवणो चेत् ॥ षष्ठी घटिकौ भूत्वा पारणादिने वर्धते तदा नक्षत्रमध्येएव पारणं ॥ यदा नक्षत्रवृद्धौ सूर्योदयप्राक्प्रवृत्तानि
नक्षत्राणि साम्याधिक्यवावाभमते तदा सूर्योदयादुपर्येव नक्षत्रेपाभवितन नियमः ॥ श्रवणातिथिरिक्ते तु नक्षत्रे तु द्वाद
स्यास्तमपर्यंतं तदा भवितव्ये श्रवणे तु अस्ता ह्यागमपि द्वादशी ॥ समाप्तोत देवापवासः ॥ पारणदिने नक्षत्रतिथ्योरनुवृ
त्तौ यदि तिथिरधिकं नक्षत्रं तर्हि तिथिमध्यएव पारणं द्वादशी लंघनस्य शतशो निषिद्धत्वात् ॥ एताश्चाष्ट महाद्वादश्यो
वैष्णवानां नित्याः ॥ वैष्णवाः का इत्याह ॥ सदीक्षावधिसंन्यासं समत्रं द्वादशाक्षरं ॥ अष्टाक्षरमथान्यं वा येमंत्रं समु
पासते ॥ ज्ञेयास्ते वैष्णवा लोके विष्णुपूजनरताः सदा ॥ तेषामेवोपवसः स्यान्महाद्वादशीनामपि ॥ वैष्णवा ये न कुर्वंति
अष्टद्वादशिकं व्रतं ॥ पतंति नरके घोरे यावदाभूतसंप्लवं ॥ वैष्णवव्यतिरिक्तानामुपवासः कृताकृतः ॥ अष्टौ महाद्वादश्यो
नामैष धर्मः सनातनः ॥ इति नरसिंहपरिचर्या ॥ अष्टैतान्यव्रतघ्नानि आपो मूलं घृतं पयः ॥ हविर्ब्राह्मणकाम्या गु
रोर्वचनमौषधं ॥ अक्षारलवणं सर्वं हविष्यं न निषेवणः ॥ अवनीतल्पशयनाः प्रियसंगविवर्जिताः ॥ तिलमुद्गादृते शिम्बं
सस्यां गोधूमकोद्रवाः ॥ चणकं देवधान्यं च हविष्यः क्षारगणः स्मृतः ॥ कांस्यं मांसं मसूरांश्च चणकं कोरदूषकं ॥ शाकं मधुप
रान्नं च त्यजेदुपवसेत्स्त्रियं ॥ विनोदके नयधान्यं जातवेदसि पच्यते ॥ तत्सर्वं फलवद्ग्राह्यमिति वेदविदो विदुः ॥ गालवः
एकादश्यां तु कौ शुक्लायां न किंचिदपि भक्षयेत् ॥ कृष्णायां भक्षयेत्किंचिदश्नीयादिति केचन ॥ तथाच सएवाह ॥ इ
त्येकादशी ॥ ॥ अथ पुण्यतिथयः ॥ अमावास्या तु सोमेन सोमेन सप्तमी भानुनायुता ॥ चतुर्थी भौमवारेण बुध
वारेण चाष्टमी ॥ चतस्रस्तिथयस्त्वेतास्सूर्यग्रहणसंन्निभाः ॥ स्नानं दानं तथा श्राद्धं सर्वं तत्राक्षयं भवेत् ॥ तिथिवासरयो

नकंचयत्॥ बाले अन्नप्राशनं भपांचैव नव वध्वाः प्रवेशाननं॥ वास्तुकर्म महायज्ञानामुपाकरणमेव च॥ विलंबितं प्रेतकार्यं
महादानादिकं चयत्॥ बाले वायदिवा वृद्धे शुक्रे वास्त गते गुरौ॥ मलमासेपि चैतानि वर्जयेद्देवदर्शने॥ ज्योतिः॥ वा
मे शुक्र नवोढायाः सुखहानिश्च दक्षिणे॥ धनधान्यं च पृष्ठस्थे सर्वनाशः पुरस्थिते॥ न च बालवत्ती नारी स्नूयते
तत्र सा यदि॥ नैव गच्छेद्गृहं भर्तुः सार्भकासु सुखं भगो॥ एकग्रामे पुरे वापि दुर्भिक्षे राष्ट्रविप्लवे॥ उद्वाहे ती
र्थयात्रायां प्रतिशुक्रो न विद्यते॥ गोदावर्यां गयायां च श्राद्धे ग्रहणद्वये॥ अयने विषुवे चैव चातुर्मास्य व्रतेषु
च॥ उत्सवेषु च सर्वेषु सीमंत ऋतुकर्मसु॥ सुरासुरजयश्चैव मोददो पोन विद्यते॥ नित्यायाग गृहे जीर्णे प्राश
नातेषु सप्तसु॥ वधूप्रवेशमांगल्ये न मौढ्यं गुरुशुक्रयोः॥ पोषाधिमासे शयने मुक्ते शुक्रेज्ययोरस्तगवाल
वृद्धौ॥ उत्पातयोगे ग्रहणे च शांतिं समाचरेद्दग्ध गृहस्य कर्म॥ वापीकूपतडाकयागकरणक्षौर प्रतिष्ठाव्रतवि
द्यामंदिर कर्णवेधन महादानं वने सेवनं॥ तीर्थस्नान जपाभिषेक नियम मंत्रादि देवेक्षणं। दूरेणोज्झि
तेषु परिहरेच्छुक्रेज्य मूढे नर्किं॥ आषाढे च मले पौषे गुरौ वास्तगते भृगौ॥ आधानादि क्रिया सप्तश्रा
तिष्वापि विधीयते॥ इति गुरुस्तानिर्णयः॥ अथ सिंहस्थ माहात्म्यं ब्रह्मांडपुराणे॥ सिंहराशिगते यस्मि
न्दिने सुरगुरो भवेत्॥ तस्मिन् वै गौतमी स्नानं कोटिजन्माघनाशनं॥ पुष्कराद्यानि तीर्थानि त्रैलोक्य स्थानि
यानि च॥ वासंति वर्षमेकं हि गौतम्यां सिंहगे गुरौ॥ कलाभ्युदयिकं श्राद्धं समभ्यर्च्येष्टदेवतां॥ स्नानार्थमुपग
च्छेत गौतमीं सिंहगे गुरौ॥ अश्वमेधफलं चैव लक्षगोदानजं फलं प्राप्नोति स्नानमात्रेण गौतम्यां सिंहगे गुरौ॥ १०१

वर्ज्यानाह कालनिर्णयः॥ शांतिकं पौष्टिकं यात्रा प्रतिष्ठा द्वाहपूर्वकं॥ न कुर्यात्सर्वमांगल्यं सिंहयाते बृहस्प
तौ॥ शांतिकं सिंहस्थात्पूर्वं प्राप्तं तन्न कर्तव्यं॥ गौतमी स्नानान्यथा यात्रा न कार्या॥ तथा दृष्टपूर्वं च चौलादि संस्का
रान्वास्तुकर्म च॥ अन्यानि शुभकर्माणि न कुर्यात्सिंहगे गुरौ॥ चौलकर्मोपनयनं विवाहं वास्तुकर्म च॥ न कु
र्यात्सिंहयाते तु गुरौ देवपुराहिते॥ कर्तव्यमाह॥ गर्भाधानादिकाः सर्वाः प्राशनान्ताः क्रियाश्च याः॥ कर्तव्यास
र्वदेशेषु सिंहस्थे च बृहस्पतौ॥ वसिष्ठकल्पे॥ गोदावर्युत्तरे तीरे भागीरथ्याश्च पश्चिमे॥ विवाहादि न क
र्तीति सिंहस्थे च कर्तव्यास बृहस्पतौ॥ वरलोभाति कालाभ्यां दुर्भिक्षाद्देशविप्लवात्॥ गौतम्या दक्षिणे पारे
रविवाहः शुभदो मतः॥ ज्योतिःसारे॥ सिंहस्थेपि मघासंस्थे गुरौ यत्नेन वर्जयेत्॥ अन्यत्र सिंहभागे तु
विवाहादि विधीयते॥ सिंहराशिगते सूर्ये जीवे गौतम्याश्चैव दक्षिणे॥ व्रतं चौलं विवाहादि कुर्यादिति महर्षि
यः॥ क्रियमाणे हि प्रत्यक्षं कुलधर्मादिकं चयत्॥ सर्वदेशेषु कर्तव्यमित्याहुः सिंहगे गुरौ॥ प्रसंगोत्क्षौरं के
थयति॥ गर्भिण्यामपि भार्यायां विवाहे वाथवा कृते॥ सपिता पि वयःक्लेशान्नूगो गौतम्यां सिंहगे गुरौ॥ भागीरथ्यां
व्रतस्थे च आयाते सिंहगे गुरौ॥ कारयेत्स पिता क्षौरं बाघ्रस्य कचनेयथा॥ धर्मपत्न्यां च गर्भिण्यां मांगल्ये वा
पियत्कृते॥ वपनं प्रकुर्यात् चाया गौतम्यां सिंहगे गुरौ॥ अन्यच्च॥ यावत्स्यात्सर्वपत्न्या स्वारभ्य गर्भं स्त भवं
क्षौरमिष्टं भवेत्तस्यैव गौतम्यां सिंहगे गुरौ॥ इति सिंहस्थनिर्णयः॥ अथ ग्रहणनिर्णयः॥ सिध्यांते

अमाप्रतिपदोः संधौ सूर्यस्य ग्रहणं भवेत् ॥ प्रतिपत्पौर्णमास्योश्च संधौ स्याद्ग्रहणं विधोः ॥ दिवा चंद्रग्रहं रात्रौ
सूर्यपर्व न पुण्यदं ॥ संधिस्थ पुण्यदं ज्ञेयं यावद्दर्शनगोचरं ॥ मेघाच्छिन्ने ग्रहे स्नानप्रतिकारो न विद्यते ॥ उभय
कीर्तितं यज्ञनिर्मूलत्वादुपेक्षितं ॥ यथा वृक्षादिभिश्छन्ने स्नानाद्यं क्रियते ग्रहे ॥ मेघैराच्छादिते तद्वत् स्नानादौ नैव
बाधकं ॥ स्पर्शमुक्तिनिमित्तं हि स्नानं चगणितागते ॥ कालं कुर्वीत सूर्येंदोर्मेघाच्छादितयोर्ग्रहे ॥ यावन्मुक्तं रवेर्बि
बं विधोर्वापि न दृश्यते ॥ तावन्न क्रियते स्नानं मोक्षकं मनुरब्रवीत् ॥ ग्रस्तोदिते ग्रहे ग्रस्तं दृष्ट्वा स्नानं समाचरेत् ॥ ग्र
स्तास्ते मौक्तिकं स्नानं मुक्तं दृष्ट्वा रविविधुं ॥ स्पर्शे स्नानं तथा श्राद्धं कृत्वा संतर्पयेत् सितं ॥ जपहोमादिकं कुर्या
द्दानं दद्यात्ततो द्विजः ॥ सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयं ॥ चंद्रग्रस्ते तु यामांस्त्रीन् बालवृद्धातुरान् विना ॥
राहुणा केतुना वास्तं ग्रस्तो याति दिवाकरः ॥ उपोषितो नरः स्नात्वा ग्रहणे चंद्रसूर्ययोः ॥ ग्रस्तं सन्यदि वा भानु
रस्तं याति ग्रहे पातु ॥ सर्वेप्युपवासं तु कुर्युरेवं वदंति हि ॥ ग्रहणे सूतिकानापि च स्नानादिकं विधेयं ॥ तत्र स्मृ
तिः ॥ स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके ॥ श्रौतकर्मणि तत्कालं स्नानशुद्धिमवाप्नुयात् ॥ आशौचं जा
यते नृणां सूतके राहुदर्शने ॥ स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ॥ सूतके मृतके चैव न दोषो राहुद
र्शने ॥ तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥ न सूतकादिदोषोत्र स्नानहोमजपार्चने ॥ गृहे स्नानादु दकं या
पिलीयां त्वद्धृतवारिणा ॥ अन्नपक्वमिह त्याज्यं स्नानं सर्वं समं ग्रहे ॥ वारितक्रारनालादि तिले दोषैर्न दु
ष्यते ॥ आरनालपयस्तक्रं दधि स्नेहाज्यपाचितं ॥ मणिकस्थोदकं चैव न दुष्येद्राहुदर्शने ॥ अथ ग्रह

१०२

चैव व्याघ्रस्य वचनं यथा ॥ पुंसश्चैवाधिके मासि मृतस्य प्रथमाब्दिकं ॥ मध्येधिके पितृहत्याः कुर्यान्मासत्रयोदश ॥ मृतमा
सो भवेद्यत्र वर्षे चेदधिको यदि ॥ कुर्यान्मलिम्लुचे मासि द्वादशे प्रथमाब्दिकं ॥ सा द्वादशे मासीति संपूर्णं जाते सती
त्यर्थः ॥ सर्वत्र ॥ आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ॥ शुद्धे मासे न तत्कार्यमित्येवं मुनिरब्रवीत् ॥ असंक्रांतेद्वि
तीयं माब्दिकं प्रथमं द्विजैः ॥ प्रत्यब्दं शुद्धमासे तु कर्तव्यमिति चेतरं ॥ मलमासमृतानां तु मृताहं तत्र नान्तरे ॥ अन्येषां मुत्त
रे कुर्यात् प्रथमं त्वधिकं चरेत् ॥ शुद्धमासे मृतानां तु मलने प्रथमाब्दिके ॥ मलमासमृतानां तु मृगे लेख्यादा द्विकं ॥
वर्षे वर्षे तु यच्छ्राद्धं मृताहं न मलिम्लुचे ॥ कुर्यात्तत्र प्रमीतानां नान्येषां च कुदाचन ॥ अत्र केचिद्विशेषमाहुः संग्रहे ॥ द्वौ
मासावेकनामानावेकस्मिन्नब्दके यदि ॥ उत्तरे देवकार्याणि पितृकार्याणि चोभयोः ॥ पिंडहीनमसंक्रांतौ संक्रांतोपि
ड संयुतं ॥ श्राद्धद्वयं प्रकुर्वीत मासयोरुभयोरपि ॥ मृताहे मलमासेपि न वंध्यं दिवनयेत् ॥ कुर्याच्छ्राद्धमपिंडं तु सदेव
मिति केचिन ॥ प्रत्याब्दमधिकेपि स्यादर्घ्यपिंडविवर्जितं ॥ पिंडार्घ्यसहितं शुद्धे कुर्यादित्याह कृत्यपः ॥ कालादर्शे ॥
न वंध्यदिवसं कुर्यान्मातामहं तन्मलिम्लुचे ॥ एकमप्याश्रये द्विशाचितिवेदविदो विदुः ॥ गालवः ॥ यस्मिन्नब्देधिको वर्षो
मासः षष्टिदिनात्मकः ॥ तत्र चैवाधिकः मासद्वयमुदीरितं ॥ एक एव यदा मासः संक्रांतिद्वयसंयुतः ॥ मासद्वयगतं श्राद्धं तस्मि
न्नेव प्रशस्यते ॥ इति मलमासनिर्णयः ॥ अथ शुक्रास्तनिर्णयः ॥ वृत्तशते ॥ बालः शुक्रो दिवसदशकं पंचकं चैव वृद्धः प
श्चादस्त्रात्रितयमुदितः ॥ पक्षमैंद्र्यां क्रमेण ॥ जीवो वृद्धः शिशुरपि सदा पक्षमन्ये शिशुस्ते वृद्धो प्राक्तो दिवसदशकं चा
परे सप्तरात्रं ॥ चौलोपनयने चैव विवाहोद्यापनादिकं ॥ वेदारंभं गृहारंभं महारुद्रं तथैव च ॥ देवतानां प्रतिष्ठां च गोदानं स्ना

पोयेतिविधवयोरुपवासः॥ अर्धरात्रोभवेदर्वाक्ऊर्ध्वंयग्रहणंयदि॥ अपुत्राविविधवाकुर्यादुपवासंहियत्न
तः॥ तथाच॥ यदिरात्रोभवेद्दिङ्गोग्रहणंचोपवासतः॥ ॥अथग्रहणादिनेश्राद्धं॥ ग्रहणेतुद्वितीयेन्हिरजोदोषात्
पंचमे॥ त्रयोदशाहमरणेजातस्यैकादशेहवि॥ सूर्यस्येवग्रहस्तास्ते द्वितीयदिनेश्राद्धंकार्यं॥ सूर्यग्रहेतुनाश्नीयादितिया
वन्मुक्तरवेर्बिंबमितिवचनात्॥ द्वाभ्यांपूर्वंपश्चमादिनएवभोजनंप्रतिविध्यति॥ पुत्रहीनारजस्वलाचेद्रुतुश्राद्धंप
चमेहनिकुर्यात्पित्रोर्मृतयोःकारुण्यश्राद्धंत्रयोदशाहेस्यादथवायःसपिंडीकरणकर्त्तोसचापित्रयोदशाहेकुर्यात्
अन्येस्तुएकादशाहेएवजातस्तूतकेसूर्वैरप्येकादशाहएवश्राद्धंकार्यं॥ तथाच॥ व्याघ्रपादः॥ यदिस्यात्दार्षिकंप्रा
प्तंसूतकेपिवा॥ सूतकानांतरंकुर्यात्श्राद्धमेकादशाहनि॥ ग्रस्तास्तेयदिवेसूर्यश्राद्धंकुर्यात्परेहनि॥ त
स्मिन्नेवदिनेकुर्याद्ग्रस्तास्तेनभवेद्यदि॥ तथाचमनुराह॥ संध्यारात्रौनकर्त्तव्यंश्राद्धंखलुविचक्षणैः॥ द्वयोरपि
चकर्त्तव्यंयदिस्याद्राहुदर्शनं॥ श्राद्धमितिप्रत्याब्दिकं॥ तथाचस्मृतिः॥ अस्तंग्रस्तोरवि यातिप्रत्यब्दंस्यात्परेह
नि॥ नयातियादिचैवग्रस्तःतस्मिन्नेवदिनेभवेत्॥ ग्रस्तोरवियदाभुक्तःप्रागेवास्तभयाद्वैः॥ प्रत्यब्दंहिदिनेतस्मि
न्रात्रावपिनदुष्यति॥ ग्रस्तोदयेभवेद्दिङ्गोः दिवाश्राद्धंनकारयेत्॥ रात्रावपितदाकुर्यात्प्रत्यब्दंमनुरब्रवीत्॥ संवर्तः
रात्रावपिप्रकर्व्यंग्रहणेपुत्रजन्मनि॥ प्रत्याब्दिकेप्रामादाद्वाश्राद्धंकुर्याद्विधानतः॥ अथनित्यकर्माधिकारःस्मृति
भास्करे॥ कथंस्युर्नित्यकर्माणिग्रस्तास्तेयायदिद्वयोः॥ स्नानंसंध्यादिकंकुर्याद्यकालेतुनैत्यकं॥ ग्रस्तास्तयोर्य

दावुक्तंयादृश्यते॥ भोजनंमौक्तिकंस्नानंनकुर्याच्छैत्यकंविना॥ भवेदाच्छादितोमेघैःसूर्योयदिनदृश्यते॥ ग्रस्तास्तादि
वतुर्यामंहित्वास्नानादिकंचरेत्॥ ग्रस्तोदयेच्ययमेव॥ ग्रहणमाहात्म्यं॥ सर्वंगंगासमंतोयंसर्वेब्रह्मसमाद्विजाः॥ सर्व
भूमिसमंदानंग्रहणेचंद्रसूर्ययोः॥ ॥ इतिग्रहणनिर्णयः॥ अथविधिर्लिख्यतेस्मृतिः॥ गोभिर्युक्तोनपापेनती
र्थयात्राकरोतियः॥ सयातिनरकेघोरेयावद्रोमसंख्यया॥ मुंडनंचोपवासश्चसर्वतीर्थेष्वयंविधिः॥ वर्जयित्वा
कुरुक्षेत्रंविशालंविरजंगया॥ गंगायांभास्करक्षेत्रेमातापित्रोर्मृतेऽहनि॥ आधानेयज्ञकालेचक्षौरंषट्सुविधीयते॥
सेतुबंधेचगोकर्णेनिमिषेचश्रीगिरिस्तथा॥ निरूपाक्षस्तथाकाशीक्षेत्रेभास्करसंज्ञिते॥ गंगाशब्देनकृष्णागोदा
दिषुमहानदीष्वपिज्ञेयं॥ सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः॥ तासुस्नानंनकुर्वीतवर्जयित्वासमुद्र
गाः॥ तीर्थेविवाहेयात्रायांसंग्रामेदेवतालये॥ ग्रामदाहेप्रवासेचस्पृष्टास्पृष्टंननयोजयेत्॥ चित्तंमंतर्गतंदुष्टं
नतीर्थफलमश्नुते॥ शतशोऽथजलैर्धौतंसुराभांडमिवाशुचि॥ दानमिज्यातपःशौचंतीर्थसेवाश्रुतंतथा॥ स
र्वाण्येतानितीर्थानियदिभावोहिनिर्मलः॥ दृष्टशौनकः॥ तीर्थश्राद्धेगयाश्राद्धेतर्पणेचमहालये॥ संतर्पये
त्पितॄन्सर्वान्विधिनापितृजानपि॥ विधिर्यत्रकृतेतीर्थेषण्मासाभ्यंतरेयदि॥ प्रसंगाच्चेत्पुनःप्राप्तंनकुर्यान्मुं
डनादिकं॥ कृत्वाविधिंयथोक्तंतुगृहमागत्यवैयदि॥ गच्छेन्मासत्रयादर्वाक्नकुर्यात्तीर्थकंचतत्॥ कृत्वाती १०३
र्थगामिनी॥ द्विजानामेवसर्वेषांनतुतीरवासिनां॥ गंगायांमरणंपित्रोर्भास्करक्षेत्रएवच॥ निषिद्धतिथिवा
राणांतदोषक्षौरकर्मणि॥ नजीवत्पितृकःकुर्यात्तीर्थादिष्वप्युपोषणं॥ वपनंतीर्थकेचप्रायश्चित्तादिकंतथा॥

आश्वंतथानेरः ।। प्राप्तेरेवसदा कार्यंकर्त्तव्यंपितृतर्पणं ।। अर्घ्यमावाहने चैव द्विजांगुष्ठनिवेहनं ।। तपितृश्चंचविकिरंती
त र्थेपंचविवर्जयेत् ।। पितृवर्गंतथामातृवर्गंमातामहस्यच ।। पत्न्यादिवर्गवर्गस्यच ।मान्युच्चारयेत्क्रमात् ।। संकल्पविधिरेषः
स्यतथाचैवानुवादने ।। तीर्थेमहालयेचैववृद्धचर्नंस्यात्पृथक्पृथक् ।। देवानादौसमभ्यर्च्यपितृर्गेमथार्चयेत् ।। मातृव
र्गंततोमातामहादेश्चयथाक्रमं ।। पितृवर्गंमातृवर्गंवर्गंमातामहस्यच ।। अर्चयित्वाथकारुण्यान्नर्चयेदितिकेचन ।। अ
थान्यपक्षः ।। शौनकः ।। देवानभ्यर्चपित्रादिवर्गवर्गंसमर्चयेत् ।। कालेचैवाथवेकस्मिनसर्वानप्यर्चयेत्पितृन् ।। एकोद्दि
ष्टविधानेनवर्गंचैकैकमर्चयेत् ।। तीर्थेमहालयेचैवहित्वाद्वादशदेवतं ।। यद्येकोभिन्नसंबंधाद्वार्तेतेचद्वयोरपि ।। त
त्सर्वेषुतीर्थेषुमासनेषुचनित्यशः ।। उभयेषामपियःस्नातिसयातिपरमांगतिं ।। अश्रद्दधानपापात्मा नास्तिकोछिन्न
संशयः ।। हेतुनिष्ठश्चपंचैतेनस्यस्तेतीर्थभागिनः ।। तीर्थंप्राप्यप्रसंगेनस्नानंतीर्थेसमाचरेत् ।। स्नानजंफलमाप्नोति
र्थयामाश्रितंनतु ।। षोडशांशंसलभतेयःपरार्थेनगच्छति ।। अर्धंतीर्थफलंतस्यप्रसंगेनापिगच्छति ।। कुशप्रतिकृ
तिंकृत्वातीर्थवारिनिमज्जयेत् ।। मज्जयेच्चसमुद्दिश्यसोष्टमंगलसेतवे ।। पितरसर्वतीर्थेषुसमुद्दिश्यचमातरं ।। य
स्नापितपरमेसिद्धिंपितृभ्यासगच्छति ।। तीर्थदृष्ट्वाततोविप्रःसत्वासाजलमाविशेत् ।। अन्नालब्धाद्विजेभ्य
स्तुदत्वाशक्त्याचदक्षिणं ।। वामयेच्छ्मश्रुकेशांश्चनखान्यपिनिकृंतयेत् ।। प्रायश्चित्तंयथाशक्त्याकृत्वापापाप
नुतये ।। स्नात्वाश्मश्रूणिकेशांश्चलोमान्यथवापयेत् ।। श्मश्रुकेशांश्चलोमानिनखान्यपिनिकृंतयेत् ।। कृत्स्ना
पस्छशिखावर्ज्यमेवंस्यान्मुंडनक्रिया ।। शिरोगतानिपापानियांतिमुंडनतोयतः ।। अकारयित्वावपनंप्रायश्चित्तंन
निर्विशेत् ।। राजावाराजपुत्रोवाब्राह्मणोवायदिवाभवेत् ।। केशासंरक्षणार्थायद्विगुणंव्रतमाचरेत् ।। ततःस्नानंप्र २०४
कुर्वीतमृत्तिकागोमयादिभिः ।। सर्वग्रंथेषुयत्प्रोक्तंसारंसारंसमुधृतं ।। नारायणेनतत्सर्वंलिखितंहितकाम्यया ।।

दृष्टायत्रचयादृक्तत्तादृक्लिखितंमया ।। परार्थेपुस्तकंचेदमंगीकुर्वंतुपंडिताः ।। ।। इतिश्रीभट्टरामेश्वरसुतसू
रिसूनुनारायणभट्टविरचितायांधर्मप्रवृत्तौस्थालीपाकादिमंगलस्नानांतंप्रकरणंसमाप्तं ।। ।। ।। जलजा
नवलक्षंतुस्थावराणांचविंशतिः ।। त्रिंशल्लक्षगजाश्चादिपक्षीणांदशलक्षकं ।। १ ।। कृमिजोरुद्रसंख्याकश्चतु
र्लक्षंतुमानवाः ।। चतुरीशीतिलक्षाणांयोनिमानंप्रकीर्त्तितं ।। २ ।। ।। शके १६७३ प्रजापतिनामसंवत्सरका
र्त्तिकवदिनौम्यांयांगुरुवासरेप्रातःकालसमाप्तः ।। इदंपुस्तकंनरगुंदकरजीवणपाठकलिखितंलेखिकयोःशु
भंभवतु ।। ।। श्रीरेणुकापरमेश्वरार्पणमस्तु ।।

स्नात्वा दानं प्रकुर्वीत यथा वित्तानुसारतः॥ सर्वतीर्थेष्वयं धर्मः स्याज्जीवत्पितृकस्य तु॥ अत्र कश्चेत्पितायस्य गंतुं ती
र्थं न शक्यते॥ स जीवत्पितृकः कुर्यात्तीर्थं च पितुराज्ञया॥ प्रसंगात्क्षौरकर्मापि कथ्यते॥ कर्के धनुषि कुंभे च कन्यायां सं
स्थिते रवौ॥ क्षुरकर्म न कुर्वीत व्याघ्रस्य वचनं यथा॥ तीर्थयज्ञे च गोदाने मृताहात्पूर्ववासरे॥ पित्रोर्मरणकाले तु दोषस्त
त्र विधीयते॥ न विद्यते॥ तथा चापि वै क्षुरकर्म निषिद्धदिवस॥ शन्यर्कभौमरिक्ताषष्ठ्याष्टम्योश्च पर्वसु॥ श्राद्ध
हेषु व्रते चैव सूतके निशि संध्ययोः॥ कर्के धनुषि कन्यायां कुंभे चैव स्थिते रवौ॥ नवमेष्ठ श्राके शांश्च प्राकुर्वेद्दविदोज
नाः॥ इति तीर्थविधिनिर्णयः॥ अथाभ्यंगविधिः॥ सुदिने चैव मांगल्ये वासरे बुधमंदयोः॥ तैलाभ्यंगं द्विजः कुर्याद्वि
वाहादिमहोत्सवे॥ श्राद्धहेषु च सर्वेषु रवौ भौमे च पर्वसु॥ रिक्तानंदाष्टमीषष्ठीष्वभ्यंगं परिवर्जयेत्॥ कौशिकः॥ प्रत्य
ब्दं युगमन्वादौ प्रेतपक्षेष्टमी कासु च॥ अभ्यंगमैथुनक्षौरं न कार्यं श्राद्धकर्तृभिः॥ निषिद्धदिवसे कार्ये राशिवव्याधि
तस्य च॥ द्रव्यान्तरयुतं तैलं न दुष्यति कदाचन॥ नारकायां चतुर्दश्यां विवाहादिमहोत्सवे॥ तथा संवत्सरस्यादौ
सूतकांते शिरोरुजि॥ श्रावण्यां बलिराज्ये च सततस्योदयते थ॥ तथा॥ तैलाभ्यंगो न दुष्येत संक्रांतिग्रहणादिषु॥ तै
लाभ्यंगं बुधैः प्रोक्तं मंगलस्नानमुच्यते॥ उच्चैश्छवादो प्रकर्तव्यं सर्वदा शुभवांछिभिः॥ संतापः कांतिरल्पायुर्ध
नं निर्धनता तथा॥ अनारोग्यं सर्वकामा भस्म नाततं॥ ततः कुर्यान्निजकायविशोधनं॥ प्रायश्चित्तं समासाद्य द्विजो
२ मिथुने ततः॥ कुर्याच्छ्राद्धं हि स्थे न च्युपवासो भवेयत्॥ प्रयोगपारिजाते॥ स्नात्वा नदीषु सर्वासु पितृदेवांश्च तर्पयेत्॥ त
त्र तत्र यथावित्तं कुर्याच्छ्राद्धादिकं तथा॥ न परीक्षेद्द्विजस्तीर्थे त्वन्नार्थं भोज्यमेव च॥ सक्तुभिः पिंडदानं च चरुणा पायसे
न वा॥ कर्तव्यमृषिभिर्दृष्टं पिण्याकेन गुणेन वा॥ श्राद्धं तत्र तु कर्तव्यं नैव विघ्नं समाचरेत्॥ अकालेप्यथवा काले तीर्थ